This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google™ books

http://books.google.com



IndL
1506
3

Digitized by Google

IndL 1506.3



Harvard College Library

FROM THE FUND OF

THOMAS WREN WARD,

Late Treasurer of Harvard College.

Received 31 Jan. 1901.

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google

मालविकाग्निमित्रम्।

नाटकम्।

महाकवि-कालिदास-प्रणीतम्।

गवर्णमेण्ट-संस्कृतपाठशालास्थाध्यापक-

श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्य्येण

कृतविषमपदव्याख्या-समलङ्कृतम्।

१८२७ संवत्सरे

मुद्रितम्।

MALAVIKAGNIMITRA

A DRAMA

BY

KALIDASA

EDITED WITH NOTES

BY

PANDIT TARANATHA TARKAVACHASPATI

PROFESSOR OF GRAMMAR, SANSKRIT COLLEGE.

calcutta:

1870.

AGENTS.

Pandit Jibananda Vidyasagara B. A.
Sanskrit College, Calcutta.

Trübner & Co.
London.

Digitized by Google

Ind L 1506.3
IV .6103

HARVARD COLLEGE
JAN 31 1901
LIBRARY.

Ward fund

PRINTED BY KHETTERMOHUN MOOKERJEA
AT THE KAVYAPRAKASHA PRESS.

Digitized by Google


Professor Tárá́nátha Tarkavá́chaspati, in the midst of his philological labours, has responded to the call of many of his pupils and other Sanskrit-reading friends in issuing this present edition which is the first in India of the Málavikágnimitra of Kalidása being one of his three dramas that have come down to us. The Pandit has given notes on difficult passages and translation in Sanskrit of all the Prákrita passages in the text.

PRASANNAKUMÁRA SARVÁDHIKÁRÍ
PRINCIPAL OF THE SANSKRIT COLLEGE.

Calcutta,
Govt. Sanskrit College,
July 18, 1870.

Digitized by Google

Ind L 1506.3
IV .6106



Ward fund

PRINTED BY KHETTERMOHUN MOOKERJEA
AT THE KAVYAPRAKASHA PRESS.

Digitized by Google

Professor Tárá́nátha Tarkavá́chaspati, in the midst of his philological labours, has responded to the call of many of his pupils and other Sanskrit-reading friends in issuing this present edition which is the first in India of the Málavikágnimitra of Kalidása being one of his three dramas that have come down to us. The Pandit has given notes on difficult passages and translation in Sanskrit of all the Prákrita passages in the text.

PRASANNAKUMÁRA SARVÁDHIKÁRÍ
PRINCIPAL OF THE SANSKRIT COLLEGE.

Calcutta,
Govt. Sanskrit College,
July 18, 1870.

Digitized by Google

Digitized by Google

शुद्धिपत्रम् ।

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
कोरेत्य	कोरेत्य	६	१७
असन्निहेति	असन्निहितेति	७	११
प्रसङ्गार्थः	प्रसङ्गार्थौ	७	१२
अन्यतो विशेषः	अन्यविलक्षं भावान्तरम्	११	१८
राजत्त	राजत्त	१५	११
विकल्प्य	विकल्प्य	१८	६
पश्यति	न पश्यति	१८	२०
परिमङ्गाद्गानं	परिमङ्गस्नानं	१८	२२
सुतीर्थात्	सुतीर्थात्	२१	१५
सुन्दर	सुन्दर	२१	१५
प्रत्यायवितव्यम्	प्रत्यायवितव्यम्	२६	२
भक्षयत	भक्षयत	२८	१२
स्नानं	स्नानं	२८	१८
पश्यामः	पश्याम	३१	१२
पत्न्याः	दुहितुस्सपत्न्याः	३१	१७
मे मम	मे मम	३८	१५
मत्	सत्	४०	१८
मित्यस्य	मित्यकस्य	४२	१८
आगमिनौ	आगमिनौ	५०	१८

Digitized by Google

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
करत्वात् न	करत्वेन	५४	१३
रुग्नस्य	रुग्णस्य	५६	२०
व्यापार	भूषणव्यापार	५७	१६
वीक्षते	वीक्षते	६२	६
चरणा	चरण	६४	१०
स्फुरितख	स्फुरितनख	६५	१७
भर्नुरखा	भर्तुरखा	६६	१२
त्वरयख	त्वरयक	६६	२०
सुरभी	सुरभि	७२	११
सिद्ध	सिद्ध	७३	१४
दुष्टत्वा	दुष्टत्वात्	७३	१५
अभिसन्धाय	अभिसन्धाय	७५	२०
अनन्या	अनन्या	८०	१३
किमन्यजत्	किमन्यत्	८०	१८
प्रणयती	प्रणयवती	८५	१०
कथयति	कथयति	८८	१२
अनलङ्कृतः	अनलङ्कृतः	८८	१२
नालङ्कृतामीति	नालङ्कृतामीति	८८	१२
योगक्षेमं	योगक्षेमं	९४	१८
विषादाभ्यामल	विषादाभ्याम् (६) अल	१००	१३
नमो ते	नमस्ते	१००	१८
तदागमन	(६) तदागमन	१००	२०
चेष्टया	चेष्टया	१०४	६
इदानीं	इदानीम्	१०६	१३

Digitized by Google

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
प्रकाश्ये	प्राकाश्ये	१०८	१२
बर्धत	वर्द्धते	१११	१४
म्टच्छासि	म्टच्छासि	११४	२०
तज्जन्यापराधः	तज्ज्यापराधं	११४	२१
दृष्ट्वैव	दृष्ट्वैव	११५	१४
पत्तवादित्वम्	पत्तपातित्वम्	११६	१४
मोच्यावहै	सच्यावहै	११७	५
दैव्यै	देव्यै	११८	१८
विणवेहि	विस्रवेहि	१२१	६
ऊर्जितामर्थ्यस्य	ऊर्ज्जितसामर्थ्यस्य	१२२	१६
रोधवृत्तैः	रोधःस्थवृत्तैः	१२२	२१
परिधास्त	परिघास्त	१२२	२२
अनेन तव	अनेन	१२३	१४
आहित	अभिहत	१२३	२१
बर्हसि	वर्हसि	१२४	१७
भवती	करोती	१२५	२०
पत्तो सूचितः	पत्तः सूचितः	१२७	२३
प्रतिबोधक	प्रतिरोधक	१२७	२३
बर्धतां	वर्द्धतां	१२८	१६
रोच्यते	रोचते	१३१	१८
यो स भर्त्ता	यः स भर्त्ता	१३२	१३
सबिल्लवम्	सविल्लवम्	१३३	११
पठ्ठ	पट्ठ	१३४	८
प्रवल	श्रवण	१३४	१८

Digitized by Google

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
उपपुज्यते	उपबुज्यते	१२६	२०
दारिको	दारको	१२८	१४
वर्धते	वर्द्धते	१४०	१२
मेवीय	मेधीय	१४०	१८
आदधाति	आदधाति स स्मृति मेधः	१४१	१८
जन्य	जन्म	१४१	१८
विघ्नवाधायक	विघ्नबाधायक	२४१	२१
परिवृत्तं	परिवृत्तुं	१४७	६

Digitized by Google

विज्ञापनम् ।

इह खलु सकलेषु सुखसाधनेषु काव्यमेव परमसुखसाधनम् तच्चि सुरुर्मुरुरनुशीलितमपि मनागपि विरागभाजनतां नैव भजते बहुशेवनेऽपि न याति चापक्षीणताम् प्रत्युत आस्वाद्यमानं नवांनवां कामपि चमत्कार-लहरीं चेतसि सचेतसां प्रतिक्षणमातनोति सच्चङ्गासयति च सहृदयहृदय सद्मपद्मम् न चापेक्षते तदास्वादनसम्पादने बहुलायासः ।

काव्यञ्च विलक्षणरचनोपलक्षितो विविधगुणभूषितो नानालङ्कार-मण्डितो रसभावादिप्रधानो वाक्यविशेषः ।

तत्प्रणेतारश्च वाल्मीकिकालिदासादयः प्रथिताः । तत्र वाल्मीक्यादयः कृतिवृत्तप्रधानं प्रसन्नतोरसानुगुणं रामायणादिकं, कालिदासादयश्च विविध-रसानुगुणं प्रसन्नत कृतिवृत्तोल्लेखं रघुवंशादिकं काव्यं रचयामासुः ।

तच्च काव्यं श्रव्यदृश्यभेदात् द्विविधम् । तत्र रामायणरघुवंशादिकं श्रव्यं, नागानन्दाभिज्ञानशकुन्तलादिकं नाटकाप्रपर्य्यायं रूपकपदाभिधेयं दृश्यं काव्यम् । तत्रापि दृश्यकाव्यमेव सहृदयानामतीव समादरास्पदं सर्व्वानुभवसिद्धम् । तत्र हि नटाभिनेयपदार्थान् वीक्षणेन वीक्ष्य तत्प्रयुक्त-वाक्यानि च श्रवणेन श्रुत्वा एकदैव नयनश्रवणप्रीतिमुपलभ्य कामपि आनन्दसन्ततिं चेतसि सहृदयधुरीणा उररीकुर्व्वन्ति मज्जन्ति चामुं रसा-र्णवलहरीषु ।

नाटकप्रणयनप्रकारज्ञापनाय च शिलालिना मुनिना पूर्वं नटसूत्राख्यः प्रबन्धो निरमायि इत्येतत् "पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः" इति, ४, ३, ११० पाणिनिसूत्रेणावगम्यते । भरतमुनिनापि तत्प्रतिपादकं सूत्रं

Digitized by Google

पृथिव्ये तेनैव च अभिनयप्रकारादिकं शिक्षयता अग्ररोभिः सरस्वत्या कृतं लक्ष्मीस्वयंवराख्यं नाटकमभिनायितमिति विक्रमोर्व्वश्यामवगम्यते। तयोश्च ग्रन्थयोः पठनपाठनासमादरलोपेन प्रायेण लुप्तप्रायता जाता। ततो भोजदेवपितृव्यसुञ्जदेवसभासदेन धनिकनाम्ना पण्डितेन दशरूपकनामको निबन्धो निर्ममे तत्र च नाटकलक्षणादीनि सम्यक्तया प्रतिपादितानि उदाहरणानि च तेन यथालाभं दर्शितानि। तत एव संक्षिप्य साहित्यदर्पणकृता षष्ठपरिच्छेदे सोदाहरणानि सम्यक्तया लक्षणान्युक्तानि।

संस्कृतनाटकाभिनयप्रचारश्च अतिपुरातनकालादारभ्य आसीत्। तच्च महाभारते हरिवंशे प्रभावतीहरणवृत्तान्त एव स्फुटमवगम्यते। विक्रमादित्यभोजदेवकालपर्य्यन्तञ्च संस्कृतभाषायाः प्रचाराधिक्यात् संस्कृतनाटकाभिनयोऽपि तत्तत्काले प्रचुर आसीत्। अत एव तदानीन्तनकविभिः स्वस्वकाले स्वस्वनृपसंसदि अभिनयप्रदर्शनार्थानि तत्तन्नाटकानि रचितानि। क्रमशश्च कालात् संस्कृतभाषायाश्चैदुर्य्ये विलुप्ते, विलुप्ते च तत्समादरे संस्कृतनाटकाभिनयोऽपि लुलोप। इदानीन्तु गवर्णमेण्टसंस्कृतपाठशालास्थान्तेवासिभिः १९२६ मिते संवत्सरे वेणीसंहारनाटकाभिनयोऽकारि तत्पूर्व्वञ्चाभिनं दृष्टपूर्व्वः संस्कृतनाटकाभिनयः।

इतःपूर्व्वं १९२७ सप्तविंशत्युत्तरोनविंशतिशततमवर्षे भारतवर्षे मालवदेशे उज्जयिनीनामराजधान्यामसीमगुणधाम विक्रमादित्यनामा नृपतिरासीत्। तस्य धन्वन्तरिप्रभृतयो नव कविवराः सभासदो बभूवुः। तेषु कालिदास एव प्रथितयशा महाकविरासीत्। तेन च रघुवंश-कुमारसम्भवमेघदूताभिधं काव्यत्रयं, ऋतुसंहाराभिधं उत्कलदेशप्रचलितो वेदोक्तकर्म्मप्रतिपादकग्रन्थः, ज्योतिर्विदाभरणनामकं कालज्ञानशास्त्रं च क्रमेण निरमायि। अनन्तरञ्च मालविकाग्निमित्र-विक्रमोर्व्वशी-शाकुन्तलाभिधानि दृश्यकाव्यानि प्रणीतानि। एतच्च तत्कृतज्योतिर्विदाभरणग्रन्थे शेषाध्याये स्पष्टमुपलभ्यते यथा,

Digitized by Google

यत्तोऽधुना कृतिरियं रति मालवेन्द्रे
श्रीविक्रमार्कनृपराजवरे समासीत् इति ।
धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कु-
र्वेताळभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥ इति

यद्राजधान्युज्जयिनी महापुरी सदा महाकालसहैश्वयोगिनी इति ।

गङ्क्रादिपण्डितवराः कवयस्तनेके
ज्योतिर्विदः समभवंश्च वराहपूर्वाः ।
श्रीविक्रमस्य बुधसंसदि प्राज्यबुद्धे-
स्तैरप्यहं नयसखः किल कालिदासः ॥
काव्यत्रयं सुमतिकृत् रघुवंशपूर्वं
जातं यतो ननु क्रियच्छ्रुतिकर्मवादः ।
ज्योतिर्विदाभरणकालविधानशास्त्रं
श्रीकालिदासकविनो हि ततो बभूव इति
वर्षे सिन्धुरदर्शनाम्बरगुणैर्याते कलौ संमिते
मासे माधवसंज्ञितेऽत्र विहितो ग्रन्थक्रियोपक्रम इति च

अनेन ३०६८ अष्टषष्ट्युत्तरत्रिसहस्रसंख्यके कलेरब्दवृन्दे याते तद्-ग्रन्थकरणं सुव्यक्तम् । इदानीं च कलेर्गताब्दाः ४९७० तेषु निर्दिष्ट ३०६८ संख्ययोनितेषु १९०२ वर्षाः समायान्ति । तेन इतः पूर्वं १९०२ वर्षगणात् पूर्वं कालिदासकविनो ज्योतिर्विदाभरणं ततः पूर्वं रघुवंशादिकमभूदिति प्रतिभाति । एतत्सन्दर्भैर्यद्यपि इदं काव्यत्रयकरणं न प्रतीयते तथापि इदं काव्यानां प्रागुक्तानां ज्योतिर्विदाभरणग्रन्थात् पश्चात्काले कालिदासकृततया न तेषां तत्र सङ्गल्लेखः किन्तु तत्तद्ग्रन्थेष्वेव तत्कृतत्वं सुव्यक्तमेव । ऋतुसंहार-नलोदययोर्यदि तत्कालिदासकृतत्वं तदा ततःपरार्वाचीनतया न तत्रोल्लेखः ।

Digitized by Google

दृश्यवरेषु च नाटकेषु कालिदासप्रणीतानि अभिज्ञानशकुन्तला-विक्रमोर्व्वशी-मालविकाग्निमित्राणि, भवभूतिप्रणीतानि उत्तररामचरित-मालती-माधव-वीरचितानि, धावकप्रणीते रत्नावलिनाम्ना श्रीहर्षराजकृततया प्रख्यापिते नागानन्द-रत्नावल्याख्ये, भट्टनारायणकृतं वेणीसंहाराख्यं विशाखदत्तकृतं मुद्राराक्षसञ्च इत्येतानि सर्व्वत उत्कृष्टानि। तन्मध्ये च अभिज्ञानशकुन्तलाख्यं शृङ्गाररसप्रधानं, करुणप्रधानम् उत्तररामचरितञ्च सर्व्वोत्कृष्टम्। कालिदासकवेः प्रसादगुणयुक्तशृङ्गाररसवर्णने यथा ख्यातिः एवं भवभूतेरपि गाढबन्धयुक्तकरुणवीरादिरसवर्णने सर्वत्र ख्यातिः। तावेव इमां भारतवर्षभूमिमुत्पद्य स्वस्वकृतकवित्वप्रख्यापनेन भूषयांबभूवतुः।

कालिदासस्य कतमन्वयं कतमञ्च जनपदमलञ्चकार तन्नाकलयामः। किन्तु तस्य चरितविषयेऽस्माद्देशे भूयिष्ठप्रचारमेवमैतिह्यमस्ति। तदत्र सर्वत्र विज्ञापनाय प्रदर्श्यते। काचित् विद्वत्तमा कन्या विवाहार्थं पित्रानीतान् बहून् पात्रभूतान् द्विजान् वादविचारेण पराजिग्ये। एवम् अगत्यागत्य तस्याः सकाशात् विचारे पराजयमाप्ता प्रतिनिवृत्तेषु वरेषु तदुत्तरं पराजयभयेनेतरे वरा यदा नैवागन्तुमैच्छन् तदा तत्पिता विचाराभावेनैव आगतमात्राय पात्राय कन्या देयेति प्रतिज्ञाते पूर्वपूर्ववरानयने निष्फलप्रयत्नतया बहुधा खिन्ना जातेर्ष्या दूताः पुनर्वरानयनार्थं तत्पित्रा नोदिताः स्वाबलम्बितयाखाच्छन्दितया कालिदासमल्पबुद्धिमवेत्य तत्कन्यायावरत्वेन आनिन्युः। आनीताय च तस्मै अविचार्य्य तद्दोषगुणौ तत्पिता तां कन्यां प्रायच्छत्। एवं तस्य विवाहे संवृत्ते दम्पत्योः परस्परालापकाले कालिदासेनापभ्रंशशब्दमात्राभिज्ञेनापभ्रंशशब्दः प्रायोजि। तत् श्रुत्वा च तद्भार्य्या तमत्यन्तं तिरस्कृत्य गृहात् निष्काशयामास। एवं पत्न्या निष्काशितः कालिदासोऽतीव निर्वेदमापद्यारण्यं गत्वा सरस्वतीमाराध्य तत्प्रसादात् प्राप्तविद्यः गृहं प्रति निवर्त्तते। आगत्य च रात्रौ गृहद्वारं रुद्धं विलोक्य तेन स्वपत्नीं प्रति "अनाघट्टकपाटं द्वारं देहीति" अभिहितम् तत् श्रुत्वा च स्वरविशेषेण तं पतिमवगत्य

Digitized by Google

कालिदासपत्न्याऽनुयुक्तम् "अस्ति कश्चित् वाग्विशेष इति" इत्येवं पत्न्या कृते वाग्विशेषास्तित्वप्रश्ने तद्वाक्यं पदत्रयघटितमिति कृत्वा तत्रस्थमेकैकं पदमधिकृत्य तेन एकैकं काव्यं विरचितम्। तत्र तद्वाक्यस्थम् अस्तीति प्रथमं पदमधिकृत्य "अस्युत्तरस्याम्" इत्यादि सप्तदशसर्गात्मकं कुमारसम्भवाख्यं महाकाव्यं, कश्चिदिति द्वितीयं पदमधिकृत्य "कश्चित् कान्ताविरहगुरुणा" इत्यादिकं मेघदूताख्यं खण्डं काव्यम्, वाग्विशेष इति तृतीयं पदं तदेकदेशं वागिति वाक्पदमधिकृत्य "वागर्थाविव संपृक्तौ" इत्यादिकमूनविंशतिसर्गात्मकं रघुवंशाख्यं महाकाव्यं च क्रमशो रचितम्। तद्वचनया च कालिदासः सर्वत्र प्रथितसुकवितया प्रख्यातिमुपलभ्य क्रमेण विक्रमादित्यस्यसभासदताम् आजगामेति।

उक्तेषु कालिदासकृतेषु नाटकेषु मध्ये इदमेकं नाटकमभिज्ञानशकुन्तलापेक्षया यद्यप्येतत् हीनं तथाप्यन्यापेक्षयास्य उत्कृष्टत्वमेव।

अत्र च नाटके पञ्च अङ्काः शृङ्गारो रसः अङ्गी, विदिशाधिपतिः अग्निमित्रस्यपतिर्नायकः मालवदेशाधिपस्य माधवसेनस्य स्वसा मालविका नायिका, धारिणीनामिका राजमहिषी इरावती चापरा राजभार्या तस्याः प्रतिनायिका। अत्र संक्षेपत इतिवृत्तं तावदभिधीयते। माधवसेनाख्यो मालवाधिपतिः स्वस्वसुर्वरत्वेन अग्निमित्रं स्थिरीकृत्य तद्विवाहं निष्पादयितुमागच्छन् तस्यैव पितृव्यपुत्रेण यज्ञसेनेन पथि अवरुध्य निगृह्य च कारागारे रुद्धः। अथ ताद्रोधोपप्लवमुपलभ्य तस्य सचिवेन सुमतिना गूढं तद्भगिनीं मालविकामपवाह्य स्वभगिन्या कौशिक्या सह विदिशाभिगामिसार्थवाहसार्थमवलम्ब्य अग्निमित्राय तां प्रतिपादयितुं प्रतस्थे।

अथारण्ये निधिं तैः सह सुप्तो दस्युभिराक्रम्य सार्थवाहसैन्यानि पराजित्य तां परीप्सुः युध्यमानो सुमतिर्व्यापादितः। तत्रारण्ये च प्राप्तमूर्च्छां कौशिकीं श्रुततया निश्चित्य मालविकामर्थसंघातांश्च दस्यवोऽपहृत्य अग्निमित्रदुर्गपालाय तस्यैव श्यालकाय वीरसेनाय उपढौकन-

Digitized by Google

त्वेन तां प्रायच्छत्। वीरसेनोऽपि तां दारिकां शिल्पादिकर्मनिपुणामवेत्य स्वभगिन्यै धारिण्यै अग्निमित्रमहिष्यै उपायनत्वेन प्रैषयत्। धारिणी च तां शिल्पादिकलासु निपुणामवगम्य गणदासस्य नाट्याचार्यस्य समीपे ऋषिकनामनाटकाभिनयशिक्षायै न्ययोजयत्। अत्रान्तरे कौशिकी दक्षूनामप्सरसानन्तरं प्रबुध्य विषण्णेन भ्रात्रा, अपहृतया मालविकया च वियुक्ता किंकर्तव्यमितिकर्तव्यतामूढतामापेदे। अथ तथाभूतमुपप्लवमनुभूय संसारात् परं निर्वेदमापद्य च क्रमेण नियतिनियोगात् विदिशानगरीमागत्य कौशिकी प्रव्रज्यां जग्राह। धृतप्रव्रज्यया च तया भवितव्यतावशात् धारिण्या सह मैत्रीमासाद्य तस्याः पीठमर्दितामाखेभे। तत्र च चिरपरिचितामपि मालविकां तथाभूतां वीक्ष्याभिज्ञायापि कारणान्तरवशाद् राज्ञीसमीपे माधवसेनभगिनीयमिति न प्रकाशयामास।

एकदा च चित्रपटे राज्ञीपरिचारिकामध्ये लिखितप्रतिमूर्तिं मालविकां विलोक्य नरपतिः तत्सौन्दर्यदर्शनेन अतीव चमत्कारितामापद्य च कस्या इयं प्रतिमूर्तिरिति धारिणीमन्वयुङ्क्त। धारिणी च तां निगूहितुं कथान्तरप्रसक्तिराददे। अतिसौन्दर्यवतीयं कदाचित् राज्ञा दृश्येत तदाऽनुरज्येतास्यामिति आशङ्क्य राज्ञा तथा निगूह्यमानां तां राजा निर्बन्धातिशयेन देवीं पुनः पुनः कोयं कोयमित्यपृच्छत्। बालस्वभावा च तत्कुमारी बहुलक्ष्मीः राज्ञा निगूह्यमानामपि तां दारिकां मालविकेत्यभिदधे।

राजा तु तत्प्रतिमूर्तिदर्शनेन मुग्धहृदयतया तां साक्षात् द्रष्टुमिच्छन् वयस्येन गौतमेन विदूषकेण समं रहसि समामन्त्रयत्। विदूषकस्तु तदुपायत्वेन नाटकाभिनयदर्शनच्छलेन तां दर्शयितुं कौशिक्या सह गूढं पराक्रम्य हरदत्तमणदासयोः नैपुण्यविषये अन्योन्यस्पर्द्धामुत्पाद्य कलहं कारयित्वा राजसमीपं तौ निर्णयार्थमागमयामास। राज्ञा च गणदासस्य देवीपरिग्रहतया, हरदत्तस्य चात्मपक्षतया देवीसमीपे एव तन्निर्णयस्य युक्ततायाः प्रतिपादने राजादेशेन कौशिक्या सह देव्या तत्रागतम्। अथ राज्ञा तयो-

Digitized by Google

विशेषनिर्णयाय नियुक्तया विदूषकेण पूर्वं समुद्भावितया कौशिक्या स्वशिष्य-प्रयोगदर्शनादेव तयोः नैपुण्यविशेषनिर्णयो भविष्यतीत्यभिहिते "मालतप्रवेशः रूपान्तरपरिग्रहं विनैवेत्यभिहिते च गणदासेन स्वशिष्यां मालविकां नेपथ्यान्तरमेवाकर्षयित्वैव रङ्गभूमौ प्रवेश्य तन्मुखेन चतुरदोषेतं शर्मिष्ठया कृतं छलिकनाटकस्थमेकं पद्यं राजानं श्रावयामास। तस्य पद्यस्य च दम्पत्योः पूर्वरागाभिव्यञ्जकतया मालविका तत्पाठव्याजेन, चेष्टाविशेषेण च आत्मनो-ऽनुरागं राज्ञे न्यवेदयत्। राजा तु अतीव सौन्दर्यशालिनीं तामालोक्य तदैव तां चकमे इत्येवम योन्यस्मिन् अन्योन्यरागे आविर्भूते तदनन्तरं तयोः क्रमेण शरदशा आविर्बभूव।

अथ नृपतिस्तामुपलब्धुं विदूषकेण सह रहसि मन्त्रयामास। विदू-षकस्य तत्प्रार्थनां मालविकासखीं बकुलावलिकां श्रावयित्वा यथा राज्ञा सह मालविकाया मेलनं भवेत्तदुपायं चिन्तयामास। अत्रान्तरे प्रमदवन-स्थितं पीतवर्णाशोकं चिरेणाकुसुमायमानमुपलभ्य तदुद्यानपालिका वरा-ङ्गनायाः नूपुरपादताडनरूपदोहदार्थं धारिण्यै न्यवेदयत्। धारिणी च तदा स्वयं पादयोरङ्गणतया मालविकामेवान्तःपुरमध्ये वराङ्गनां मत्वा पीता-शोकदोहदनिष्पादनाय न्ययोजयत् अङ्गीचकार च पञ्चरात्राभ्यन्तरे अशोक-पुष्पोद्गमे तवाभीष्टं दास्यामीति। एवं राज्ञा नियुक्ता मालविका स्वसख्या बकुलावलिकया सह प्रमदवनं गत्वा पीताशोकस्य नूपुरपादताडनरूपं दोहदं विदधे। अतैव समये बकुलावलिका निर्जने राज्ञः प्रार्थनां तस्यै न्यवेदयत्। भवितव्यतावशाच्च राजापि तस्मिन् समय एव तत्राससाद। अथ राज्ञापि स्वप्रार्थनं स्वमुखेनैव तदानीं मालविकायै श्रावितम्। अत्रा-न्तरे अन्या दूरावतीनाम्नी राज्ञभार्या तत्रोपतस्थे आकर्णयामास च राज्ञस्तस्यामनुरागसूचकं तद्वाक्यम्। तत् श्रुत्वा च सा राज्ञे भृशं कुकोप। अथ राज्ञा प्रसाद्यमानापि सा तं विहाय ततः प्रतस्थे। ततः सा देवीं धारिणीमुपगम्य सर्वं वृत्तान्तमावेदयत्। देव्या च बकुलावलिकया सह

Digitized by Google

मालविकां निगड़ेन बद्ध्वा तदधिकृतमाधविकां पुत्रमुपदिष्टं मदादेशसूचकाभिज्ञानदर्शनमन्तरेण नैते मोचनीये इति ।

एतद्वृत्तान्तमवगत्य राजातीव खेदमापेदे । अथ विदूषकः तदुद्धाराय आत्मनो हस्ते केतककण्टकेन क्षेदं कृत्वा सर्पदंशनव्याजेनापदिश्य च राजराज्ञ्याः समीपे विषवेगं प्रकाशयामास । राजा च ध्रुवसिद्धिं तद्विषापनोदनाय न्ययोजयत् । तदपहाराय नियोजितो ध्रुवसिद्धिर्नागविषापहारकमणिमन्विष्येष । देव्या च खाङ्कुरीयस्थ-सर्पविषापहारकमणिः तस्मै प्रेरितः । तमधिगत्य कृत्रिमविषवेगं परिमुच्य च विदूषकः मालविकामोचनार्थं माधविकासमुपगम्य अवोचत् । राज्ञो जन्मनक्षत्रं दुष्टग्रहाभिभूतमित्यतस्तदुपशमाय सर्वबन्धमोक्षो विधेय इति ज्योतिर्विद्भिरुपदिष्टे इरावतीचित्तं रक्षन्त्या देव्या अभिज्ञानरूपमिदमङ्कुरीयकं दत्त्वाऽहं न्ययोजि । इत्थं कूटमभिलप्य बन्धान्ते मोचयामास । ततो निभृतं प्रमदवनं नीत्वा राज्ञा सह मालविकां मेलयामास । पुनरपि तन्मोचनसमये इरावती तत्र समुपतस्थे तथाभूतं तयोर्विश्वासङ्गेतस्थाने सङ्गं विलोक्य राजानं प्रति पुनरभिषुक्रोध । अस्मिन्नेवान्तरे पीताशोकस्य पुष्पोद्गमोजातः । तद्वृत्तान्तज्ञानपात्रिका मधुकरिका देव्यै न्यवेदयत् । राज्ञ्या तु पूर्वप्रतिज्ञातवस्तुप्रतिपादनाय कौशिक्या मालविकां भूषयित्वा तामादाय राज्ञे प्रतिपादयितुं प्रमदवनमाजग्मे । तदानीञ्च राज्ञीभ्रात्रा वीरसेनेन अश्वमेधेन यियक्षुणा मुक्ताश्वरक्षायै नियुक्तं राजपुत्रं वसुसेनं सर्वत्र विजयिनमुपश्रुत्य सर्वेषां हर्षपुष्कलो जातः । तदानीमेव माधवसेनमोचनाय पूर्वनियोजितवीरसेनपुरुषैतिभिः यज्ञसेनं जित्वा माधवसेनमोचनवृत्तान्तावेदनाय माधवसेनान्तःपुरस्थदारिकाद्वयेन सह दूतस्यागमनम् । ताभ्याञ्च दारिकाभ्यां मालविकां कौशिकीं च दृष्ट्वा प्रमदवनाभिज्ञाय च राजसमीपे तत्परिचयो दत्तः । कौशिक्या च आमूलं सर्ववृत्तान्तमुक्त्वा एतावत्कालपर्यन्तमात्मना निगूहनकारणमपि अभिदधे । अथ देव्यैव पूर्वप्रतिज्ञानुसारेण कौशिकीमनुज्ञाप्य राज्ञे तां प्रायच्छत् । राजा तु पूर्वं

Digitized by Google

गान्धर्वविधिना प्रतिगृहीतामपि तां राज्ञीसम्मानार्थं तदैव प्रतिग्रह इति प्रकाशयामास इत्येवं मालविकया माधवसेनेन पूर्वं प्रतिश्रुताया अपि राज्ञा सह मेलनम्।

एतच्च रत्नावल्यां वर्णितं सागरिकया सह वत्सराजसमागमवृत्तान्तमनुहरति तस्य नाटकस्य धनप्राप्त्याशया कविना श्रीहर्षेणततया ख्यापितत्वेऽपि धावकेनैतत्वं धावकस्य च एतस्मात् कवेः पूर्वकालिकत्वं ग्रन्थेनैव स्वयं प्रस्तावनाप्रसङ्गेऽभिहितम् इत्यतस्तद्वृत्तान्तमनुहृत्यैतद् ग्रन्थकारेण निरमायीति प्रतिभाति।

एतत् पुस्तकञ्च भारतवर्षे कदापि मुद्रितं नासीत्। प्रथममेव मयास्य प्रचारणे यत्नोऽकारि। अस्य च परिशोधनविषये पाठशालास्थविभिन्नदेशीयं नागराक्षरवङ्गाक्षरलिखितं पुस्तकद्वयं जरमेणदेशस्थेन मुद्रितपुस्तकं च मूलम्। तेषु पुस्तकेष्वेव तावत्पाठावलोकनेन वङ्गसंवादिपाठादिग्रहणेनैव मुद्रितम्। यत्र च उभयविधपाठः वङ्गपुस्तकपाठसंवादो तत्रोभयविधोऽपि पाठः मुद्रितः चिह्नविशेषेण च तत्र तत्र एकस्य प्राह्यता अपरस्य क्वाचित्कता सूचिता। अत्र विषमपदं व्याख्यातम् व्याख्यातञ्च प्राकृतभाषावाक्यं संस्कृतभाषावाक्येन।

इतःपूर्वं वेणीसंहारनाटकविवरणे नाटकमुखप्रतिमुखबीजसन्धिरूपाद्यङ्गसमुद्भावनं मया कृतं तत्र च इदानीन्तनानादरातिशयाभावदर्शनेन एतन्नाटकविवरणसमये विस्तरेण तदुद्भावनं विनैव विषमपदव्याख्यानमात्रे प्रायासि।

यावता परिश्रमेणास्य परिशुद्धिर्भवेत् तावान् परिश्रमोऽस्य शोधने मयाकारि तथापि यदत्र क्वचित् क्वचित् मम परिस्खलनं तस्य विशुद्धिर्विद्वद्भिर्विधेयेति।

संवत् १९२७।
भवर्णमेण्टसंस्कृतविद्यालयः।

श्रीतारानाथतर्कवाचस्पतेः।

Digitized by Google

Digitized by Google

मालविकाग्निमित्रम्।



एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्माद् यतीनाम्।
अष्टाभिर्यस्य कृत्स्नं (१) जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः॥१॥

प्रणम्य परमात्मानं श्रीतारानाथशर्मणा।
विधियते मालविकाग्निमित्रं नाम नाटकम्॥

(१) प्रणतानां भक्तानां बहूनि स्वर्गापवर्गादीनि फलानि यतः तादृशे एकैश्वर्ये परमेश्वरत्वे स्थितस्तद्विग्रिष्टोऽपीत्यर्थः। क्वचित् प्रणतबहुफल इति पाठः, स चोऽक्लार्थक एव। यः, स्वयं स्वरूपतः कृत्तिवासाः द्वीपिचर्माम्बरः तेनाकिञ्चन इत्यर्थः। तथा च परमैश्वर्याकिञ्चनत्वयोरेकत्र समावेशात् विरोधाभासः, ईश्वरे सर्वसमावेशसम्भवात् तत्परिहारः एवमुत्तरत्रापि बोध्यम्। कान्तया प्रियया गौर्या संमिश्रः संयुक्तः देहो यस्य तादृशः अर्द्धाङ्गीकृतनारीदेहः कान्तासंश्लिष्टदेहश्च, सन्नपि अविषयमनसां न विषयेषु शब्दादिषु मनो येषां विषयानासक्तचित्तानां यतीनां जितेन्द्रियाणां योगिनां संन्यासिनां वा परस्मात् परः प्रथमार्थे अस्तातिः। श्रेष्ठः, अष्टाभिः पृथिवी-जल-तेजो-वायु-गगन-यजमान-सूर्य-चन्द्र-रूपाभिस्तनुभिर्मूर्तिभिः कृत्स्नं सर्वं जगत् बिभ्रतो धारयतः पोषयतश्च यस्य नाभिमानः; स ईशः

Digitized by Google

[नान्द्यन्ते ।]

सूत्रधारः (१) । अलमतिविस्तरेण नेपथ्याभिमुखमवलोक्य । मारिष ! (२) इतस्तावत् ।

प्रविश्य । पारिपार्श्विकः (३) । भाव ! (४) अयमस्मि ।

सूत्र । अभिहितोऽस्मि, परिषदा श्रीकालिदासग्रथितवस्तु मालविकाग्निमित्रं नाम नाटकमस्मिन् वसन्तोत्सवे प्रयोक्तव्य(५)-मिति, तदारभ्यतां सङ्गीतकम् ।

शिवः वो युष्माकं सन्मार्गालोकनाय सन्मार्गस्य मोक्षादुपायस्य सत्पथस्य च आलोकनाय दर्शनाय तामसीमज्ञानात्मिकाम् अन्धकारप्रचुराञ्च वृत्तिम् चित्तपरिणामभेदं व्यवहारञ्च व्यपनयतु । अस्य न नान्दीरूपता "पदैर्द्वादशभिर्युक्ता अष्टाभिर्वा भवेदुत" इत्युक्तस्य नान्द्याः लक्षणस्यालाभावात् । किन्तु कविकृत-मङ्गलाचरणरूपत्वमेवेति बोध्यम् ।

(१) "सूत्रं धारयते यस्तु सूत्रधारः स उच्यते" इत्युक्तलक्षणः प्रधाननटः सूत्रधारो वदतीति शेषः । वाक्यमेव कर्म एवमुत्तरत्रापि नान्द्यन्ते इति क्वाचित्कः पाठस्तु प्रामादिकः उक्तपद्यस्य नान्दीरूपत्वाभावस्योक्तत्वात् ।

(२) मारिष ! आर्य्य !

(३) सूत्रधारात् किञ्चिदूनवयस्को नटः पारिपार्श्विकः ।

(४) भाव ! विद्वन् !

(५) कालिदासेन कविना ग्रथितं संदृब्धं वस्तु अभिनेयपदार्थजातं यत्र तत् । मालविकाग्निमित्रसंज्ञितोऽग्निमित्रः शाकपार्थिवादित्वात् समासः । तमधिकृत्य कृतो ग्रन्थः अण् द्वन्द्वसमासत्वे किरातार्जुनीयवत् लुप्तप्रत्ययः स्यात् । "नाटकं स्यादतद्वत्तं स्यात्" इत्यादुक्तलक्षणं दृश्यकाव्यं तल्लक्षणं च

Digitized by Google

पारिपार्श्विकः । मा तावत् । प्रथितयशसां भावक-(१)सौमिल्ल-कविपुत्रादीनां प्रबन्धानतिक्रम्य वर्त्तमानकवेः कालिदासस्य कृतौ किं कृतो बहुमानः ।

सूत्र । अयि विवेक-(२)विश्रान्त-[शून्य]मभिहितम् । पश्य

पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।
सन्तः परीक्ष्यान्यतरद्भजन्ते
मूढः परप्रत्ययनेयबुद्धिः ॥ (३)

साहित्यदर्पणे षष्ठपरिच्छेदे द्रष्टव्यम् । प्रयोक्तव्यमभिनेतव्यम् अभिनयस्य यद्यपि तत्तत्पात्राश्रयमेव, तथापि तदुपलक्षितपात्रस्थापि स उपचर्य्यते ।

(१) भावकः नागानन्दरत्नावल्यादिप्रबन्धकारकः । स च स्वप्रणीतमपि स्वकं धनलिप्सया श्रीहर्षनाम्ना प्रख्यापितवानिति मम्मटभट्टस्य सम्मतम् । केचित् तु अन्य एव भावक इति कल्पयन्ति । प्रबन्धान् नागानन्दादीन् उल्लङ्घ्य अतिक्रम्य अनादृत्येति यावत् । वर्त्तमानकवेः नव्यकवेः बहुमानः समादरः किं कथं कृतः परिषदेति शेषः । क्वचित् बहुमानः परिषद इत्येव पाठः । तत्र परिषद इति कर्त्तरि षष्ठी । तत्प्रबन्धानामनतिक्रमणीयतां विदन्ति तान् विशिनष्टि प्रथितयशसामिति विख्यातकीर्त्तीनामित्यर्थः । पृथुलयशसामिति पाठे विस्तीर्णकीर्त्तीनामित्यर्थः ।

(२) पारिपार्श्विकेनैवमाक्षिप्ते सूत्रधारस्तत्परिहर्त्तुमाह, विवेकेति । विवेको विश्रान्तो निहतो यस्मात् निहतस्य परनिपातः । विवेकशून्यमिति पाठस्तु सुगमः समीचीनश्च ।

(३) विवेकशून्यत्वेनाद्येपोऽस्य परिहृतस्तदेव कुत इत्यत्र गौरवागौरवे

Digitized by Google

पारि। आर्यमिश्राः (१) प्रमाणम्।

सूत्र। तेन हि त्वरतां भवान्।

शिरसा प्रथमगृहीतामाज्ञामिच्छामि परिषदः कर्तुम्।
देव्या इव धारिण्याः सेवादक्षः परिजनोऽयम्॥ (२)

इति निष्क्रान्तौ।

प्रस्तावना। (३)

गुणदोषौ तन्वते इति प्रतिपादयन् प्रस्तुतकाव्यस्य गुणवत्त्वात् गौरव-भाजनतेत्याह, पुराणमित्यादि। साधु सगुणं निर्दोषम् अवद्यम् दुष्टम्। सन्तः प्रेक्षावन्तः सदसद्विवेकिन इति यावत्। परीक्ष्य-गुणदोषाविति शेषः पर्यालोच्य, अन्यतरत् पुराणं नवं वा, यत् सदोषं तत् परित्यज्य सगुणं भजन्ते। मूढः सदसद्विवेकशून्यः। तुकारो गम्यः। परस्य इतरस्य प्रत्ययेन विश्वासेन तच्छ्रद्धादर्शनेनेति यावत्। नेया तदनुसारेण कार्या बुद्धिर्येन तादृशः। तथा च प्रेक्षावताम् गुणदोषावेव गौरवागौरवयोस्तन्त्रे न नव्यप्राचीनत्वे इत्यतोऽत्र अन्ये बहुगुणवत्त्वात् प्रेक्षावतां प्रवृत्तिः स्यात् न तु नव्यत्वेनानादर इति भावः।

(१) आर्यमिश्रा आर्यश्रेष्ठाः सदसद्विवेकित्वेनैव तेषां श्रेष्ठत्वम् प्रमाणं सदसद्विवेचनाय प्रमातार इत्यर्थः।

(२) एवं परिषदः प्रसादाभिनयार्थं तदाज्ञां जिघृक्षुः प्रस्तुतपात्र-प्रवेशनाय कथां प्रस्तौति शिरसेति। अनन्तरमेव रङ्गभूमौ प्रवेक्ष्यन्तं राज्ञी-परिजनम् अङ्गुल्या निर्दिशन्नाह, अयमिति। धारिणी च अग्निमित्रस्य महिषी तस्याः परिजनः परिचारकलोकः।

(३) "नटो विदूषको वापि" इत्युक्तलक्षणमासुखम् साहि० ६ परि०।

Digitized by Google

ततः प्रविशति वकुलावलिका।

वकुला। आणत्तम्हि देवीए धारिणीए अचिरोवणीदा ललिअणामणट्टअअन्तरे [उवदेसग्गहणे अ०] कीरिसी, मालविए त्ति णट्टाआरिअं अज्जगणदासं पुच्छिदुं ता जाव सङ्गीदसालं गच्छम्हि। (१) इति परिक्रामति।

ततः प्रविश्यात्मगतं हसन्ती द्वितीया चेटी।

प्रथमा। द्वितीयां दृष्ट्वा। हला कोमुदिए! कुदो दाणीं दूअं दे धीरदा जं समीए वि अदिक्कमन्ती दूदो दिट्ठिं ण देसि। (२)

द्वितीया। अम्मो वउलावलिआ। सहि! देवीए दूदं सिम्मि-

---

(१) आज्ञप्तास्मि देव्या धारिण्या, अचिरोपनीता ललितनामनाट्याचार्यान्तरे (उपदेशग्रहणे अ०) कीदृशी मालविकेति नाट्याचार्यं गणदासं प्रष्टुम्, तदावत् सङ्गीतशालां गच्छामि। स० इषपर्व्वदुहितुः शर्म्मिष्ठायाः कृतिसम्भृतैः पदैः समन्वितं ललितं नाम नाटकं तदान्तरे अचिरमुपनीता उपदेशग्रहणार्थं धृतनियमा कीदृशी प्रज्ञताभिनयशिक्षाग्रहणे इति शेषः। कीदृगवस्थेत्यर्थः। क्वचिदुपदेशग्रहणे इत्यधिकः पाठः। कीदृशम् उपदेशं ग्रहीतेति शिक्षार्थं नाट्याचार्यसमीपे सखीप्रेषणमिति दृष्टव्यम्।

(२) प्रथमा। हला कौमुदिके! कुतस्ते दूतं धीरता वल्लभीपेऽप्यतिक्रामन्ती दूतो दृष्टिं न ददासि। स० प्रथमा प्रथमं प्रविष्टा वकुलावलिका। द्वितीया तत्परं प्रविष्टां कौमुदिकाम्। धीरता धैर्यमचाञ्चल्यं प्रज्ञतविषयमुपेक्ष्य विषयान्तरेऽनासक्तेत्यर्थः।

Digitized by Google

सम्मासादो आणीदं णागमुद्दासणाहं अङ्गुलीअअं सिणिद्धं णिभालअन्ती तुह उवालम्भे पडिदम्हि । (१)

प्रथ । विलोक्य । ठाणे सज्जदि दे दिट्ठी । इमिणा अङ्गुलीअएण उब्भिण्णकिरणकेसरेण कुसुमिदो विअ दे अम्महत्थो । (२)

द्विती । हला कहिं पत्थिदासि । (३)

प्रथ । देवीए वअणेण णाट्टाआरिअं अज्जगणदासं पुच्छिदुं उवदेसग्गहणे कीरिसी मालविएत्ति । (४)

द्विती । सहि ! ईरिसेण वावारेण असण्णिहिदावि सा भट्टिणा कहं दिट्ठा । (५)

---

(१) द्वितीया । अङ्गो बकुलावलिका । सखि ! देव्या इदं मिलित्सकाशादानीतं नागमुद्रासनाथमङ्गुलीयकं स्निग्धं निभालयन्ती तवोपालम्भे पतितास्मि स० । आकस्मिकदर्शने हर्षाश्चर्यद्योतकम् अङ्गो इत्यव्ययम् । नागमुद्रया नागविषहारकमणिमुद्रितया मुद्रया नामाङ्कनयोर्व्ययत्वभेदेन सनाथं युक्तम् । अनेनैव विषहारकमणिना विद्रुमकस्य कृत्रिमविषापहारो भविष्यतीति वस्तुर्थोऽङ्के व्यक्तीभविष्यति ।

(२) प्रथमा । स्थाने सज्जति ते दृष्टिः अनेनाङ्गुलीयकेनोद्भिन्नकिरणकेसरेण कुसुमित इव तेऽभिप्रायः । स० । अयं हस्तस्य हस्तामित्यर्थः ।

(३) द्वितीया । हला कुत्र प्रस्थितासि स० । हलेति सखीसम्बोधनम् ।

(४) प्रथमा । देव्या वचनेन नाट्याचार्यमार्यगणदासं प्रष्टुम् उपदेशग्रहणे कीदृशी मालविकेति । स०

(५) द्वितीया । सखि । ईदृशेन व्यापारेणासन्निहितापि सा भर्त्रा कथं दृष्टा स० । ईदृशेन अभिनयगीतव्यापारेण कर्त्रा तदभ्यासाय अन्यत्रा-

Digitized by Google

प्रथ । आं । सो जणो देवीए पासगदो चित्ते दिट्ठो । (१)

द्विती । कहं विअ । (२)

प्रथ । सुणाहि । चित्तसालं गदा देवी जदा पच्चग्गवण्णरागं चित्तलेहं आआरिअस्स पलोअन्ती चिट्ठदि । तहिं अन्तरे भट्टा उवट्ठिदो । (३)

द्विती । तदो तदो । (४)

प्रथ । उवआराणन्तरं एक्कासणोवविट्ठेण भट्टिणा चित्तगदाए देवीए परिअणमज्झगदं आसण्णपरिआरिअं पेक्खिअ देवी पुच्छिदा । (५)

वस्थितेरावश्यकत्वात् न तस्याः तत्र सन्निधिसम्भव इतश्चाह असन्निहेति देव्याः अन्तःपुरस्य वेत्यर्थः । कथं भर्त्रा दृष्टेत्युक्तिः प्रकृतकथाप्रसङ्गार्थः । अनेन च कथोद्घातेन तस्याः भर्तुश्च प्रवेशो भविष्यतीति प्राक् सूचितम् "असूचितस्य प्रवेशो नास्ति" इति नाटकसम्प्रदायात् तत्सूचनम् ।

(१) प्रथमा । आं । स जनो देव्याः पार्श्वगतश्चित्ते दृष्टः ।

(२) द्वितीया । कथमिव ।

(३) प्रथमा । शृणु । । चित्रशालां गता देवी यदा प्रत्यग्रवर्णरागां चित्रलेखामाचार्यस्यावलोकयन्ती तिष्ठति । तस्मिन्नन्तरे भर्तोपस्थितः । प्रत्यग्रः अभिनवः वर्णस्य रागो रञ्जनं यत्र चित्रलेखायां तादृशीम् ।

(४) द्वितीया । ततस्ततः ।

(५) प्रथमा । उपचारानन्तरमेकासनोपविष्टेन भर्त्रा चित्रगतायाः देव्याः परिजनमध्यगतामासन्नपरिचारिकां दृष्ट्वा देवी पृष्टा ।

Digitized by Google

द्विती। किं त्ति। (१)

प्रथ। अपुव्वा दूअं दारिआ देवीए आसण्णा लिहिदा किंणामहेए त्ति। (२)

द्वितो। आकिदिविसेसे आअरो पदं करेदि। तदो तदो। (३)

प्रथ। तदो अवधीरिअवअणो भट्टा सङ्किदो देवीं पुणोवि अणुबन्धिदुं पउत्तो। तदो कुमारीए वसुलच्छीए आअक्खिदं अज्ज एसा मालविए त्ति। (४)

---

(१) द्वितीया। किमिति।

(२) प्रथमा। अपूर्वेयं दारिका देव्या आसन्ना लिखिता किंनामधेयेति।

(३) द्वितीया। आकृतिविशेषे आदरः पदं करोति। ततस्ततः। आदरो गौरवम् आकृतिविशेषे विशिष्टाकृतौ पदं स्थानं करोति विशिष्टाकृतिदर्शनादरो भवतीत्यर्थः।

(४) प्रथमा। ततोऽवधीरितवचनो भर्ता शङ्कितो देवीं पुनरप्यनुबन्धुं प्रवृत्तः। ततः कुमार्या वसुलक्ष्म्याख्यातम्। आर्य्य! एषा मालविकेति। अवधीरितं देव्या प्रत्युत्तरादानेन अवज्ञातं वचनं यस्य अतएव शङ्कितः शङ्का मद्वचनश्रवणेऽपि कथं नोत्तरं दत्तमित्यत्र केनचित् कारणेन भवितव्यं न वेत्याकारकः संशयो जातो यस्य तारकादित्वात् इतच्। निर्बन्धुमाप्रवृत्तिशयेन पुनः पुनः प्रष्टुमित्यर्थः। कुमार्यैत्युक्तिः देव्यारहस्योद्भेदने विवेकशून्यताद्योतनार्था तच्च उत्तरवाक्ये स्पष्टं दर्शयिष्यति।

Digitized by Google

द्विती । सङ्गितम् । सदिसं क्खु एदं बालभाअस्स । तदो अवरं कहेहि । (१)

प्रथ । किं अण्णं । संपदं मालविआ सविसेसं भट्टिणो दंसणपहादो रक्खीअदि । (२)

द्विती । हला अणुचिट्ठ अत्तणो णिओअं । अहं पि एदं अङ्गुलीअअं देवीए उवणइस्सं । (३) इति निष्क्रान्ता ।

प्रथ । परिक्रम्यावलोक्य च । एसो णट्टाआरिओ सङ्गीदसालादो णिग्गच्छदि । दाव से अत्ताणं दंसेमि । (४) इति परिक्रामति ।

प्रविश्य ।

गणदासः । कामं खलु सर्वस्यापि कुलविद्या बहुमता न पुनरस्माकं नाट्यं प्रति मिथ्या गौरवम् । कुतः । तथा हि

देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा ।

---

(१) द्वितीया । सदृशं खलु एतद् बालभावस्य । ततोऽपरं कथय ।

(२) प्रथमा । किमन्यत् । साम्प्रतं मालविका सविशेषं भर्तुर्दर्शनपथात् रक्ष्यते ।

(३) द्वितीया । हला अनुतिष्ठात्मनो नियोगम् । अहमप्येतदङ्गुलीयकं देव्यै उपनेष्यामि ।

(४) प्रथमा । एष नाट्याचार्यः संगीतशालातो निर्गच्छति तावदस्मात्मानं दर्शयामि ।

Digitized by Google

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ॥ (१)

वकुला । उपेत्य । अज्जे ! वन्दामि । (२)

गण । भद्रे ! चिरं जीव ।

वकुला । अज्जं देवी पुच्छदि । अवि उवदेसग्गहणे ण अदिकिलिस्सदि वो सिस्सा मालविएत्ति । (३)

गण । भद्रे ! विज्ञाप्यतां देवी परमनिपुणा मेधाविनी चेति किं बहुना ।

---

(१) सुनयः दृष्टं नाट्यं देवानां कान्तम् अभीष्टं सुन्दरञ्च चाक्षुषं चाक्षुषा ग्राह्यं चक्षुःप्रीतिकरं च तेन वास्तविकयज्ञादस्य विशेषः । क्रतुं यज्ञं सङ्कल्पञ्च आमनन्ति कथयन्ति एतद्दर्शने चक्षुषःप्रीतिकरी देवानामभीष्ट-यज्ञसङ्कल्पयोः प्राप्तिरित्यर्थः । उमया गौर्या कृतो व्यतिकरः सम्बन्धो यस्य तादृशे स्वाङ्गे हरगौरीरूपे देहे दृष्टं नाट्यं नर्त्तनादि द्विधा विभक्तम् स्त्रीपुंसयोर्नृत्ययोर्भेदात् हररूपार्द्धाङ्गेन पुंनर्त्तनं गौरीरूपार्द्धाङ्गेन च स्त्रीनर्त्तनं कृतमित्यर्थः । त्रयो गुणाः सत्त्वाद्यस्त्रिगुणाः ततः स्वार्थे-ष्यञ् । त्रैगुण्यं तस्मादुद्भवमपि लोकानां चरितमत्र नाट्ये नानारसं नवरसं तथा च त्रैगुण्योद्भवस्य नवरसकरत्वमाश्चर्य्यायेति भावः । यतो नानारसं ततः एकमपि नाट्यं बहुधा भिन्नरुचेः अनेकधा विभक्ताशयस्य जनस्य लोकस्य श्रेष्ठं समाराधनं सन्तोषहेतुसेवनमित्यर्थः ।

(२) वकुलावलिका । आर्य्ये ! वन्दे ।

(३) वकुलावलिका । आर्य्ये देवी पृच्छति, अप्युपदेशग्रहणे नाति-क्लिश्यति वः शिष्या मालविकेति ।

Digitized by Google

यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।
तत्तद्विशेषकरणात् प्रत्युपदिशतीव मे बाला ॥ (१)

वकुला । आत्मगतम् । अदिक्कमन्तीं विअ दूरावदीं पेक्खामि । प्रकाशम् । किदत्था दाणिं वो सिस्सा जस्सिं गुरुअणो एव्वं तुस्सदि । (२)

गण । भट्टे ! तद्विधानामसुलभलात् पृच्छामि । कुतो देव्या तत्पात्रमानीतम् ।

वकुला । अत्थि देवीए वस्सावरो भादा वीरसेनो णाम । सो भट्टिणा अन्तबालदुग्गे णम्मदातीरे ठाविदो । तेण शिप्पाहिआरे जोग्गा दूअं दारिएत्ति बहिणीए देवीए उवाअणं पेसिदा । (३)

---

(१) प्रयोगे अभिनये विषये भाविकं भावाय स्वकारादवस्थाविशेषाय क्विप् ठक् । तदनुगुणं यत् यत् मया तस्यै भाविकायै, उपदिश्यते बाला बाल्यावस्थापन्नापि वयसा चञ्चलेत्यर्थः । मे मह्यं तत्तत् भाविकं विशेषकरणात् मत्तोऽपि विलक्षणचेष्टादिकरणात् प्रत्युपदिशतीव प्रतिशिक्षयतीव । यो हि विशेषज्ञः, स शिक्षकः इति सम्प्रदायादिति भावः ।

(२) वकुलावलिका । अतिक्रामन्तीमिवेरावतीं प्रेक्षे । कृतार्थेदानीं वः शिष्या यस्यां गुरुजन एवं तुष्यति । दूरावतो ऽप्युरोविशेषः ।

(३) वकुलावलिका । अस्ति देव्या वर्षावरो भ्राता वीरसेनो नाम । स भर्त्रान्तपालदुर्गे नर्मदातीरे स्थापितः । तेन शिल्पाधिकारे योग्येयं दारिकेति भगिन्या देव्या उपायनं प्रेषिता । वर्षतोऽवरः तत्सुतः वैश्यागर्भजातत्वात् तस्यावरत्वम् ।

Digitized by Google

गण । स्वगतम् । आकृतिविशेषप्रत्ययादेनामनूनवस्तुकां (१) सम्भावयामि । प्रकाशम् । भट्टे ! मयापि यत्नस्त्रिना भवितव्यम् । यतः

पात्रविशेषे न्यस्तं गुणान्तरं व्रजति शिल्पमाधातुः ।
जलमिव समुद्रशुक्तौ मुक्ताफलतां पयोदस्य ॥ (२)

वकुला । अज्ज ! कहिं दाणिं वो सिस्सा । (३)

गण । इदानीमेव पञ्चाङ्गादिक(४)मभिनयमुपदिश्य मया विश्रम्यतामित्यभिहिता दीर्घिकावलोकनगवाक्षगता प्रवातमासेवमाना तिष्ठति ।

---

(१) आकृतौ रूपादौ यो विशेषो वैलक्षण्यं तस्य प्रत्ययात् तद्रूपविज्ञानात् एनाम् उक्तपूर्वां मालविकाम् अनूनमुत्तमं वस्तु कुलशीलादि यस्याः कप् । तथाविधां सम्भावयामि । इयं सत्कुलोत्पन्ना विशिष्टाकारादिसम्पत्तेरित्येवं तर्कयामीत्यर्थः ।

(२) पयोदस्य मेघस्य जलं समुद्रशुक्तौ न्यस्तमिति शेषः । मुक्ताफलतामिव आधातुः वप्तुः प्रकरणात् शिल्पकस्य शिल्पं पात्रे उत्तमभाजने न्यस्तं सत् गुणान्तरं विशेषगुणं व्रजति याति । बीजवप्तारमपेक्ष्य पात्रोत्कर्ष एव गुणविशेषे कारणमिति भावः ।

(३) वकुलावलिका । आर्य्ये कुतेदानीं वः शिष्या ।

(४) "चित्तावित्रभूकृत्तपादैरङ्गैश्चेष्टादिसाम्यतः । पात्राद्यवस्थाकरणं पञ्चाङ्गोऽभिनयो मत" इत्युक्तपञ्चाङ्गकम् आदिपदेन "भवेदभिनयोऽवस्थानुकारः स चतुर्विधः । आङ्गिको वाचिकश्चैवमाहार्यः सात्विकस्तथा" इत्युक्तचतुरङ्गकम् । अभिनयं पात्रादेः चित्तादिभिः साम्यकरणम् । प्रकृष्टो वातस्तमासेवमाना भजमाना ।

Digitized by Google

वकुला । तेण हि अणुजाणादु मं अज्जो जाव से अज्ज-परितोसणिवेदणेण उत्साहं वड्ढेमि । (१)

गच्छ । दृश्यतां सखी । अहमपि लब्धक्षणः (२) स्वगेहं गच्छामि ।

इति निष्क्रान्तौ ।

मिश्र(३)विष्कम्भकः ।

---

(१) वकुलावलिका । तेन ह्यनुजानातु मामार्यः । यावदस्या आर्य-परितोषनिवेदनेनोत्साहं वर्धयामि ।

(२) लब्धः प्राप्तः क्षणो येन प्राप्तावसर इत्यर्थः ।

(३) सङ्कीर्णः विष्कम्भकः नाटकाङ्गविशेषः मध्यनीचपात्रैर्वेदीदृय-गणदासैर्निर्वर्त्तितत्वात् । यथोक्तम् दर्पणे, "इत्तवर्त्तिप्रमाणानां कथां-शानां निदर्शकः । संक्षिप्तार्थस्तु विष्कम्भः आदावङ्कस्य दर्शितः ।" इति । "शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्य-प्रयोजितः" इति च ।

Digitized by Google

ततः प्रविश्यैकान्तस्थितपरिजनो मन्त्रिणा लेखहस्तेनान्वास्य-

(१) मानो राजा ।

राजा । अनुवाचितलेखसमाप्तं विलोक्य । वाहतक ! किं प्रति-पद्यते वैदर्भः ? ।

अमात्य । देव ! आत्मविनाशम् ।

राजा । निर्देशमिदानीं ज्ञातुमिच्छामि । (२)

अमा । इदमिदानीमनेन (३) प्रतिलिखितम् । पूज्येनाह-मादिष्टः (४) । पितृव्यपुत्रो भवतः कुमारो माधवसेनः प्रति-श्रुतसम्बन्धो ममोपान्तिकमुपसर्पन्नन्तरा त्वदीयेनान्तपालेनाव-स्कन्द्य गृहीतः स त्वया मदपेक्षया सकलत्वसोदर्य्यो मोचयि-

---

(१) अन्वास्यमानः पश्चादुपवेशनेन सेव्यमानः "अन्वासितमरुन्धत्ये"ति वत् अनुपूर्वकासतेः सकर्मकत्वम् ।

(२) निर्दिश्यते इति निर्देशः पणोऽभिसन्धिरिति यावत् ।

(३) अनेन वैदर्भेण (विदर्भनृपेण) इदम्, अनुपदं दर्शयिष्यमाणं प्रतिलिखितं प्रत्युत्तरत्वेन लिखितम् ।

(४) इदंपदाभिधेयमाह, पूज्येनेत्यादि । पूज्येन अग्निमित्रेण भव-तेत्यर्थः । भवतः वैदर्भस्य पितृव्यपुत्रः कुमारो युवराजो नाम्ना माधव-सेनः प्रतिश्रुतसम्बन्धः वैवाहिकसम्बन्धं प्रतिश्रुत्येत्यर्थः । मम अग्नि-मित्रस्य उपान्तिकं समीपं उपसर्पन् आगन्तुमारभमाणः अन्तरा गमन-पथमध्ये त्वदीयेन वैदर्भसम्बन्धिना अन्तस्य पर्यन्तस्य पालेन रक्षकेण अवस्कन्द्य अवरुध्य निगृहीत इति । सः माधवसेनः त्वया वैदर्भेण मद-पेक्षया ममाग्निमित्रस्यापेक्षया अनुरोधेन अन्यत् स्पष्टम् । इत्यन्तमग्नि-मित्रपत्रमनूदितम् ।

Digitized by Google

तत्र इति। (१) तत्र वो न विदितं यत्तुल्याभिजनेषु भूमिधरेषु राज्ञां वृत्तिः। अतोऽत्र मध्यस्थः पूज्यो भवितुमर्हति। सोदरा (२) पुनरस्य ग्रहणविप्लवे विनष्टा। तदन्वेषणाय यतिष्ये। अथ अवश्यमेव माधवसेनो मेऽग्नि पूज्येन मोचयितव्यः (३)। श्रूयतामभिसन्धिः।

आर्यसचिवं मुञ्चति यदि पूज्यः संयतं मम श्यालम्।
मोक्षा माधवसेनं ततोऽहमपि बन्धनात् सद्यः॥ (४)

राजा। सरोषम्। कथं कार्यविनिमयेन मयि व्यवहरत्य-

---

(१) तदनूद्य प्रत्युत्तरयति, तत्र व इति। तत्र तस्मिन् विषये वो युष्माकमग्निमित्रस्येत्यर्थः गौरवे बहुत्वम्। न विदितं यत् उक्तं तत् किं? तदाह यत् तुल्याभिजनेषु तुल्यवंशेषु भूमिधरेषु राजसु राज्ञां वृत्तिर्व्यवहारः। तथा च माधवसेनः अस्माकमेकान्वयजः तत्र ज्ञातिभिः सहवैरं विशेषतो दृपाणां भवत्येव अतः कारणात् अस्मिन् विषये पूज्योऽग्निमित्रो भवान् मध्यस्थः मध्ये उभयपक्षसाहाय्यस्याभावे स्थितः।

(२) सोदरेत्युक्तिः प्रकृतकथोपयोगिनी तत्राग्ये स्पष्टं भविष्यति।

(३) माध्यस्थ्यं विहाय माधवसेनपक्षपातित्वं कर्त्तव्यं चेत् तत्राह, अथेति। अथ माध्यस्थ्यं विहाय माधवसेन-पक्षपातित्वे मया वैदर्भेण हेतुकर्त्रा पूज्येन मान्येन भवताऽग्निमित्रेण प्रयोजककर्त्रा-माधवसेनोऽवश्यं मोचनीयस्तदा अयमभिसन्धिः अभिसुखः पणः उद्देश्यो वा।

(४) यदि पूज्यो भवान् संयतम् कृतःपूर्वं भवताग्निमित्रेण बद्धम् आर्यसचिवं श्रेष्ठामात्यं मम श्यालं मुञ्चति तदा माधवसेनमहं बन्धनात् सद्यो मोक्षा मोचनकर्त्ता स्यामित्यर्थः। मोक्षेति शीलार्थहृणन्तत्वात् न तद्योगे कर्मणि षष्ठी।

Digitized by Google

नात्मज्ञः। वाहतक! प्रकृत्यमित्रः (१) प्रतिकूलकारी च मे वैदर्भः। तद् (२) यातव्यपक्षे स्थितस्य पूर्वसङ्कल्पितसमुन्मूलनाय वीरसेनमुखं दण्डचक्रं(३)माज्ञापय।

अमा। यदाज्ञापयति देवः।

राजा। अथ वा किं भवान्मन्यते।

अमा। ज्ञास्यदृष्टमाह देवः।

अचिराधिष्ठितराज्यः शत्रुः प्रकृतिष्वरूढ़मूलत्वात्।
नवसंरोपणग्रथिलस्तरुरिव सुकरः समुद्धर्तुम्॥(४)

राजा। तेन ह्यवितथं तल्लकारवचनम्। दृढमेव निमित्तमादाय समुद्योज्यतां सेनापतिः।

अमा। तथा। इति निष्क्रान्तः।

परिजनो यथाव्यापारं राजानमभितः स्थितः।

प्रविश्य

विदू। आणत्तोम्हि तत्तभवदा रण्णा। गोदम! चिन्तेहि

---

(१) प्रकृत्यमित्रः प्रकृत्या स्वभावेन अमित्रः शत्रुः विषयानन्तरितराजत्वात्।

(२) यातव्यपक्षे युद्धार्थमभियास्यमानपक्षे शत्रुपक्षे इति यावत्।

(३) दण्ड्यते हरिरेभिर्दण्डाः सैन्यानि तेषां चक्रं समुदायम्।

(४) प्रकृतिषु प्रजादिषु अचिराधिष्ठितराज्यः अचिरप्राप्ताधिकारः अरूढ़मूलत्वात् अदृढ़मूलत्वात् नवसंरोपणग्रथिलः नवाधिरोहणेन शिथिलः स्रथमूलः समुद्धर्तुमुत्पाटयितुं नाशयितुं च सुकरः।

Digitized by Google

दाव उवाअं, जह मे अदिच्छादिट्ठपडिकिदी मालविआ पच्चक्खदंसणा होदि त्ति । मए अ तं तहा किदं दाव से णिवेदेमि । (१) इति परिक्रामति ।

राजा । विदूषकं दृष्ट्वा । अयमपरः कार्य्यान्तरसचिवोऽस्मानुपस्थितः ।

विदू । उपगम्य । वड्ढदु भवं । (२)

राजा । सस्मितम् । इत आस्यताम् ।

विदूषक उपविष्टः ।

राजा । कच्चिदुपायोपेयदर्शने (३) व्यापृतं ते प्रज्ञाचक्षुः ? ।

विदू । पओअसिद्धिं पुच्छ । (४)

राजा । कथमिव ।

---

(१) विदूषकः । आज्ञप्तोऽस्मि । तत्प्रभवता राज्ञा । गौतम ! चिन्तय तावदुपायं यथा मे यदृच्छादृष्टप्रतिकृतिर्मालविका प्रत्यक्षदर्शना भवतीति । मया च तत्तथा कृतं तावदस्य निवेदयामि । स०

(२) विदूषकः । वर्धतां भवान् । स०

(३) उपायेन हेतुविशेषेण उपेयस्य प्राप्यस्य प्रकरणादिह दृश्यस्येत्यर्थात् दर्शने साक्षात्कारणे, दृशेर्ण्यन्तात् ल्युट् । निमित्तार्थे सप्तमी । दर्शनायेत्यर्थः । ते तव प्रज्ञैव चक्षुः पदार्थपरिच्छेदकत्वात् बुद्धिरेवं व्यापृतं स्वविषयग्रहणाय समर्थं कञ्चित् ? मालविकाया मह्यं दर्शनाय उपायं किं ? चिन्तितानित्यर्थः ।

(४) विदूषकः । प्रयोगसिद्धिं पृच्छ । स० प्रयुज्यतेऽसौ इति प्रयोगः कर्म तस्य मालविकादर्शनरूपस्य सिद्धिं पृच्छ किमुपायचिन्तनपृच्छयेति भावः ।

Digitized by Google

विदू। कथं। एवं विज्ञ (१) इत्यामेडयति।

राजा। साधु वयस्य! निपुणमुपक्रान्तम्, इदानीं दुरधिगमसिद्धावप्यस्मिन्नारम्भे वयं त्वामंशंसामहे। (२) कुतः

सप्रतिबन्धं कार्यं प्रभुरधिगन्तुं सहायवानेव।
दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि॥ (३)

नेपथ्ये। अलमलं बहु विकत्थ (४)। राज्ञः समक्षमेवावयोरधरोत्तरयोर्व्यक्तिर्भविष्यति।

---

(१) विदूषकः। एवमिव। स० गाद्याचार्येण गणदासेन हरदत्तस्य विवादस्तत्याश्च शिष्यप्रयोगदर्शनात् तन्निर्णयेऽवहते गणदासेन स्वशिष्यया मालविकया अभिनयकरणसमये तस्याः प्रत्यक्षदर्शनं भविष्यति तच्चानुपदं दर्शयिष्यते।

(२) दुरभिगमा दुर्लभा सिद्धिर्यस्य तादृशेऽपि अस्मिन् मालविकासाक्षात्कार-निष्पादनरूपे आरभ्यते इति कर्मणि घञ्। कार्यं त्वामेव सहायमिति शेषः इदानीम् आशंसामहे सम्भावयामीत्यर्थः।

(३) सहायवानेव सप्रतिबन्धं बाधकबाध्यं कार्यं फलमधिगन्तुं प्राप्तुं प्रभुः समर्थो भवति नासहायवानित्यर्थः। व्यतिरेकेण सहकारिसमवधस्य कार्यहेतुत्वं समर्थयितुमाह, दृश्यमित्यादि। सचक्षुरपि चक्षुष्मानपि अनेन दृष्टिकारणसम्पत्तिर्दर्शिता। दीपेन आलोकहेतुपदार्थेन विना तमसि अन्धकारे अनेन दृष्टिप्रतिबन्धो दर्शितः। स्थितमिति शेषः। दृश्यं द्रष्टुं योग्यम् उद्भूतरूपवत् वस्तु द्रव्यं पश्यति। दर्शने च आलोकवान् दीपादिः सहकारी "न्द्धाति चक्षुःसंबन्धादालोकोद्भूतरूपयोः" इत्युक्तेः।

(४) नटानां पात्रवेशपरिग्रहादानं नेपथ्यम्। अलं विकत्थ विकत्थ-

Digitized by Google

राजा । आकर्ण्य । सखे ! तत्तुनीतिपादपस्य पुष्पमुद्भिन्नमिदम् ।

विदू । फलं पि देक्खिस्सदि । (१)

ततः प्रविशति कञ्चुकी ।

कञ्चु । देव ! अमात्यो विज्ञापयति अनुष्ठिता प्रभोराज्ञेति । एतौ पुनर्हरदत्तगणदासावुभावमिनयाचार्यौ परस्परजयैषिणौ त्वां द्रष्टुमुद्यतौ साक्षाद्भावाविव शरीरिणौ ।

राजा । प्रवेशय तौ ।

कञ्चु । यदाज्ञापयति देवः ।

इति निष्क्रम्य ताभ्यां सह प्रविष्टः ।

कञ्चु । इत इतो भवन्तौ ।

गण । राजानं विलोक्य । अहो दुरासदो राजमहिमा ।

न च न परिचितो न चाप्यत्यन्त
सकितमुपैमि तथापि पार्श्वमस्य ।
सलिलनिधिरिव प्रतिक्षणं मे
भवति स एव नवो नवोऽयमक्ष्णोः ॥ (२)

नेन (आत्मगुणाविष्करणेन) अलं तत्राध्यं नास्तीत्यर्थः । निषेधार्थकालंशब्दयोगे क्त्वप् ।

(१) विदूषकः । फलमपि द्रक्ष्यसि । स० .

(२) राजा न परिचित इति न किन्तु परिचित एव परिचितत्वाच्च न भयहेतुरित्यर्थात् अत्यन्तः उपोऽपि न, तेनापि न भयहेतुः । तथापि चकितं भीतं यथा तथा उपैमि उपसर्पामि अत्र भयहेतोरभावेऽपि भय-

Digitized by Google

हरदत्तः। महत्खलु पुरुषाकारमिदं ज्योतिः। तथा हि

द्वारे नियुक्तपुरुषानुमतप्रवेशः
सिंहासनान्तिकचरेण सहोपसर्पन्।
तेजोभिरस्य विनिवर्तितदृष्टिपातै
र्वीक्ष्याहते पुनरिव प्रतिवारितोऽस्मि॥ (१)

कञ्चु। एष देवः, उपसर्पतां भवन्तौ।

उभौ। उपैव। विजयतां देवः।

राजा। स्वागतं भवद्भ्याम् (२)। परिजनं विलोक्य। आसने तावदत्रभवतोः।

वर्णनात् विभावनालङ्कारः। न केवलं भयहेतुत्वमपि तु आश्चर्यत्वमपीत्याह, स एवेति सः दृष्टचर एव अयं प्रत्यक्षदृश्यो राजा सकलनिधिरिव प्रतिक्षणम् अक्ष्णोर्नेत्रयोर्विषये दर्शने इत्यर्थः। नवो नवः नवप्रकारः प्रकारे द्विर्वचनम्। भवति।

(१) द्वारे नियुक्तपुरुषेण द्वौवारिकेण नित्यापेक्षतयाऽसमस्तविशेषत्वेऽपि समासः। अनुमतः अभ्युपगतः प्रवेशो यस्य अनिवारित इत्यर्थः। सिंहासनान्तिकचरेण राजसन्निहित-परिचारकेण कञ्चुकिना सह अनेनाभयत्वं प्रीतिभाजनत्वञ्चोक्तम् उपसर्पन् अन्तिकं गच्छन् विनिवर्तितः दुःसहत्वात् निवारितः स्वस्मिन् दृष्टिपातो नेत्रविक्षेपो वैशाद्यैर्दुर्ग्रहैरित्यर्थः। अस्य राज्ञस्तेजोभिः शरीरकान्तिभिः प्रभावैर्वा पुनरपि प्रतिवारितः निवारितोऽस्मि। अनेन उपजीविनामपि दुरासदत्वोक्त्याऽन्येषां दुरासदत्वमर्थतो दर्शितमिति भावः।

(२) सुष्ठु सुखेन आगतमागमनं भवद्भ्यां भवतोरित्यर्थः। क्रियया यममैतीति सम्प्रदानता।

Digitized by Google

ततो परिजनोपनीतयोरासनयोरुपविष्टौ।

राजा। किमिदं ? शिष्योपदेशकाले युगपदाचार्य्याभ्यामत्रोपस्थानम्।

गच्च। देव! श्रूयताम्। मया सुतीर्थाद(१)भिनयविद्या सुशिक्षिता। दत्तप्रयोग(२)श्चास्मि देवेन, देव्या च परिगृहीतः।

राजा। वाढं जाने। ततः किम्।

गच्च। सोऽहममुना हरदत्तेन प्रधानपुरुषसमत्वम् "अयं न मे पादरजसापि तुल्य" इत्यधिक्षिप्तः।

हर। देव! अयमेव प्रथमं परिवादकरः। अत्रभवतः किल मम च समुद्रपल्वलयोरिवान्तरमिति। तदत्रभवानिमं मां च शास्त्रे प्रयोगे च विमृशतु। देव एव नौ विशेषज्ञः प्राश्निकः। (३)

विदू। समत्थं पडिच्छादम्। (४) got agreed!

गच्च। प्रथमः कल्पः। अवहितो देवः श्रोतुमर्हति।

---

(१) सुतीर्थात् सुन्दरस्थानात् विशिष्टाध्यापकात् "आख्यातोपयोगे" इत्यपादानता।

(२) देवेन दत्तः प्रयोगः प्रयोगाधिकारः नाट्याभिनयाधिकार इति यावत् यस्मै तादृशः देव्या च परिष्टहीतः आत्मपक्षीयत्वेनाभ्युपगतः।

(३) प्रश्नं वादिप्रतिवादिनौ प्रति विवादानुगतविषयशुद्धिं करोति ठक्। विवादनिर्णायकः।

(४) विदूषकः। समर्थं प्रतिज्ञातम्। स०

राजा। तिष्ठ तावत्। पक्षपातमत्र देवी मन्यते। तदस्याः पण्डितकौशिकीसहिताया: समक्षमेव न्याय्यो व्यवहारः। (१)

विदू। सुट्ठु भवं भणादि। (२)

आत्रेयौ। यद्देवाय रोचते।

राजा। गौतम! अमुं प्रस्तावं निवेद्य पण्डितकौशिक्या सार्धमाकूयतां देवी।

कञ्चु। यदाज्ञापयति देवः।

इति निष्क्रम्य सपरिव्राजिकया देव्या सह प्रविष्टः।

कञ्चु। इत इतो भवती।

धारि। परिव्राजिकां विलोक्य। भअवदि! हरदत्तस्स गणदासस्स अ संरम्भं कहं पेक्खसि। (३)

परिव्राजिका। अलं खपक्षावसादशङ्कया। न परिहीयते प्रतिवादिनो गणदासः।

धारि। जदवि एव्वं तहवि राअपरिग्गहो से पउत्तणं उवहरदि। (४)

---

(१) वादिप्रतिवादिनोः प्रतिज्ञोत्तरादिकारणानां सदसद्विचनेन जयपराजयसम्पादकः ऋषादीनामनुमित्याद्यात्मकः विचारापरपर्यायोव्यापारो व्यवहारः।

(२) विदूषकः। सुष्ठु भवान् भणति। स०

(३) धारिणी। भगवति! हरदत्तस्य गणदासस्य च संरम्भं कथं प्रेक्षसे। स०। उभयोर्मध्ये कस्य जयसद्भावयसि।

(४) धारिणी। यद्यप्येवं तथापि राजपरिग्रहोऽस्य प्रभुत्वसूप-

Digitized by Google

परि। अयि राज्ञीशब्दभाजनमात्मानमपि चिन्तयतु भवती। पश्य

अतिमात्रभास्वरत्वं पुष्यति भानोः परिग्रहादनलः।
अधिगच्छति महिमानं चन्द्रोऽपि निशापरिगृहीतः॥ (१)

विदू। अविहा अविहा। उवट्ठिदा देवी पीठमद्दिअं पण्डिदकोसिदं पुरोकरिअ तत्तभोदी धारिणी। (२)

राजा। पश्चात्येनां यैषा

करति। स० राज्ञां परिग्रहः स्वकीयत्वेन स्वीकारः अस्य प्रभुत्वं महिमानम् वर्द्धयति।

(१) राज्ञा स्वकीयत्वेनाङ्गीकारस्य महिमवर्द्धनत्वमिव भवदीय-परिग्रह-स्यापि तथात्वं दृष्टान्तेन समर्थयितुमाह, अतिमात्रभास्वरत्वमिति। भानोः सूर्यकिरणस्य परिग्रहात् रात्रौ स्वस्मिन् संक्रमात् अनलः भास्वरोऽ-तिमात्रभास्वरत्वं दिवातनवह्निमपेक्ष्य पुष्यति धारयति तथा चन्द्रोऽपि निशया परिगृहीतः सन्नन्यः दिवातनचन्द्रापेक्षयेत्यर्थात् महिमानं माहा-त्म्यम् अतिमात्रभास्वरत्वमधिगच्छति प्राप्नोति। अत्र भानुःपरिग्रहा-दङ्गुरिति क्वाचित्कः पाठः असङ्गततया उपेक्ष्यः। अङ्गुः परिग्रहाभावे सूर्यस्यैवाभावात् कुतो भास्वरत्वं स्यात् उत्तरवाक्ये तु चन्द्रस्य दिवापि सत्त्वात् माहात्म्याभावमात्रं निशाभावे दर्शितमिह तु न तत्सम्भव इति विवेच्यम्।

(२) विदूषकः। अविहा अविहा। उपस्थिता देवी पीठमर्दिकां (सहचारिणीम्) पण्डितकौशिकीं पुरस्कृत्य तत्प्रभवती धारिणी। स० अपि इत्यव्ययमाश्चर्ये द्विरुक्तिरादरद्योतनाय।

Digitized by Google

मङ्गलालङ्कृता भाति कौशिक्या यतिवेषया ।
त्रयी विग्रहवत्येव सममध्यात्मविद्यया ॥ (१)

परि० । उपेत्य । विजयतां देवः ।

राजा । भगवति ! अभिवादये ।

परि० ।

महासारप्रसवयोः सदृशच्छमयोर्द्वयोः ।
धारिणीभूतधारिण्योर्भव भर्ता शरच्छतम् ॥

धारि० । जेदु जेदु अज्जउत्तो । (२)

राजा । स्वागतं देव्यै । परिव्राजिकां विलोक्य । भगवति ! क्रियतामासनपरिग्रहः ।

सर्वे उपविशन्ति ।

राजा । भगवति ! अत्रभवतोर्हरदत्तगणदासयोः परस्परं विज्ञानसंघर्षिणोर्भगवत्या प्राश्निकपदमध्या[सनीयम्]सितव्यम् ।

परि० । सम्मितम् । अलमुपालम्भेन पक्षपाते सति ग्रामे रत्नपरीक्षा ? ।

राजा । नैतदेवम् । पण्डितकौशिकी खलु भगवती । पक्षपातिनावहं देवी च ।

---

(१) अध्यात्मविद्यया वेदान्तप्रतिपाद्यविद्यया ब्रह्मात्मैक्यज्ञानेन सम्यं त्रयी कर्म्मप्रतिपादकवेदत्रयमिव यतिवेषया कौशिक्या सह मङ्गलालङ्कृता मङ्गलेन धर्म्मेण मङ्गलार्थद्रव्यैश्चालङ्कृता भूषिता देवी स्वयं भाति प्रकाशते इत्यर्थः ।

(२) धारिणी । जयतु जयत्वार्यपुत्रः । स०

Digitized by Google

आचा । सम्यगाह देवः । मध्यस्था भगवती नौ गुणदोषतः परिच्छेत्तुमर्हति ।

राजा । तेन हि प्रस्तूयतां विवादः ।

परि । देव ! प्रयोगप्रधानं हि नाट्यशास्त्रम् किमत्र वाग्व्यवहारेण । कथं वा देवी मन्यते ।

देवी । जइ मं पुच्छसि तदा एदाणं विवादो एव्व ण मे रुच्चदि । (१)

मण । देवि ! न मां समानविद्यतया परिभवनीयमवगन्तु [मन्तु] मर्हसि ।

विदू । भो पेक्खामो उम्मरंभरिसंवादं किं मुधा वेदणदाणेण एदाणं । (२)

देवी । णं कलहप्पिओसि । (३)

विदू । मा एव्वं चण्डि ! अण्णोण्णकलहप्पियाणं मत्तहत्थिणं एक्कदरस्सिं अणिज्जिदे कुदो उवसमो । (४)

राजा । ननु स्वाङ्गसौष्ठवातिशयमुभयोर्दृष्टवती भगवती ।

---

(१) देवी । यदि मां पृच्छसि तदैतेषां विवाद एव न मे रोचते । स०

(२) विदूषकः । भो पश्याम उदरंभरिसंवादम् । किं मुधा वेतनदानेन एतयोः । स० । उदरम्भर्योः परार्थानुसन्धानमन्तरेण स्वार्थपरयोरेतयो संवादं जयपराजयलक्षणं व्यवहारम् ।

(३) देवी । ननु कलहप्रियोऽसि । स०

(४) विदूषकः । मैवं चण्डि ! अन्योन्यकलहप्रियाणां मत्तहस्तिनामेकतरस्मिन्ननिर्जिते कुत उपशमः । स०

Digitized by Google

परि। अथ किम्।

राजा। तदिदानीमतः परं किमाभ्यां प्रत्याययितव्यम्। (१)

परि। तदेव वक्तुकामास्मि।

शिष्टा क्रिया कस्यचिदात्मसंस्था-
संक्रान्तिरन्यस्य विशेषयुक्ता।
यस्योभयं साधु स शिल्पकानां
धुरि प्रतिष्ठापयितव्य एव॥ (२)

विदू। सुदं अज्जेहिं भग्गवदीए वअणं। एअं पिण्डितत्थो उवदेसदंसणादो णिण्णओत्ति। (३)

हर। परमभिमतं नः।

गण। देवि! एवं स्थितम्।

---

(१) एतयोरङ्गस्य नाट्याङ्गस्य सम्पादनाय सौष्ठवे सौन्दर्ये दृष्टे अपरं किमाभ्यां प्रत्यायितव्यं बोधयितव्यमित्यर्थः। प्रतिपूर्वादिणोऽयन्तात् तव्यः बोधार्थत्वात् न गम्यादेशः।

(२) कस्यचित् शिल्पकस्य आत्मसंस्था स्वनिष्ठा क्रिया अभिनयादि-व्यापारः शिष्टा विधिष्टा उत्तरत्र विशेषयुक्तेति दर्शनात् तथार्थत्वम् अन्यस्य कस्यचित् संक्रान्तिः स्वशिक्षिते शिष्ये क्रियासंक्रमः प्रतिफलनं विशेष-युक्ता विधिष्टा यस्य शिल्पकस्य उभयं स्वगता शिष्ये संक्रान्तिश्चेत्युभयम् एतयोर्द्वयं साधु शोभनं, स शिल्पकानां धुरि अग्रे स्थापयितव्यः सर्वशिल्प-कार्यगण्यत्वेन स्वीकार्य इत्यर्थः।

(३) विदूषकः। श्रुतमार्याभ्यां भगवत्या वचनम्। एष पिण्डितार्थः। उपदेशदर्शनादिति निर्णय इति। स० पिण्डितार्थः निष्कृष्टार्थः।

Digitized by Google

देवी। जदा उण मन्दमेधा सिस्सा उवदेसं मलिणेदि। तदाणं आआरिअस्स दोषो ?। (१)

राजा। देवि! एवमापद्यते। विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति। (२)

देवी। जणान्तिकम्। कहं दाणिं। गणदासं विलोक्य। प्रकाशम्। अलं अज्जउत्तस्स उस्साहकारणं मणोरहं परिपूरिअ। विरम णिरत्थादो आरम्भादो। (३)

विदू। सुट्टु भोदी भणादि। भो गणदास! सङ्गीदअपदोवलम्भिअसरस्सदउवाअणमोदअं खादमानस्स किं दे मुहणिग्गहेण विवादेण। (४)

---

(१) देवी। यदा पुनर्मन्दमेधा शिष्योपदेशं मलिनयति। तदानीम् आचार्यस्य दोषः ?। स० मलिनयति न गृह्णातीत्यर्थः।

(२) अद्रव्यस्य अवस्तुनः मन्दमतेरिति यावत्। परिग्रहः विनेयतया स्वीकारः कल्पितो भावो द्रव्यवत् प्रकाशते इत्युक्तेः परिगृहीतमद्रव्यमधिकारात् सुपात्रमित्यर्थः। विनेतुः शिष्यस्य बुद्धेः प्रतिभाया लाघवं सौन्दर्यं प्राखर्यमिति यावत्। प्रकाशयति उद्भावयति।

(३) देवी जनान्तिकम्। त्रिपताकं करं कृत्वेत्याद्युक्तलक्षणं सा० दि०। कथमिदानीम्। अलमार्य पुत्रस्योत्साहकारणं मनोरथं परिपूर्य। विरम विरमार्यादारम्भात्। स० उत्साहः अध्यवसायः औत्सुक्यञ्च तत्कारणं तद्वर्द्धकमार्य पुत्रस्य स्वामिनः मनोरथं पूरयित्वा अलम्। तत्पूरणसाध्यं नास्तीत्यर्थः। निषेधार्थकालंशब्दयोगे क्त्वप्।

(४) विदूषकः। सुष्ठु भवती भणति। भो गणदास! सङ्गीतकपदोप-

Digitized by Google

गण्ड। सत्यमयमेवार्थो देवीवाक्यस्य। श्रूयतामवसरप्राप्तमिदानीम्।

लब्धास्पदोऽस्मीति विवादभीरो-
स्तितिक्षमाणस्य परेण निन्दाम्।
यस्यागमः केवलजीविकायै
तं ज्ञानपण्यं वणिजं वदन्ति॥ (१)

दासी। अदूरोवणीदा दे सिस्सा। अपरिणिट्ठिदस्स उवदेसस्स उण अणज्जं आवेदणम्। (२)

लब्धसरस्वत्युपायनमोदकानि खादमानस्य किं ते सुखनिष्पेषेण विवादेन। स० सङ्गीतकपदेन सङ्गीतरूपलक्ष्येण उपलब्धानि नित्यानुशीलनेन अनुभूतानि सरस्वत्या उपायनभूतानि उपढौकनद्रव्याणीव मोदकानि खादमानस्य अक्षयतत्त्वं सुखनिष्पेषेण सुखनिरस्कारकारकेण विवादेन शुष्ककलहेन किम्। तदनुशीलयतत्त्वं दृष्टकलहे प्रवृत्तिरनुचितेत्यर्थः।

(१) अहं लब्धास्पदः प्राप्तप्रतिष्ठोऽस्मि इति हेतोः विवादभीरोः विवादे कदाचित् पराजयः स्यादित्याशङ्क्या ततो भीतस्य परकर्तृकां निन्दाम्। स्त्रीविहिताकारयोगे वा षष्ठीति कर्तरि तृतीया। तितिक्षमाणस्य सहमानस्य यस्य जनस्य केवलजीविकायै आत्मजीवनमात्रार्थम् आगमः शास्त्रज्ञानं लाभोपायश्च भवति। तं ज्ञानमेव पण्यं विक्रेयं यस्य तादृशं वणिजं जीविकाभङ्गभीरुतयाऽपकृष्टपण्डितमित्यर्थः। वदन्ति पण्डिताः मन्यन्ते।

(२) देवी। अचिरोपनीता ते शिष्या। अपरिनिष्ठितस्योपदेशस्य पुनरनार्यमावेदनम्। स० अचिरेण आशु उपनीता उपदेशग्रहणाय

Digitized by Google

गण्ड। अत एव मे निर्बन्धः।

देवी। तेन हि दुवेवि भअवदीए उवदेसं देमेह। (१)

परि। देवी नैतन्न्याय्यम्। सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय।

देवी। जनान्तिकम्। मूढे परिव्वाजिए मं जग्गंतिं पि सुत्तं विअ करेसि। (२) इति सास्रूयं परावर्तते।

राजा देवीं परिव्राजिकायै दर्शयति।

परि

अनिमित्तमिन्दुवदने! किमत्रभवतः पराङ्मुखी भवसि।
प्रभवन्त्योऽपि हि भर्तृषु कारणकोपाः कुटुम्बिन्यः॥ (३)

दीक्षिता ते शिष्या मालविका इत्यर्थः। अतोऽचिरोपनीतत्वेन न सम्यक् शिक्षितेति गम्यते अपरिनिष्ठितस्य स्वैर्यमप्राप्तस्य उपदेशस्य शिष्ये संक्रामणरूपव्यापारस्य आवेदनं ज्ञापनं प्रकृतेऽभिनयदर्शनेन सदसत्त्वबोधनम् अनार्यमनुचितमित्यर्थः। एतदुक्तिश्च राज्ञा मालविकायाः कथञ्चिदपि दर्शनं न भवत्वित्याशयेन गणदासस्य तदभिनयनिवारणार्थेति द्रष्टव्या। एवमुत्तरत्रापि।

(१) देवी। तेन हि द्वावपि भगवत्यै उपदेशं दर्शयतम्।

(२) देवी। मूढे! परिव्राजिके! मां जाग्रतीमपि सुप्तामिव करोषि। स० जाग्रतीं मालविकाया राजसमीपे निगूहनरूपे स्वकर्तव्ये अप्रमत्ताम्। सुप्तां प्रमत्तामिव। स०

(३) हे इन्दुवदने! प्रसन्नमुखि! अत्रभवतः मान्यात् राज्ञः सकाशात् किं कथम् अनिमित्तम्। पराङ्मुखी विमुखी भवसि। कुटुम्बिन्यः स्वकुलस्त्रियः भर्तृषु प्रभवन्त्यः प्रभुत्ववत्योऽपि कारणादेव कोपीयास्ताम्

Digitized by Google

विदू। णं सकारणं एव्व। अत्तणो पक्खो रक्खिदव्वो गणदासं विलोक्य। णं दिट्ठिआ कोवव्वाजेण देवीए परिचत्तादो भवम्। सुसिक्खिदोवि सव्वो उवदेसदंसणेण णिण्णादो होदि। (१)

गण। देवि श्रूयताम्। एवं जनो गृह्णाति। तदिदानीं

विवादे दर्शयिष्यामि क्रियासंक्रान्तिमात्मनः।
यदि मां नानुजानासि परित्यक्तोऽस्म्यहं त्वया॥ (२)

आसनादुत्थातुमिच्छति।

देवी। का गई। पभवदि आआरिअओ सिस्सजणस्स। (३)

गण। चिरमपदेशग्रङ्कितोऽस्मि (४)। राजानमवलोक्य।

ताडय्यो भवन्ति न सुधा। तथा च कारणाभावे किमिति तव राज्ञः पराङ्मुखत्वम्।

(१) विदूषकः। नन्वसकारणमेव। आत्मनः पक्षो रक्षितव्यः। नन्वु दिष्ट्या कोपव्याजेन देव्या परित्रातो भवान्। सुशिक्षितोऽपि सर्व उपदेशदर्शनेन निष्णातो भवति। स० निष्णातः निर्णीतः।

(२) आत्मनः क्रियायाः अभिनयव्यापारस्य संक्रान्तिं शिष्ये उपदेशद्वारा संक्रमं शिष्यगतमात्मगुणमिति यावत्। दर्शयिष्यामि राज्ञः समीपे प्रकाशयिष्यामि।

(३) देवी। का गतिः। प्रभवत्याचार्यकः शिष्यजनस्य। स०

(४) अपदेशो निराकृतिस्तत्राशङ्का जाता यस्य तारकादित्वात् इतच्। कदाचित् शिष्यशिक्षादर्शने निवारितो भवेयमिति शङ्का स्थिता सा च राज्ञा एतद्वचनेन दूरीकृतेत्यर्थः।

Digitized by Google

अनुज्ञातं देव्या तदाज्ञापयतु देवः । कस्मिन्नभिनयवस्तुन्युपदेशं दर्शयिष्यामि ।

राजा । यदादिशति भगवती ।

परि । किमपि देव्या मनसि वर्तते ततः शङ्कितास्मि ।

देवी । भण वीसद्धम् पभविस्सदि पभू अत्तणो परि अणस्स । (१)

राजा । मम चेति ब्रूहि ।

देवी । भअवदि भण दाणिम् । (२)

परि । देव शर्मिष्ठायाः कृतिं चतुष्पादोत्थं कलिकं दुष्प्रयोज्यमुदाहरन्ति तच्चैकार्थसंश्रयमुभयोः प्रयोगं पश्यामः । तावता ज्ञायत एवात्रभवतोरुपदेशान्तरम् । (३)

आचार्यौ । यदाज्ञापयति भगवती ।

विदू । तेण हि दुवेवि वस्सापेक्खागेहे संगीदरअणं करिअ

---

(१) देवी । भण विश्रब्धम् । प्रभविष्यति प्रभुरात्मनः परिजनस्य । सं०

(२) देवी । भगवति भणेदानीम् । सं०

(३) शर्मिष्ठायाः शुक्राचार्यस्य पत्न्याः कृतिम् कृदभिहितभावत्वात् कृतमित्यर्थः । चतुर्भ्यः पादेभ्य उत्पन्नति उत्थम् उत्तरपदवृद्धिः । चतुष्पदीयुक्तमित्यर्थः । कलिकं तन्नामधेयकं नाटकं दुष्प्रयोज्यं दुःखेन प्रयोक्तुमभिनेतुं योग्यमुदाहरन्ति कथयन्ति पण्डिता इति शेषः । उभयोर्भरदत्तगणदासयोः एकार्थः तद्रूप एकस्य उद्देश्यः संश्रयो यस्मिंस्तादृशं प्रयोगं क्रमेण उभयकर्तृकं तन्नाटकप्रयोगम् अभिनयं पश्यामः प्रार्थनायां लोट् ।

Digitized by Google

अत्तभवदो दूदं पेसध। अह वा मदङ्गसद्दोज्जेव्व णो उट्ठावदूस्सदि। (१)

हरदत्तः। तथा। इत्युत्तिष्ठति।

गणदासो धारिणीमवलोकयति।

देवी। गणदासं विलोक्य। जयी भोदु अज्जो। एं विजअब्भत्थिणी अहं अज्जस्स। (२)

आचार्यौ प्रस्थितौ।

परि। दूतस्तावत्।

आचार्यौ। परिक्रम्य। इमौ स्वः।

परि। निर्णयाधिकारे ब्रवीमि। (३) सर्वाङ्गसौष्ठवाभिव्यक्तये विगतनेपथ्ययोः पात्रयोः प्रवेशोऽस्तु।

उभौ। नेदमावयोरुपदेश्यम्। इति निष्क्रान्तौ।

---

(१) विदूषकः। तेन हि द्वावपि वर्णमेलाग्टहे संगीतरचनां कृत्वात्मभवतो दूतं प्रेषयतम्। अथ वा मदङ्गशब्द एव न उत्थापयिष्यति। वर्णस्य रूपान्तरस्यामेलाया उद्भावनाया मदङ्गं तत्र नेपथ्यस्थाने इत्यर्थः।

(२) देवी। जयी भवत्वार्यः। ननु विजयाभ्यर्थिन्यहमार्यस्य।

(३) निर्णयस्य युवयोः तारतम्यनिश्चयकरणस्याधिकारे स्थितेति शेषः। ब्रवीमि उपदिशामि। सर्वाङ्गसौष्ठवाभिव्यक्तये सर्वेषामङ्गानां सौष्ठवस्य सौन्दर्यस्याभिव्यक्तये प्रकाशनाय विगत-नेपथ्ययोः आहार्याभरणसज्जारहितयोः पात्रयोः अभिनेययोः नायकयोः प्रवेशः रङ्गभूमौ समागमोऽस्तु।

Digitized by Google

देवी । राजानमवलोक्य । जइ राअकज्जेसु वि ईरिसी णिउणदा अज्जउत्तस्स तदो सोहणं भोदि । (१)

राजा ।

अलमन्यथा गृहीत्वा न खलु मनस्विनि मया प्रयुक्तमिदम् ।
प्रायः समानविद्याः परस्परयशःपुरोभागाः ॥ (२)

नेपथ्ये मृदङ्गध्वनिः ।

सर्वे कर्णं ददति ।

परि । हन्त प्रवृत्तं संगीतकम् । तथा ह्येषा

जीमूतस्तनितविशङ्किभिर्भयूरै
रुद्वीवैरनुगमितस्य पुष्करस्य ।
निर्ह्रादिन्युपचि[हि]तमध्यमस्वरोत्था
मायूरी मदयति मार्जना मनांसि ॥ (३)

राजा । देवि ! तस्याः सामाजिका भवाम ।

---

(१) देवी । यदि राजकार्येषु अपीदृशी निपुणतार्यपुत्रस्य ततः शोभनं भवति । स०

(२) परस्परयशसि अन्योन्यकीर्त्तौ पुरोभागः दोषैकदर्शनं येषां तथा ।

(३) जीमूतस्तनितविशङ्किभिः मुरजध्वनौ मेघध्वनिशङ्किभिः अतएव उद्वीवैर्हर्षात् उल्लसितकन्धरैर्मयूरैः अनुगमितस्य अनुनादितस्य पुष्करस्य वाद्यभाण्डस्य प्रक्षते मुरजस्य निर्ह्रादिनी निर्ह्रादवती मधुरगम्भीरेत्यर्थः । उपचि[हि]तः मयूरस्वरानुनादनेन बद्धलीभूतः मध्यमस्वरः तन्नामधेयस्वरः तस्मात् उत्था उद्भवा मयूरस्येदम् अण् । मायूरी मयूरध्वनिसदृशी एषा [गद्योक्ता] मार्जना मूर्च्छना ताड़ना वा मनांसि मदयति हर्षयति ।

Digitized by Google

देवी। स्वगतम्। अहो अविणयो अज्जउत्तस्स। (१)

सर्वे उत्तिष्ठन्ति।

विदू। अपवार्य। भो धीरं गच्छ। तत्तभोदी धारिणी विसंवादइस्सदि। (२)

राजा।

धैर्यावलम्बिनमपि त्वरयति मां सुरजवाद्यरावोऽयम्।
अवतरतः सिद्धिपथं शब्दः स्वमनोरथस्येव॥ (३)

इति निष्क्रान्ताः सर्वे।

इति प्रथमोऽङ्कः।

---

(१) देवी। अहो अविनयः आर्यपुत्रस्य। स०। मत्प्रतीमे एव मदनिष्टदर्शनलालसारूपोऽनार्य व्यापारः अविनयः।

(२) विदूषकः। भो धीरं गच्छ। तत्तभवती धारिणी विसंवदिष्यति। स०। विसंवदिष्यति विप्रलप्स्यते अन्यथा मंस्यते।

(३) सिद्धेः निष्पत्तेः पन्थानं मार्गमवतरतः गच्छतः स्वस्य मन एव रथस्य शब्द इव अग्रे श्रूयमाणः सुरजवाद्यरावः स्वदृक्पथावाद्यध्वनिः धैर्यावलम्बिनमपि मां त्वरयति दर्शनाय त्वरितं करोति।

Digitized by Google

द्वितीयोऽङ्कः ।



ततः प्रविशति [संगीतशालायाम् अ०] रचनायां कृतायामासनस्थः

सवयस्यो राजा, धारिणी, परिव्राजिका,

विभवतश्च परिवारः ।

राजा । भगवति ! अत्रभवतोराचार्ययोः कतरस्य प्रथमम् [उपदेशो दृश्यताम्] [प्रयोगं द्रक्ष्यामः] ।

परि । ननु समानेऽपि ज्ञान[वृद्ध]भावे [वयोवृद्धत्वात्]वयोऽधिकत्वात् गणदासः पुरस्कारमर्हति ।

राजा । तेन हि मौद्गल्य ! [निगाद्यं अ०] एवमत्रभवतोरावेद्य नियोगमशून्यं कुरु ।

कञ्चु । यदाज्ञापयति देवः । इति निष्क्रान्तः ।

प्रविश्य ।

गणं । देव ! शर्मिष्ठायाः कृतिर्लयमध्या चतुष्पदास्ति । तस्यास्तु [चतुष्पद[वस्तुकम्]वर्णकम् अ०] कृलिकप्रयोगमेकमना देवः श्रोतुमर्हति ।

राजा । आचार्य ! बहुमानादवहितोऽस्मि [तत्प्रवेशयपात्रम्] अ० ।

निष्क्रान्तो गणदासः ।

Digitized by Google

राजा । जनान्तिकम् । वयस्य !

नेपथ्यगृहगतायाश्चक्षुर्दर्शनसमुत्सुकं तस्याः ।
संहर्तुमधीरतया व्यवसितमिव मे तिरस्करिणीम् ॥ (१)

विदू । अपवार्य । उवट्ठिदं णअणमहु [सण्णिहिदमक्खिअं च] [रसं जदिच्छं] ता अप्पमत्तो दाणिं पेक्ख । (२)

ततः प्रविश्यात्मानाचार्यावेक्ष्यमाणाऽऽसीना मालविका ।

विदू । जनान्तिकम् पेक्खदु भवम् । ण खु से पडिच्छन्दादोवि हीअदि महुरदा । (३)

राजा । अपवार्य । वयस्य !

चित्रगतायामस्यां कान्तिविसंवादशङ्कि मे हृदयम् ।
संप्रति शिथिलसमाधिं मन्ये येनेयमालिखिता ॥ (४)

---

(१) नेपथ्यगृहगतायाः सज्जागृहस्थितायास्तस्या मालविकायाः दर्शनसमुत्सुकं मे चक्षुः अधीरतया विलम्बासहिष्णुतया तिरस्करिणीं जवनिकां संहर्तुम् अपसारयितुमिव व्यवसितम् उद्युक्तम् ।

(२) विदूषकः । उपस्थितं नयनमधु सन्निहितमाक्षिकं तदप्रमत्त इदानीं प्रेक्षस्व । सं० । नयनस्य मधु इव पाठान्तरे नयनमधुरसं मधु इवाख्याद्यं यदृच्छम् यथेच्छम् ।

(३) विदूषकः । प्रेक्षतां भवान् । न खल्वस्याः प्रतिच्छन्दादपि हीयते मधुरता । सं० प्रतिच्छन्दात् परनियोगानुवर्तित्वादपि सौन्दर्यं न हीयते ।

(४) चित्रगतायामस्यां दृष्टायामिति शेषः । तद्दर्शनकाले मे हृदयं कान्तिविसंवादशङ्कि एतस्याः दृष्टयो कान्तिर्भवेद्वा नेति सन्देहयुक्तमासीदिति शेषः । सम्प्रति इदानीं साक्षात्कारसमये येन शिथिलेन इयं चित्र-

Digitized by Google

गच्छ। वत्से! मङ्गसाध्वसा सत्वस्था (१) भव।

राजा। स्वगतम्। अहो सर्वावस्थासुनवद्यता रूपस्य [विशेषस्य] तथा हि

दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः
संक्षिप्तं निविडोन्नतस्तनभरः पार्श्वे प्रसृष्टे इव।
मध्यः पाणिमितोऽमितश्च [नितम्बि] जघनं पादावराला ङ्गुली
कुन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः॥ (२)

गततया लिखिता तं श्लिष्टमित्यर्थात् श्लिष्टसमाधिम् अनिपुणलेख्य-सामग्रीकं मन्ये एतस्याः कान्तिलेखने या या सामग्री अपेक्षिता सा तस्य नासीदिति मन्ये इत्यर्थः।

(१) सत्त्वे स्वभावे प्रकृतौ वा तिष्ठति स्था-क अव्यया इति यावत्।

(२) वदनं मुखं शरदिन्दोरिव कान्तिरस्य प्रसन्नमित्यर्थः। दीर्घे अक्षिणी यस्य यच्छब्दसमासान्तः। दीर्घनेत्रश्च। बाहू अंसयोः स्कन्धप्रदेशे नतौ लम्बमानावित्यर्थः। उरः वक्षस्थलं यद्यपि दृढमिति शेषः। तथापि निविड़ौ घनौ उन्नतौ स्तनौ यत्र तथाभूतं सत् संक्षिप्तं सङ्कुचितमिवेत्यर्थात् उन्नतस्तनाभ्यां दृढतोऽपि अल्पीभावकरत्वात् तथाभूतमिति भावः। पार्श्वे कुक्षिभागौ प्रसृष्टे इव सङ्कुचितत्वात् तथोत्प्रेक्षा। मध्यः मध्यदेशः पाणिमितः पाण्युपलक्षणेन मुष्टिमितः। जघनं पुनरमितं दृढत् नितम्बि इति पाठे नितम्बयुक्तं पर्वतसानुयुक्तमिति च ध्वन्यते। पादौ अराला कुटिला अङ्गुलयो यत्र तादृशौ। नर्तयितुः इत्याचार्यस्य गणदासस्य मनसि यथा कुन्दः दृष्ट्वा यादृशाङ्गसौष्ठवे सति नर्तनं सुनिपुणं भवति, तथैवास्याः वपुः देहः श्लिष्टं संहतम् स्वतःसिद्धसौन्दर्यादिगुणकतया संवद्ध-मित्यर्थः।

Digitized by Google

माल । उपगानं (१) लब्धा चतुष्पदवस्तुकं गायति ।

दुल्लहो पिओ तस्सिं भव हिअअ ! निरासं
अम्हो अपङ्कओ मे फुरइ किंपि वामओ ।
एसो सो चिरदिट्ठो कहं उण दट्ठव्वो
णाह ! मं पराहीणं तुह गणअ सतिअम् ॥ (२)

---

(१) उपगानम् गानात् प्राक्कर्तव्यं वसन्तादिरागानुगतं स्वरविशेषम् [आलापचारि] इति ख्यातम् ।

(२) मालविका ।

दुर्लभः प्रियस्तस्मिन् भव हृदय ! निराशम्
अस्माकमपाङ्को मे स्फुरति किमपि वामकः ।
एष स चिरदृष्टः कथं पुनर्द्रष्टव्यो
नाथ ! मां पराधीनां त्वयि गणय सतृष्णाम् ॥ स०

प्रियः अभीष्टो. यतो दुर्लभः । हे हृदय ! चित्त ! अतस्तस्मिन् निराशम् आशारहितं भव दुर्लभस्याशास्यत्वानौचित्यात् ततो निवर्तस्वेत्यर्थः । अस्माकमित्यव्ययम् कर्मे एवमाशायाः वैकल्यसम्भावनायामपि ये मम वामकोऽपाङ्कः किमपि किञ्चित् स्फुरति स्त्रीणां वामाक्षिस्पन्दनं हि अभीष्टसमागमसूचकं तथा च पुनराशंसे प्रियसमागमो मे भावी । वामाक्षस्फुरणात् तथाशंसेति भावः । स चिरदृष्टः एषः सङ्कल्पेन सदा मनसि प्रत्यक्षायमाणः प्रियः कथं पुनः द्रष्टव्यः चक्षुषा साक्षात् कर्तव्यः एवमात्मनो दर्शनाभिलाषमभिधाय सङ्कल्पोपनीतं नाथं संबोध्याह हे नाथ ! अगतिकगते ! पराधीनाम् अवशां मां त्वयि त्वद्विषये सतृष्णां सानुरागां गणय मन्यस्व एतच्च पद्यं चतुष्पदवस्तुम् प्रस्तुतार्थानुगुणञ्च एतदेव द्वारीकृत्य मालविकया आत्मानुरागो रूपे दर्शितस्तस्मात्ये विदूषकवाक्ये स्फुटीभविष्यति । अत्र च चतसृषु पादेषु चतस्रोऽवस्था वैराग्यौत्सुक्य-सङ्कल्पात्मसमर्पणरूपा दर्शिताः ।

Digitized by Google

ततो यथारब्धमभिनयति ।

विदू । अपवार्य । भो वअस्स ! चदुप्पदवत्थअं दुवारीकरिअ तुए उवट्ठाविदो विअ अप्पा अत्तभोदीए । (१)

राजा । सखे ! एवमावयोर्हृदयम् । अनया खलु

जनमिममनुरक्तं विद्धि नाथेति ज्ञेये
वचनमभिनयन्त्या स्वाङ्गनिर्देशपूर्वम् ।
प्रणयगतिमदृष्ट्वा धारिणीसन्निकर्षा
दहमिव सुकुमारप्रार्थनाव्याजमुक्तः ॥ (२)

मालविका गीतान्ते निष्क्रान्तमारभ्य ।

विदू । भोदि चिट्ठ । किं पि वो विसुमरिदो तत्त कम्मभेदो । तं दाव पुच्छिस्सम् । (३)

---

(१) विदूषकः । भो वयस्य चतुष्पदावस्थाकं द्वारीकृत्य त्वयोपस्थापित इवात्मात्मभवन्तौ । स० । चत्वारि पदानि येन चतस्रः अवस्थाः वैराग्यौत्सुक्यसङ्कल्पात्मसमर्पणरूपा यत्र तादृशं पद्यं द्वारीकृत्य तत्पाठच्छलेन आत्मा उपस्थापितः उपहारव्याजेन दत्त इत्यर्थः । •

(२) हे नाथ ! इमं मादृशं जनमनुरक्तं त्वयीति ज्ञेयः । विद्धि-जानीहि इति ज्ञेये अभिनयन्त्या स्वाङ्गादिभावं दर्शयन्त्या अनया मालविकया धारिणीसन्निकर्षात् सपत्नीसमक्षत्वात् प्रणयगतिम् अदृष्ट्वा असम्भाव्य स्वाङ्गनिर्देशपूर्वं स्वाङ्गं निर्दिश्य इमामित्युच्चारणकाले इदंपदार्थतया स्वस्वाङ्गं निर्दिश्येत्यर्थः । सुकुमारप्रार्थनाव्याजं छलं यत्र तथाभूतं यथा तथा अहमिव उक्तः तद्वाक्यम् मालविकयैव तया प्रयुक्तमिवेत्यर्थः ।

(३) विदूषकः । भवति तिष्ठ । किमपि वो विस्मृतः कर्मभेदः । तं

Digitized by Google

गण। वत्से क्षणमात्रं स्थित्वोपदेशविधुरा यास्यसि।

मालविका स्थिता।

राजा। स्वगतम्। अहो सर्वावस्थासु चारुता शोभान्तरं पुष्यति। तथा हि

वामं संधिस्खलितवलयं न्यस्य हस्तं नितम्बे
क्षत्वा श्यामाविटपसदृशं सक्तमुक्तं द्वितीयम्।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नृत्यादस्याः स्थितमतितरां कान्तमृज्वायतार्धम्॥ (१)

देवी। णं गोदमवअणं पि अज्जो हिअए करेदि। (२)

गण। देवि मा मैवम्। देवप्रत्ययात् संभाव्यते सूक्ष्मदर्शिता गौतमस्य। पश्य

तावत्पश्यामि। स०। एतदुक्तिश्च मालविकायाः कियत्क्षणपर्यन्तं तत्र स्थापनाय व्याजमात्रार्था।

(१) सन्धौ संक्षेपस्थाने स्खलितं निसृतं वलयं यत्र तादृशं वामं हस्तं नितम्बे न्यस्य सक्ता सक्ता यस्मात् तादृशं द्वितीयं दक्षिणं हस्तं श्यामाविटपसदृशं श्यामलता-शाखातुल्यं कृत्वा पादाङ्गुष्ठेनालुलितं चालितं कुसुमं यत्र तादृशे कुट्टिमे पातिताक्षं दत्तनेत्रम् अस्याः ऋत्यात् अतितरां ऋजु सरलम् आयतार्द्धं दीर्घार्द्धं शरीरस्येत्यर्थात् कान्तं मत् स्थितम्। यद्वा पातितमक्षमक्षि नेत्रमेव आयतमर्द्धं यस्य तादृशं सत् कान्तं बभूवेत्यर्थः।

(२) देवी। ननु गौतमवचनमार्यो हृदये करोति।

Digitized by Google

मन्दोऽप्यमन्दतामेति संसर्गेण विपश्चितः ।
पङ्कच्छिदः फलस्येव निकषेणाविलं पयः ॥ (१)

विदूषकं विलोक्य । तच्छृणोमो विवक्षितमार्थस्य ।

विदू । गणदासं विलोक्य । कोसिदं दाव पुच्छ । पच्छा जो मए कम्मभेदो दिट्ठो तं भणिस्सम् । (२)

गण । भगवति! यथादृष्टमभिधीयतां गुणो वा दोषो वेति ।

परि । यथा दर्शितं सर्वमनवद्यम् । कुतः ।

अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमुपगतस्तन्मयत्वं रसेषु ।
शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं तुदति विषयाद्रागबन्धः स एव ॥ (३)

(१) पङ्कच्छिदः कतकवृक्षस्य निकषेण घर्षणेनाविलं पय इव मन्दोऽपि विपश्चितः संसर्गेण संवासादिना अमन्दतामेति ।

(२) विदूषकः । कौशिकीं तावत्पृच्छ । पश्चाद्यो मया कर्मभेदो दृष्टस्तं भणिष्यामि । स०

(३) अन्तर्हितवचनैः वचनमन्तरेणापि विक्षेपविशेषेण अन्तर्गतवचनैः अङ्गैः अर्थः अभिनेयपदार्थः सम्यक् सूचितः । पादन्यासः पादविक्षेपो लयं मानं तालसाम्यमिति यावत् । उपगतः रसेषु अभिनेयगतरसेषु तदाविर्भावव्यञ्जनाय तन्मयत्वम् तत्स्वरूपत्वमस्या इति शेषः । शाखायोनिः शाखातुल्यपाणिरेव योनिरुत्पत्तिसाधनं यस्य हस्ताश्रित इत्यर्थः । अभिनयः नटुः खलः । तद्विकल्पानुवृत्तौ तस्य अभिनेयनायकादेः विकल्पान्ते इति विकल्पाः देवादिचेष्टादयस्तेषामनुवृत्तौ अनुसरणे भावस्तद्गतोऽवस्थाभेदः स एव अभिनेयनायकादिगत एव रागबन्धः अनुराग-

Digitized by Google

गण्ड। देवः कथं मन्यते।

राजा। वयं स्वपक्षशिथिलाभिमानाः संवृत्ताः। (१)

गण्ड। अद्य नर्तयिताऽस्मि। (२)

उपदेशं विदुः शुद्धं सन्तस्तमुपदेशिनः।

श्यामायते न [यस्मासु] विद्वत्सु यः काञ्चनमिवाग्निषु॥ (३)

देवी। दिष्ट्या परिक्षाराधनेन आर्यो वर्धताम्। (४)

गण्ड। देवि! त्वत्परिग्रहोऽपि मे वृद्धिहेतुः। विदूषकं विलोक्य। गौतम! वदेदानीं यत्ते मनसि वर्तते।

विदू। पढमोवदेसदंसणे पढमं बम्हणपूजा कादव्वा। सा णं वो विसुमरिदा। (५)

सम्बन्धः विषयात् अन्यत्रादिति शेषः। भावं हृदयं तुदति आकर्षति विषयान्तरसंसर्गराहित्येन स्वप्रवणं करोतीत्यर्थः।

(१) स्वपक्षे हरदत्तरूपे आत्मीये जने शिथिलः मन्दीभूतः अभिमानो येषां तादृशाः गुणपक्षपातेन स्वपक्षे समादरशून्या इत्यर्थः। संवृत्ताः जाताः।

(२) अद्य इदानीं भवतामेतादृशवचनादिति शेषः। नर्तयित प्रयत्नवर्तकः अस्मि अहं संवृत्त इति वचनविपरिणामेनानुवर्तते।

(३) सन्तः साधवः आपक्षपातिन इति यावत्। उपदेशिनः शिक्षयितृन् उपदेशं शिक्षां शुद्धं दोषहीनं निर्मलञ्च विदुः य उपदेशः अग्निषु काञ्चनमिव विद्वत्सु पाठान्तरे बुधासु च न श्यामायते श्याम इवाचरति मलिनो न भवतीत्यर्थः।

(४) देवी। दिष्ट्या परीक्षाराधनेनार्यो वर्धताम्। स०

(५) विदूषकः। प्रथमोपदेशदर्शने प्रथमं ब्राह्मणपूजा कर्तव्या। सा खलु वो विस्मृता। स०

Digitized by Google

परि । अहो प्रयोगाभ्यन्तरः प्रश्नः ।

सर्वे प्रहसिताः । मालविकापि स्मितं करोति ।

राजा । स्वगतम् । उपात्तसारश्चक्षुषा मे स्वविषयः । (१)यद-नेन (२)

स्मयमानमायताक्ष्याः किंचिदभिव्यक्तदशनश्रीभि मुखम् ।
असमग्रलक्ष्यकेशरमुच्छ्वसदिव पङ्कजं दृष्टम् ॥ (३)

गणः । महाब्राह्मण ! न खलु प्रथमं नेपथ्यसवनमिदम् । (४) अन्यथा कथं त्वां दक्षिणीयं नार्चयिष्यामः ।

विदू । मए णाम सुक्खघणगज्जिदे अन्तरिक्खे जलपाणेण [जलपाणं इच्छदा] घादआइदम् । (५)

---

(१) स्वविषयः चक्षुषो विषयः मे मम चक्षुषा नेत्रेण उपात्तः गृहीतः सारो यस्य तथाभूतो जातः दृश्यसारं दृश्यश्चक्षुरिति भावः ।

(२) उक्तार्थे हेतुः यदिति यत् यस्मात् अनेन चक्षुषा तस्य च पद्मस्थे दृष्टमित्यन्वयः ।

(३) आयताक्ष्याः विशालनेत्रायाः मालविकायाः उच्छ्वसत् प्रकाश-मानम् असमग्रं यथा तथा लक्ष्यं केशरं यस्य तादृशं पङ्कजं पद्ममिव किंचिदभिव्यक्तेन दशनेन दन्तेन श्रीभि, स्मयमानम् ईषत् हसत् मुखं दृष्टम् ।

(४) नेपथ्यदर्शनमेव सवनमिदं न प्रथमम्, अपि तु चिराभ्यस्तमि-त्यर्थः । अन्यथा प्रथमनेपथ्यदर्शने इत्याशयः । दक्षिणामर्हति छ । दक्षिणीयं दक्षिणायोग्यं पूज्यमित्यर्थः ।

(५) विदूषकः । मया नाम शुष्कघनगर्जितेऽन्तरीक्षे जलपानेन घातकायितम् । स० पाठान्तरे [जलपानमिच्छता] स०

Digitized by Google

परि। एवमेव।

विदू। तेण हि पण्डिदपरितोसप्पत्तिआ णं मूढा जादी। जदि अत्तभोदीए शोहणं भणिदं तदो इदमं से पारितोसिअं पअच्छामि। इति राज्ञो हस्तात्कटकमाकर्षति। (१)

देवी। चिट्ठ गुणन्तरं अजाणन्ती किं णिमित्तं तुमं आहरणं देसि। (२)

विदू। परकेरंत्ति करिअ। (३)

देवी। आचार्यं विलोक्य। अज्ज! गणदास! णं दंसिदोवदेसा दे सिस्सा?। (४)

गण। वत्से! एहि गच्छाव इदानीम्।

सहाचार्येण निष्क्रान्ता मालविका।

विदू। जनान्तिकम्। एत्तिओ मे मदिविहवो भवन्तं सेविदुम्। (५)

---

(१) विदूषकः। तेन हि पण्डितपरितोषप्रत्यया ननु मूढा जातिः। यद्यत्वयाद्य शोभनं भणितं तत इदमस्यै पारितोषिकं प्रयच्छामि। स० जातिः अस्मादृशजनः मूढा स्वयमर्थपरिच्छेदासमर्था पण्डितपरितोष एव प्रत्ययो विशिष्टत्वे विश्वासो यस्यास्तादृशी स्वयं परिच्छेदासमर्था पण्डितपरितोषदर्शनेन निश्चयं करोतीति भावः।

(२) देवी। तिष्ठ गुणान्तरमजानन् किं निमित्तं त्वमाभरणं ददासि। स०

(३) विदूषकः। परकीयमिति कृत्वा। स० ददामीति शेषः।

(४) देवी। आर्य! गणदास! ननु दर्शितोपदेशा ते शिष्या?।

(५) विदूषकः। एतावान्मे मतिविभवो भवन्तं सेवितुम्।

Digitized by Google

राजा । अलमलं परिच्छेदेन । (१) अहं हि
भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव ।
द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करिणीम् ॥ (२)

विदू । जनान्तिकम् । साधु दरिद्दादुरो विअ वेज्जेण ओसहं उप्पादीअमाणं दुच्छसि । (३)

प्रविश्य हरदत्तः ।

हर । देव ! मदीयमिदानीं प्रयोगमवलोकयितुं प्रसादः क्रियताम् ।

राजा । स्वगतम् । अवसितो (४) मे दर्शनार्थः । दाक्षिण्य-(५) मवलम्ब्य प्रकाशम् । ननु पर्युत्सुका एव वयम् ।

हर । अनुगृहीतोऽस्मि ।

---

(१) परिच्छेदेन एतावानिति दृयत्ताकरणेनालम् ।

(२) तस्याः मालविकायास्तिरस्करिणीमन्तर्द्धानं जवनिकान्तःप्रवेशमिति यावत् । अक्ष्णोर्नेत्रयोर्भाग्यास्तमयं भाग्यविनाशमिव, हृदयस्य महोत्सवावसानम् आनन्दविरामभिव, धृतेः सन्तोषस्य द्वारपिधानं द्वारावरोधनमिव च मन्ये तस्या अदर्शने नेत्रं विफलमिव हृदयं निरानन्दमिव सन्तोषमाहृतमिव च मन्ये इत्याशयः ।

(३) विदूषकः । साधु दरिद्रातुर इव वैद्येनौषधमुत्पाद्यमानमिच्छसि । स० वैद्यकृतौषधस्य बहुव्ययसाध्यत्वात् दरिद्रातुरस्य च तत्सामर्थ्यात् ततो निवृत्तिः यथा स्यात् तत्तुल्यत्वमस्यासाध्यत्वात् ।

(४) अवसितः समाप्तः दर्शनार्थः दर्शनविषयः दृष्टव्यसारदर्शनात् ।

(५) दाक्षिण्यं सर्वेषु तुल्यरूपताम् ।

Digitized by Google

नेपथ्ये। जयतु जयतु देवः। उपारूढो मध्याह्नः। तथा हि

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां
सौधान्यत्यर्थतापाद्बलभिपरिचयद्वेषिपारावतानि।
विन्दूत्क्षेपात् पिपासुः परिसरति शिखी भ्रान्तिमद्वारियन्त्र
सर्वैरुष्णैः समग्रस्त्वमिव नृप! गुणैर्दीप्यते सप्तसप्तिः॥ (१)

विदू। अविहा अविहा। अम्हाणं भोअणवेला। अत्तभवदो उइदवेलादिक्कमेण चिकिच्छआ दोसं उदाहरन्ति। हरदत्त! किं भणासि। (२)

हर। अत्थि चान्यस्य वचनावकाशोऽत्र। (३)

राजा। हरदत्तमवलोक्य। तेन हि त्वदीयमुपदेशं श्रोतुमिच्छामः। विरम्यतां भवान्।

---

(१) हंसा दीर्घिकापद्मिनीनां वापीसरोजिनीनां दलच्छायासु मुकुलितनयनाः सन्तः आसते इति शेषः। सौधानि अत्यर्थतापात् रविकिरणात्यर्थसंसर्गजततापात् बलभिपरिचये बहुभ्यनुशीलने द्वेषिणः द्वेषयुक्ताः अनुरक्ताः पारावता यत्र तथाभूतानि। शिखी मयूरः पिपासुः सन् विन्दूत्क्षेपात् जलकणानामूत्क्षेपात् भ्रान्तिमत् भ्रमयुक्तां जलयन्त्रं धारायन्त्रं परिसरति गच्छति। हे नृप! सप्तसप्तिः सप्ताश्वः सूर्यः गुणैः समग्रः सम्पूर्णस्त्वमिव उष्णैः किरणैः समग्रः सन् दीप्यते भाति।

(२) विदूषकः। अपिहा अपिहा। अस्माकं भोजनवेला। अत्रभवत उचितवेलातिक्रमेण चिकित्सका दोषमुदाहरन्ति। हरदत्त! किं भणसि।

(३) अत्र मध्याह्नसमये अन्यस्य वचनस्यावकाशोऽस्तीति काकाभिप्रायः।

Digitized by Google

फर। यदाज्ञापयति देवः। इति निष्क्रान्तः।

देवी। णिव्वत्तेदु अज्जउत्तो मज्झण्हविहिम्। (१)

विदू। भोदी विसेसेण पाणभोअणं तुवरावेदु। (२)

परि। उपाध्याय। स्वस्ति भवते। इति देव्या सह निष्क्रान्ता।

विदू। भो ण केवलं रूवे सिप्पे वि अद्दुदीआ मालविआ। (३)

राजा। वयस्य!

अव्याजसुन्दरीं तां विज्ञानेन ललितेन योजयता।

उपकल्पितो विधात्रा बाणः कामस्य विषदिग्धः॥ (४)

किं बहुना चिन्तयितव्योऽस्मि ते।

विदू। भवदाबि अहं। दिढं विपणिकन्दू विअ मे हिअअब्भन्तरं ढक्कदि। (५)

राजा। एवमेव। भवानस्मदर्थे त्वरताम्।

विदू। गिहोदक्खिणोम्हि। किं तु मेहावलीरूढजोपहा विअ पराहीणदंसणा तत्तभोदी मालविआ। भवंपि सुणापरि

---

(१) देवी। निर्वर्तयत्वार्यपुत्रो मध्याह्नविधिम्।

(२) विदूषकः। भवती विशेषेण पानभोजनं त्वरयतु।

(३) विदूषकः। भो न केवलं रूपे शिल्पेऽप्यद्वितीया मालविका।

(४) अव्याजसुन्दरीम् अकपटमनोरमां ललितेन मनोहरेण विज्ञानेन शिल्पेन योजयता विधात्रा कामस्य विषदिग्धः विषाक्तः बाण इव उपकल्पितः।

(५) विदूषकः। भवतास्मदर्थम्। दृढं विपणिकन्दुरिव मे हृदयाभ्यन्तरं दह्यते। स० बुभुक्षयातीव पीड्यते इत्यर्थः।

Digitized by Google

चरो विअ णिद्धो आमिसलोलुवो भीरुओ अ। अच्चन्तादुरो विअ कज्जसिद्धिं पत्थन्तो मे रोअसि। (१)

राजा। कथमनातुरो भविष्यामि। यदा

सर्वान्तःपुरवनिताव्यापारं प्रति निवृत्तहृदयस्य।
सा वामलोचना मे स्नेहस्यैकायनीभूता॥ (२)

इति निष्क्रान्ताः सर्वे।

इति द्वितीयोऽङ्कः।

---

(१) विदूषकः। दृष्टोऽयमस्माभिः। किं तु मेघावलीकृष्णज्योत्स्नेव पराधीनदर्शना तत्रभवती मालविका। भवानपि शूनापरिचर इव दृष्ट आमिषलोलुपो भीरुकश्च। अत्यन्तातुर इव कार्यसिद्धिं प्रार्थयमानो मे रोचसे। इ०

(२) परिवृतसर्वान्तःपुरवनिताव्यापारस्य मे मनसः सैवाकायनीभूता एकालम्बनमभूत्।

Digitized by Google

तृतीयोऽङ्कः ।



ततः प्रविशति परिव्राजिकायाः परिचारिका समाहितिका ।

समा । आणत्तम्हि भअवदीए । समाहिदिए ! देवस्स उववणत्थं बीजपूरअं गेण्हिअ आअच्छेत्ति । ता दाव पमदवणपालिअं मऊरिअं अणेसामि । परिक्रम्यावलोक्य च । एसा तवणीआसोअं आलोअन्ती मऊरिआ चिट्ठदि । जाव णं संभावेमि । (१)

ततः प्रविशत्युद्यानपालिका ।

समा । उपसृत्य । आलि ! [अयि अ०] सुहो दे उज्जाणवणव्वावारो । (२)

मधु । अम्मो समाहिदिआ ? सहि ! सागदं दे । (३)

---

(१) समाहितिका । आज्ञप्ताऽस्मि भगवत्या । समाहितिके ! देवस्योपवनस्थं बीजपूरकं गृहीत्वागच्छेति । तत्तावत्प्रमदवनपालिकां मधुकरिकामन्विष्यामि । एषा तपनीयाशोकमवलोकयन्ती मधुकरिका तिष्ठति । यावदेनां संभावयामि । स०

(२) समाहितिका । आलि [अयि] सुखं ते उद्यानवनव्यापारः । स०

(३) मधुकरिका । अम्मो समाहितिका ? । सखि ! स्वागतं ते । स०

Digitized by Google

सभा। हला भअवदी आणवेदि। अरित्तपाणिणा अम्हारिसजणेण अत्तभवं [देवी] देक्खि दव्वो [व्वा] ता वीजपूरएण पेक्खेदुं [सुस्सूसइदुं] इच्छामि त्ति। (१)

मधु। णं संणिहिदं एव्व वीजपूरअं। कहेहि अण्णोण्णसंघस्सिदाणं णट्टाआरिआणम् उवदेसं देक्खिअ कदरो भअवदीए पसंसिदो। (२)

सभा। दुवे वि किल [खु] आगमिणो पओअणिउणा अ।

किं दु [शिल्पागुणविशेषेण उन्नमितो गणदासो] [दिल्पाए विसेसेण मालविकाए उण्णमितो उवदेसो गणदासस्स]। (३)

मधु। अह मालविआगअं कोलीणं किं [किरिअं] सुणीअदि। (४)

---

(१) समाकृतिका। हला भगवत्याज्ञापयति। अरिक्तपाणिनाऽस्मदादृशजनेनात्मभवान् द्रष्टव्यः [देवी द्रष्टव्या]। तद्वीजपूरकेण ~~प्रेक्षितुम्~~ [शुश्रूषयितुं] इच्छामीति। स०

(२) मधुकरिका। ननु संनिहितं वीजपूरकम्। कथय अन्योन्यसंघर्षिणां नाट्याचार्याणामुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसितः। स०

(३) समाकृतिका। द्वावपि किल [खलु] आगमिनौ प्रयोगनिपुणौ च। किं तु शिल्पागुणविशेषेणोन्नमितो गणदासः। पाठान्तरे दृश्यायाविशेषेण मालविकायाः उन्नमितः उपदेशो गणदासस्य। स०

(४) मधुकरिका। अथ मालविकागतं कौलीनं किं [कीदृशम्] श्रूयते। कौलीनं गुह्यव्यापारः।

Digitized by Google

सभा। वाहं किल [बलीयं अ०] तस्सिं साहिलासो भट्टा। केवलं देवीए धारिणीए चित्तं रक्खन्तो अत्तणो पज्जत्तणं ण दंसेदि। मालविआवि दूमेसु दिअसेसु अणुहूदमुच्छा विअ मालदीमाला मिलाअमाणा लक्खीअदि। अदो अवरं ण जाणे। विसज्जेहि मं। (१)

मधु। एदं साहावलम्बि वीजपूरअं गेण्ह। (२)

सभा। नाट्येन गृहीत्वा। हला तुमं वि इदो पेअलतरं साउ जणसुस्सूषाए फलं पावेहि। (३) इति प्रस्थिता।

मधु। सहि समं ज्जेव गच्छम्ह। अहं वि दूमस्स चिराअमाणकुसुमोग्गमस्स तवणीआसोअस्स दोहलणिमित्तं देवीए णिवेदेमि। (४)

---

(१) सभाहितिका। वाढं [बलीयः] किल तस्यां साभिलाषो भर्ता। केवलं देव्या धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं न दर्शयति। मालविकाप्येषु दिवसेष्वनुभूतमूर्च्छेव मालतीमाला म्लायमाना लक्ष्यते। अतोऽपरं न जाने। विसृज माम्। स०

(२) मधुकरिका। एतच्छाखावलम्बि बीजपूरकं गृहाण। स०

(३) सभाहितिका। हला त्वमपीतः श्रेयस्तरं साधुजनशुश्रूषया फलं प्राप्नुहि। स०

(४) मधुकरिका। सखि! समं गच्छावः। अहमप्यस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै निवेदयामि। दोहदस्य कुसुमप्रसवौषधभेदस्य निमित्तम् अपेक्षणीयतया निवेदयामि। अपेक्षणीयत्वे हेतुः चिरायमाणेत्यादि। स०

Digitized by Google

सखा । जुज्जदि, अहिआरो क्खु तुह । (१)

इति निष्क्रान्ते ।

प्रवेशकः । (२)

ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च ।

राजा । आत्मानं विलोक्य ।

शरीरं श्यामं स्यादसति दयितालिङ्गनसुखे
भवेत्साक्षं चक्षुः क्षणमपि न सा दृश्यत इति ।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय! परितापं व्रजसि किम् ॥(२)

---

(१) समाहितिका । युज्यते । अधिकारः खलु ते ।

(२) "प्रवेशकोऽल्पदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्विष्कम्भी यथा विष्कम्भके तथा ॥"

इत्युक्तलक्षणः अस्य च नीचपात्राभ्यां चेटीभ्यां प्रयोजितत्वात् द्वितीय तृतीयाङ्कद्वयमध्यगतत्वात् तत्तवर्त्तिप्रमाणानां कथांशानां विष्कम्भकलक्षणोक्तानां प्रदर्शकत्वाच्च तथात्वम् ।

(२) दयितालिङ्गनसुखे मालविकाया आलिङ्गनजनिते सुखे आनन्दे असति सति शरीरं श्यामं स्यात् सम्भावनायां लिङ् । शरीरश्यामता सम्भावितैवेत्यर्थः । अनेन सरजा क्षयंतावस्था सूचिता तथा च आलिङ्गनसुखविरहास्य क्षयतोचितैवेत्यर्थः । एवं क्षणमपि दृष्टिभूयत्वात् चक्षुषः साक्षत्वमाह भवेत् साक्षमिति । हे हृदय ! तया अनुभूतया सारङ्गाक्ष्या मृगनेत्रया कदाचिदपि न विरहितम् मनसस्तदेकायतनत्वात् न तच्छून्य-

Digitized by Google

विदू। अलं भवदो धीरदं उज्झिअ परिदेविदेण। दिट्ठा मए मालविआए पिअसही बउलावलिआ सुणाविदा अ अत्थं जो भवदा संदिट्ठो। (१)

राजा। ततः किमुक्तवती।

विदू। विण्णवेहि भट्टारअम्। अणुगिहीदम्हि दूमिणा णिओएण। किं तु सा तवस्सिणी देवीए अहिअअरं रक्खी-अमाणा रक्खिदाणं विअ णिहीणं सुहं समासादइदव्वा। तहवि जदिस्सं [घउदस्सं त्ति]। (२)

राजा। भगवन्! सङ्कल्पयोने! प्रतिबन्धवत्स्वपि विषयेष्व-भिनिवेश्य तथा प्रहरिष्यसि यथा जनोऽयं न कालान्तरक्षमो भवति! सविस्मयम्।

क्व रुजा हृदयप्रमाथिनी
क्व च ते विश्वसनीयमायुधम्।

त्वम्। अतः तत्प्रत्ययेन निर्वाणे निर्हेतौ सुखे इति यावत् प्रसक्ते सति किं वृथा परितापं व्रजसि अनुभवसि।

(१) विदूषकः। अलं भवती धीरतामुज्झित्वा परिदेवितेन। दृष्टा मया मालविकायाः प्रियसखी बकुलावलिका श्रावितो चार्थं यो भवता सन्दिष्टः।

(२) विदूषकः। विज्ञापय भट्टारकम्। अनुगृहीतास्मत्वेन नियो-गेन। किन्तु सा तपस्विनी देव्याधिकतरं रक्ष्यमाणा रक्षितानामिव निधीनां सुखं समासादयितव्या। तथापि यतिष्ये स०। अल्पोनषडनावेति योगः। पाठान्तरे षट्त्रिंशदपि इति। स०

Digitized by Google

मृदुतीक्ष्णतरं यदुच्यते
तदिदं मन्मथ! दृश्यते त्वयि ॥ (१)

विदू। णं भणामि तस्सिं साहणिज्जे कज्जे किदो मए उवाओ वक्खेवोत्ति। ता पज्जवत्थावेदु भवं अत्ताणं। (२)

राजा। अथेमं दिवसशेषमुचितव्यापारविमुखेन चेतसा क्व नु यापयामि।

विदू। अज्ज एव्व पढमावदारसुहआणि रत्तकुरवआणि उवाअणं पेसिअ णववसन्तावदारव्ववदेसेण इरावदीए णिउणिआमुहेण आचक्खिदो। इच्छेमि अज्जउत्तेण सह दोलाधिरोहणं अणुभविदुं त्ति। भवदावि संपदिणादम्। ता पमदवणं एव्व गच्छम्ह। (३)

---

(१) हृदयप्रमाथिनी हृदयनिष्पीड़िका रुजा रोगः क। ते तव विश्वसनीयम् कुसुममयत्वेन अपीड़ाकरत्वात् न विश्वासपात्रम् आयुधं शस्त्रं वाक। कुसुममयस्त्वेन भवता हृदयस्य पीड़नमतीवासम्भवमित्यर्थः। हे मन्मथ! लोके मृदु कोमलं सदेव तीक्ष्णतरम् अतितीक्ष्णं यत् उच्यते तदिदं त्वयि दृश्यते तव शस्त्रस्य कुसुममयत्वेन मृदुत्वात् तापकत्वाच्च तथात्वमिति भावः।

(२) विदूषकः। ननु भणामि तस्मिन् साधनीये कार्ये कृतो मयोपायोपक्षेप इति। तत्पर्यवस्थापयत्वत्वभवानात्मानम्। स०

(३) विदूषकः। अद्यैव प्रथमावतारसुभगानि रक्तकुरवकाण्युपायनं प्रेषय नववसन्तावतारव्यपदेशेनेरावत्या निपुणिकामुखेनाख्यातः। इच्छाम्यार्यपुत्रेण सह दोलाधिरोहणमनुभवितुमिति। भवतापि सम्प्रतिज्ञातं तत्प्रमदवनमेव गच्छाव। स०। सम्प्रतिज्ञातमङ्गीकृतम्।

Digitized by Google

राजा। न चर्मेदम्।

विदू। कहं विअ। (१)

राजा। वयस्य निसर्गनिपुणाः स्त्रियः। कथं मामन्य संक्रान्तहृदयमुपलालयन्तमपि ते सखी न लक्षयिष्यति। (२) अतः पश्यामि

उचितः प्रणयो वरं विहन्तुं
बहवः खण्डनहेतवो हि दृष्टाः।
उपचारविधिर्मनस्विनीनां
न तु पूर्वाभ्यधिकोऽपि भावशून्यः॥ (३)

विदू। णारिहदि भवं अन्तेउरट्ठिदं दक्खिणं एक्कपदे पिट्ठदोकादुम्। (४)

---

(१) विदूषकः। कथमिव।

(२) निसर्गेण स्वभावे न निपुणाः परचित्तज्ञानदक्षाः अन्यस्यां संक्रान्तं हृदयं यस्य हस्तिगतत्वात् अन्यासक्तस्य पुंवद्भावः। तादृशं माम् उपलालयन्तम् वाह्यव्यापारेण आनुकूल्यमाचरन्तम्। ते तव सखी इरावती लक्षयिष्यति। अतः पश्यामि वक्ष्यमाणश्लोकोक्तमर्थसद्भावयामि।

(३) तमेवार्थमाह, उचित इति। प्रणयः स्नेहः तदुक्तविषयानुष्ठानाभावेन विहन्तुं खण्डयितुं वरमुचितः। तत्र हेतुमाह। हि यतः खण्डनस्य अभिमतानुष्ठानरूपस्य प्रणयस्यखण्डनस्य हेतवः बहवोऽपि दृष्टाः कल्पयितुं शक्या इत्यर्थः। तु किन्तु पूर्वाभ्यधिकः पूर्वमभ्यधिकः प्रणयः। भावशून्यः सम्प्रति रागवर्जितः न वरमित्यनुषङ्गः अन्यासक्तचित्तत्वेन रागहीनत्वात् प्रणयोऽपि अकिञ्चित्कर इति भावः।

(४) विदूषकः। नार्हति भवानन्तःपुरस्थितम् दाक्षिण्यमेकपदे

Digitized by Google

राजा। विचिन्त्य। तेन हि प्रमदवनमार्गमादेशय।

विदू। इदो इदो भवम्। (१)

उभौ परिक्रामतः।

विदू। णं एदं पमदवणं पवणवलचलाहिं पल्लवङ्गुलीहिं तुअरावेदि विअ भवन्तं पविसिदुम्। (२)

राजा। स्मयं रूपयित्वा। अभिजातः खलु वसन्तः। सखे! पश्य

उन्मत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्याप्तो माधवेन॥ (३)

पृष्ठतः कर्तुम्। स०। अन्तःपुरस्थितं तद्विषयं दाक्षिण्यमानुकूल्यम् एकपदे सहसा पृष्ठतः कर्तुम् अपुरस्कर्तुं निराकर्तुमिति यावत् भवान् नार्हति।

(१) विदूषकः। इत इतो भवान्।

(२) विदूषकः नन्वेतत्प्रमदवनं पवनबलचलाभिः पल्लवाङ्गुलीभिस्त्वरयतीव भवन्तं प्रवेष्टुम्।

(३) श्रवणसुभगैः श्रुतिसुखदायकैः उन्मत्तानां कोकिलानां कूजितैः मनसिजरुजः कामवेदनायाः सह्यतां सोढुं योग्यतां सानुक्रोशं सदयं यथा यथा मामिति शेषः। पृच्छतेव माधवेन वसन्तेन चूतप्रसवसुरभिराम्रकुसुमसुगन्धिः दक्षिणो मलयाचलसन्निकृष्टः मारुतः मे अङ्गे सान्द्रस्पर्शः करतल इव व्याप्तः हस्तस्य करतलेन स्पर्शो लोकसिद्धो माधवेन मलयवायुनेवाकारीत्यर्थः।

Digitized by Google

विदू । पविस णिव्वुदिलाहाअ । (१)

उभौ प्रविशतः ।

विदू । अवधाणेण दिट्ठिं देहि । एदं खु भवन्तं विअ लोहदुकामाए पमदवणलच्छीए जुवदीवेसलज्जावअत्थिअं कुसुमणेवत्थं गहिदम् । (२)

राजा । ननु विस्मयादवलोकयामि ।

रक्ताशोकलताविशेषितगुणो बिम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरवकं श्यामावदातारुणम् ।
आक्रान्ता तिलकक्रियापि तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव सुखप्रसाधनविधौ श्रीर्माधवी योषिताम् ॥ (३)

---

(१) विदूषकः । प्रविश निर्वृतिलाभाय । स० ।

(२) विदूषकः । अवधानेन दृष्टिं देहि । एतत्खलु भवन्तमिव लोभयितुकामया प्रमदवनलक्ष्म्या युवतिवेशलज्जापयितृकं कुसुमनेपथ्यं गृहीतम् । स० । युवतीनां वेशस्य लज्जापयितृकम् लज्जाकारकम् ।

(३) माधवी मधुसम्बन्धिनी श्रीः शोभा योषितां सुखप्रसाधनविधौ सुखेन अप्रयत्नेन व्यापारसम्पादने सावज्ञेव जातेत्युत्प्रेक्षा कथमित्याह । बिम्बमेवाधरः बिम्बमधर इव इति वा तदुपयोगी अलक्तको यावकरसः रक्ताशोकलताविशेषितगुणः रक्तया शोकलतया विशेषितः तुलितः गुणो यस्य । तथाभूतः जातः रक्ताशोकलतयैव अधरयोग्योऽलक्तकरसो निष्पादित इत्यर्थः । श्यामावदातारुणं श्यामं कृष्णमवदातं शुभ्रम् अरुणं च । वर्णौ वर्णेनेति समासः । कृष्णश्वेतरक्तं कुरवकं तन्नामकपुष्पं प्रत्याख्यातविशेषकं तिरस्कृतं विशेषकं पत्रावल्यादिरचना येन तथाभूतं जातम् । लग्नद्विरेफा अञ्जनानीव यत्र ताडशैः तिलकैस्तत्पुष्पैः तिलकक्रिया आक्रान्ता

Digitized by Google

इत्युद्यानशोभां निरूपयतः।

प्रविष्टा पर्युत्सुका मालविका।

माल। अविण्णादहिअअं भट्टारअं अहिलसन्ती अत्तणोवि दाव लज्जेमि। कुदो विहवो सिणिद्धस्स सहीअणस्स वुत्तन्तं आचक्खिदुम्। ण आणे अपडिआरगुरुअं वेदणं कित्तिअं कालं मदणो मं णइस्सदि त्ति। कतिचित्पदानि गत्वा। कहिं णु पत्थिदम्हि। विचिन्त्य। आ संदिट्टं देवीए। मालविए! गोदमचावलादो दोलापरिब्भट्ठाए सरओ मह चलणा। [ण सक्कणोमि।] तुमं दाव तवणीआसोअस्स दोहलं णिवट्टेहि। जदो सो पञ्चरत्तब्भन्तरे कुसुमं दंसेदि तदो तुह। इत्यन्तरा निःश्वस्य। अहिलासपरद्दतिअं पसादं दावइस्सं त्ति। ता जाव णिओअभूमिं पत्तिमं गदा होमि। दाव अणुपदं मम चलणालंकारहत्थाए बउलावलिआए आअन्तव्वम्। ता दाव परिदेविस्सं विस्सद्धं मुहुत्तअं। (१) इति परिक्रामति।

अभिभूता तथा च अशोकलतया अधररागोपयोगी अलक्तकरसः, कुरबकेण विशेषकं, तिलपुष्पेण तिलकश्च तिरस्कृतमिति भावः।

(१) मालविका। अविज्ञातहृदयं भट्टारकमभिलषन्त्यात्मनोऽपि तावल्लज्जामि। कुतो विभवः स्निग्धस्य सखीजनस्य वृत्तान्तमाख्यातुम्। न जानेऽप्रतिकारगुरुकां वेदनां * कियत्कालं मदनो मां नेष्यतीति। कुत्र तु प्रस्थिताऽस्मि। आ संदिष्टाऽस्मि देव्या। गौतमचापलाद्दोलापरिभ्रष्टायाः सरओ मम चरणौ। न शक्नोमि † त्वं तावत्तपनीयाशोकस्य दोहदं निव-

Digitized by Google

विदू। दृष्ट्वा। ही ही एदं खु सीहुपाणुव्वेजिअस्स मच्छण्डिआ उवणदा। (१)

राजा। अये किमेतत्।

विदू। एसा णादिपरिक्किदवेसा उस्सुअवअणा एआ-दूणी मालविआ अदूरे [अहि अ०] वट्टदि। (२)

राजा। सहर्षम्। कथं मालविका।

विदू। अह दुम्। (३)

राजा। अक्यमिदानीं जीवितमवलम्बयितुम्।

त्वदुपलभ्य समीपगतां प्रियां
हृदयमुच्छ्वसितं मम विह्वलम्।

र्तय, यदि स पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति ततस्तुभ्यमभिलाषपूरयित्रकं प्रसादं दापयिष्यामीति। यावन्निर्योगभूमिं प्रथमं गता भवामि। तावदनुपदं मम चरणालङ्कारहस्तया बकुलावलिकया आगन्तव्यम्। तत्परिदेविषेऽ तावद्विश्रब्धं मुहूर्तकम् स०। यतः प्रतिकारशून्या अतो गुरुका असह्येत्यर्थः *। न शक्नोमि गन्तुमिति शेषः †।

(१) विदूषकः। आश्चर्यम् एतत्खलु सीधुपानोद्वेजितस्य मत्स्यखण्डकोपनता। स० मद्यपानविह्वलस्य यथा मत्स्यखण्डिका फाणितसुपकारकं तथा मदनातुरस्य तव खयसुपनता अतर्कितसुपस्थिता मालविका।

(२) विदूषकः। एषा नातिपरिष्कृतवेषोल्लुकवदना एकाकिनी मालविका अदूरे वर्तते। स० पाठान्तरे अभिवर्त्तते आभिमुख्येनागच्छति।

(३) विदूषकः। अथ किम्। स०

Digitized by Google

तरुवृतां पथिकस्य जलार्थिनः
सरितमारसितादिव सारसात्॥ (१)

क्व तत्रभवती।

विदू। एसा तरुराइमज्झादो णिक्कन्ता इदोज्जेव परिवट्टन्ती दीसदि। (२)

राजा। पश्यास्येनाम्।

विपुलं नितम्बदेशे मध्ये क्षामं समुन्नतं कुचयोः।
आयतं नयनयोर्मम जीवितमेतदायाति॥ (३)

सखे! पूर्वस्मादवस्थान्तरमुपारूढा तत्रभवती। तथा हि

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता॥ (४)

---

(१) आरसितात् शब्दायमानात् सारसात् तत्रभवतमाकर्ण्येत्यर्थः। तरुवृतां वृक्षच्छायाच्छन्नां सरितं नदीमिव त्वत् भवतः सकाशात् समीपगतां प्रियामुपलभ्य श्रुत्वा जलार्थिनो पिपासोः पथिकस्येव मम विक्लवं हृदयम् उच्छ्वसितम् हर्षेण स्फीतमित्यर्थः।

(२) विदूषकः। एषा तरुराजिमध्यान्निष्क्रान्ता इत एव परिवर्तमाना दृश्यते। स०

(३) नितम्बदेशे श्रोण्यां विपुलं स्थूलं, मध्ये क्षामं क्षीणं, कुचयोः समुन्नतमुत्तुङ्गम् नयनयोरायतम् एतत् मालविकावपूरूपं मम जीवितमायाति।

(४) माधवे वैशाखे परिणतं पक्वं पत्रं यस्याः तथाभूता कतिपयकुसुमा परिमितपुष्पा कुन्दलतेव परिमिताभरणा इयमाभाति।

Digitized by Google

विदू । एसावि भवं विअ मअणव्वाहिणा परिमिट्ठा भविस्सदि । (१)

राजा । सौहार्दमेवं पश्यति ।

माल । अअं सो ललिदसुउमारदोहलापेक्खी अगिहीदकुसुमणेवत्थो उक्कण्ठिदाए मह सोअं अणुकरेदि । जाव से पच्छाअसीअले सिलापट्टए णिमग्गा अत्ताणं विणोदेमि । (२)

विदू । सुदं भवदा उक्कण्ठिदम्हित्ति अत्तभोदी मन्तेदि । (३)

राजा । नैतावता भवन्तं प्रसन्नतर्कं मन्ये । कुतः ।

बोढ़ा कुरवकरजसां किसलयपुटभेदशीकरानुगतः ।
अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः ॥ (४)

मालविकोपविष्टा ।

राजा । सखे ! दूतस्तावदावां लतान्तरितौ भवावः ।

---

(१) विदूषकः । एषापि भवानिव मदनव्याधिना परिक्लिष्टा भविष्यति । स०

(२) मालविका । अयं सः ललितसुकुमारदोहदापेक्षी अगृहीतकुसुमनेपथ्य उत्कण्ठितायां मम शोकमनुकरोति । यावदस्य प्रच्छायशीतले निमग्ना आत्मानं विनोदयामि । स०

(३) विदूषकः । श्रुतं भवतोत्कण्ठिताक्षीत्यात्मभवती मन्त्रयते । स०

(४) कुरवकरजसां तत्पुष्पपरागाणां बोढ़ा वहनकर्त्ता तेन सुगन्धिरित्यर्थः । किसलयानां नवपल्लवानां पुटं भिनत्ति भिद्-अच् । तेन मन्दः । शीकरैः तोयबिन्दुभिरनुगतः तेन शीतलः पश्चात् कर्मधारयः । मलय-

Digitized by Google

विदू। दूरावदिं विअ अदूरे पेक्खामि। (१)

राजा। न हि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः। इति विलोकयन् स्थितः।

माल। हिअअ! णिरवलम्बणादो अदिभूमिसहिणो मणोरहादो विरम। किं मं आआसिअ। (२)

विदूषको राजानं वीक्षते।

राजा। पश्य महत्त्वं स्नेहस्य।

औत्सुक्यहेतुं विदृणोषि न त्वं
तत्त्वावबोधैकफलो न तर्कः।
तथापि रम्भोरु! करोमि लक्ष्य
मात्मानमेषां परिदेवितानाम्॥ (३)

वातः मलयपर्वतसंसर्गी अग्निः नास्ति निमित्तं यस्याः तादृशीमपि मनसः उत्कण्ठास्र अपिः भिन्नक्रमे अनिमित्तामपीत्यर्थः जनयति।

(१) विदूषकः। दूरावतीमिवादूरे प्रेक्षे। स० एतच्च राज्ञस्त्रासनार्थमुक्तम्।

(२) मालविका। हृदय! निरवलम्बनादतिभूमिसहिष्णो मनोरथाद्विरम। किं मामायास्र। स०

(३) हे रम्भोरु! प्रशस्तोरु! त्वम् औत्सुक्यस्र उत्कण्ठावाः हेतुम् कारणं न विदृणोषि न कथयसीत्यर्थः। तर्कोऽपि अनुमानविशेषोऽपि तत्त्वस्र वस्तुस्वाभाव्यस्र अवबोधः निश्चय एव एकं फलं यस्र तथाभूतो न भवति अभिचारादिसम्भवादिति भावः। अनुमानमात्रेण न वस्तुतत्त्वनिश्चयो भवतीत्यर्थः। तथापि आत्मानम् एषाम् त्वदुक्तानां परिदेवितानां विलापानां लक्ष्यम् उद्देश्यं करोमि कामः स्वतां पश्यतीति वत् भवदुक्तपरिपरिदेवनं मामुद्दिश्यैवेति तर्कयामीत्यर्थः।

Digitized by Google

विदू । सम्मदं भवदो [णिस्संसअं भवि] [संसअं हलि]-स्सदि । एसा अप्पिदमअणसंदेसा विवित्तेणं बउलावलिआ उवगदा । (१)

राजा । अपि स्मरेदस्मदभ्यर्थनाम् ? ।

विदू । किं दाणिं एसा दासीए दुहिदा दाव गरुअं संदेसं विसुमरेदि ? । (२)

प्रविश्य चरणालंकारहस्ता बकुलावलिका ।

बकुला । अवि सुहं महीए । (३)

माल । अम्मो बउलावलिआ उवट्ठिदा ? । सागदं दे, उवविस । (४)

बकुला । उपविश्य । हला तुमं दाणिं जोग्गदाए णिउत्ता । एक्कं दे चलणं उवणेहि जाव सालत्तअं सणेउरं करेमि । (५)

---

(१) विदूषकः । साध्वतं भवतः निःसंशयं भविष्यति । पाठान्तरे संशयं हरिष्यति । एषार्पितमदनसंदेशा विविक्ते ननु बकुलावलिकोपगता । सं० अर्पितः मया संप्रेषितः मदनविषयकः सन्देशः भवदुक्तिरूपो यया तादृशी ।

(२) विदूषकः । किमिदानीमेषा दास्या दुहिता तावद्गुरुकं संदेशं विस्मरति । सं०

(३) बकुलावलिका । अपि सुखं सख्यै । सं०

(४) मालविका । अहह बकुलावलिकोपस्थिता । स्वागतं ते । उपविश । सं०

(५) बकुलावलिका । हला त्वमिदानीं योग्यतया नियुक्ता । एकं ते चरणमुपनय यावदलक्तकं सनूपुरं करोमि ।

Digitized by Google

माल। स्वगतम्। हिअअ! अलं सुहिदाए। उवट्ठिदो अअं विहओ। कहं दाणिं अत्ताणं मोचेअम्। अह वा एदं एव्व मे मित्तमण्डणं भविस्सदि। (१)

बकुला। किं विआरेसि। उस्सुआ खु दुमस्स तवणी आसोअस्स कुसुमोग्गमे देवी। (२)

राजा। कथमशोकदोहलनिमित्तोऽयमारम्भः।

विदू। किं क्खु ण आणासि। अकारणादो देवी दुमं अन्तेउरणेवत्थेण जोजइस्सदि त्ति। (३)

माल। पादमुपहरति। हला मरिसेहि दाणिम्। (४)

बकुला। अइ सरीरंसि मे। (५) नाट्येन चरणासंस्कारमारभते।

राजा।

चरणान्तनिवेशितां प्रियायाः
सरसां पश्य वयस्य! रागलेखाम्।

---

(१) मालविका। हृदय! अलं सुखितया। उपस्थितोऽयं विभवः। कथमिदानीमात्मानं सङ्क्षेयम्। अथ वैतदेव मे चरणमण्डनं भविष्यति।

(२) बकुलावलिका। किं विचारयसि। उत्सुका खल्वस्य तपनीयाशोकस्य कुसुमोद्गमे देवी।

(३) विदूषकः। किं खलु न जानासि। अकारणाद् देवी द्रुमामन्तःपुरनेपथ्येन योजयिष्यतीति। स०

(४) मालविका। हला मर्षयेदानीम्। स०

(५) बकुलावलिका। अयि शरीरमसि मे। स०

Digitized by Google

प्रथमामिव पल्लवप्रसूतिं
हरदग्धस्य मनोभवद्रुमस्य ॥ (१)

विदू । चलणाणुरूवो तत्तभोदीए अहिआरो उवक्खित्तो । (२)

राजा । सम्यगाह भवान् ।

नवकिंसलयरागेणार्द्रपादेन बाला-
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन ।
अकुसुमितमशोकं दोहदापेक्षया वा
प्रणमितशिरसं वा कान्तमार्द्रापराधम् ॥ (३)

विदू । पारद्दस्सवि तत्तभोदीए अवरद्धुं ? । (४)

राजा । मूर्ध्ना प्रतिगृहीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य ।

---

(१) हे वयस्य ! सखे ! प्रियायाः चरणान्तनिवेशितां सरसाम् आर्द्रां रागलेखां स्फुरदग्धस्य शिवकोभानलभस्मीभूतस्य मनोभवद्रुमस्य कामरूपतरोः प्रथमां पल्लवप्रसूतिमिव पश्य ।

(२) विदूषकः । चरणानुरूपस्तत्तभवत्या अधिकारः उपक्षिप्तः । स०

(३) बाला नायिका अनेन प्रत्यक्षदृश्येन नवकिसलयरागेण नवपल्लवताम्रेण स्फुरितनखरुचा प्रकाशितनखकान्तिना आर्द्रपादेन अलक्तकरसार्द्रचरणेन दोहदापेक्षया, कुसुमोद्गमार्थमौषधप्रदानानुरोधेन अकुसुमितमपुष्पितम् अशोकम्, आर्द्रापराधं प्रत्यक्षतापराधम् अभिनवापराधं वा प्रणतशिरसं नतमूर्द्धानं कान्तं प्रियञ्च एतौ द्वौ हन्तुं ताडयितुमर्हति ।

(४) विदूषकः । पारयिष्यसि तत्तभवत्यामपराद्धुम् ? । स०

Digitized by Google

ततः प्रविशति युक्तमदा इरावती चेटी च।

इरा। हञ्जे णिउणिए! सुणामि बहुसो मदो किल इत्थि-आअणस्स विसेसमण्डणं त्ति। अवि सच्चो अअं। [एसो] लोअवादो। (१)

निपु। पढमं लोअवादो एव्व सम्पदं सच्चो संवुत्तो। (२)

इरा। अलं मए सिणेहेण। कहेहि कुदो दाणिं अवगमिदव्वं दोलाघरं पढमागदो भट्टा ण वेत्ति। (३)

निपु। भट्टिणीए अखण्डिदादो पणआदो। (४)

इरा। अलं सेवाए। मज्झत्थदं परिगहिअ भणाहि। (५)

निपु। णं वसन्तोसवुवाअणलोलुवेण अज्जगोदमेण कहिअं। तुअरदु भट्टिणी। (६)

---

(१) इरावती। सखि! निपुणिके! शृणोमि बहुशो मदः किल स्त्रीजनस्य विशेषमण्डनमिति। अपि सत्य एषः [अयं] लोकवादः। स०

(२) निपुणिका। प्रथमं लोकवाद एव साम्प्रतं सत्यः संवृत्तः। स०

(३) इरावती। मयि स्नेहेनालम्। कथय कुत इदानीमवगन्तव्यं दोलागृहं प्रथममागतो भर्ता न वेति। स०)

(४) निपुणिका। भट्टिन्याः अखण्डितात् प्रणयात्। स० आगत इति शेषः।

(५) इरावती। अलं सेवया। मध्यस्थतां परिगृह्य भण। स० सेवया परितोषार्थवाक्येन।

(६) निपुणिका। नन्वु वसन्तोत्सवोपायनलोलुपेनार्यगौतमेन कथि-

Digitized by Google

इरा। अवस्थासदृशं परिक्रम्य। हञ्जे मदेण गिलाअमाणं अत्ताणं अज्जउत्तस्स दंसणे हिअअं तुअरावेदि चलणा उण ण ओसलन्ति। [ओलगन्ति] (१)

निपु। णं संपत्तम्ह दोलाघरअं। (२)

इरा। णिउणिए! अज्जउत्तो एत्थ ण दीसदि। (३)

निपु। णं भट्टिणी आलोएदु। परिहासणिमित्तं कहिंपि गूढेण भट्टिणा होदव्वं। अम्हेवि इमं पिअङ्गुलदापरिक्खित्तं असोअसिलापट्टअं पविसामो। (४)

इरा। तहा। (५)

निपु। विलोक्य। आलोअदु भट्टिणी चूदङ्कुरं विचिणन्तीणं अम्हाणं पिपीलिआहिं दंसिदं। (६)

तम्। त्वरतां भट्टिनी। स० वसन्तोत्सवे यदुपायनदत्तं भोज्यादि तत्र लुब्धेनेत्यर्थः।

(१) इरावती। सखि! मदेन ग्लायमानमात्मानमार्यपुत्रस्य दर्शने हृदयं त्वरयति, चरणौ पुनः न प्रसरतः पाठान्तरे [अवलगतः]। स० संलग्नौ सन्नौ निश्चेष्टौ जातावित्यर्थः।

(२) निपुणिका। नन्वु संप्राप्ते स्वो दोलाग्टहकम्। स०

(३) इरावती। निपुणिके! आर्यपुत्रः अत्र न दृश्यते।

(४) निपुणिका। नन्वु भट्टिन्यवलोकयतु। परिहासनिमित्तं कुत्रापि गूढेन भर्त्रा भवितव्यम्। आवामपीदं प्रियङ्गुलतापरिक्षिप्तमशोकशिला-पट्टकं प्रविशावः।

(५) इरावती। तथा। स० अस्तु इति शेषः।

(६) निपुणिका। आलोकतां भट्टिणी चूताङ्कुरं विचिन्वत्योरावयोः

Digitized by Google

इरा। किं विअ एदं ?। (१)

निपु। एसा असोअपादवच्छाआए मालविआए बउलावलिआ चलणालंकारं णिवत्तेदि। (२)

इरा। अहो रूपविला। अभूमी दुअं मालविआए। कहं एत्थ तक्केसि। (३)

निपु। तक्केमि दोलापरिब्भंसिदसरूअचलणाए देवीए असोअदोहलाधिआरे मालविआ णिउत्तेत्ति। अण्णहा कहं देवी सअंधारिदं एदं णेउरजुअलं परिअणस्स अब्भणुजाणिस्सदि। (४)

इरा। महदी मे संभावणा। (५)

निपु। किं ण अणेसीअदि भट्टा। (६)

पिपीलिकाभिर्दष्टम्। स० दृशेर्ष धातोर्भावेक्तः दंशनं कृतमित्यर्थः। भाविसापत्नभियैवमुक्तम्।

(१) इरावती। किमिवैतत्?।

(२) निपुणिका। एषाशोकपादपच्छायायां मालविकाया बकुलावलिका चरणालङ्कारं निर्वर्तयति। स०

(३) इरावती। अभूमिरियं मालविकायाः। कथमत्र तर्कयसि। स०

(४) निपुणिका। तर्कयामि दोलापरिभ्रष्ट-सरूजचरणया देव्या [धारिण्या] अशोकदोहदाधिकारे मालविका नियुक्तेति। अन्यथा कथं देवी स्वयंधारितमेतत् नूपुरयुगलं परिजनस्याभ्यनुज्ञास्यति। स०

(५) इरावती। महती मे सम्भावना। स० महती उत्कटकोटिका मे ममेति कर्तरि षष्ठी।

(६) निपुणिका। किं नान्विष्यते भर्ता?। स०

Digitized by Google

दूरा। हञ्जे मे चलणा अग्गदो ण पवट्ठन्ति। मदो मं विआरेदि। आसङ्कितस्स दाव अन्तं गमिस्सं।

मालविकां निरूप्यात्मगतम्। ठाणे खु कादरं मे हिअअं। (१)

बकुला। चरणं दर्शयति। किंवि? रोअदि दे रागरेहाविण्णासो। (२)

माल। अत्तणो चलणंत्ति लज्जेमि णं पसंसिदुं। केण? सिप्पसाहणकलाए एव्वं अभिणीदासि। (३)

बकुला। एत्थ खु भट्टिणो सिप्पम्हि। (४)

विदू। तुवरेहि दाणिं गुरुदक्खिणाए। (५)

माल। दिट्ठिआ ण गव्विदासि?। (६)

---

(१) दूरावती। सखि! मम चरणावग्रतो न प्रवर्त्तेताम्। मदो मां विकारयति। आशङ्कितस्य तावदन्तं गमिष्यामि। स्थाने खलु कातरं मे हृदयम्। सं० मालविकादर्शने भर्तुस्यामनुरागः स्याच्च वेत्यादिशङ्कितं तस्य अन्तं परिच्छेदं तन्निवारकं निश्चयमित्यर्थः।

(२) बकुलावलिका। किमपि? रोचते ते रागरेखाविन्यासः। सं०

(३) मालविका। आत्मनश्चरणमिति लज्जाम्येतत्प्रशंसितुम्। केन? शिल्पसाधनकलायामेवमभिनीतासि। सं०

(४) बकुलावलिका। अत्र खलु भर्तुः शिल्पाग्रे। सं०

(५) विदूषकः। त्वरयस्वेदानीं गुरुदक्षिणायै। सं० गुरुदक्षिणां दातुं बकुलावलिकां त्वरयस्व त्वरितां कुरु तद्दक्षिणा च पूजते मालविकाया भवत्कृताभ्यर्थनैव।

(६) मालविका। दिष्ट्या न गर्वितासि?।

Digitized by Google

बकुला। उवदेसाणुरूवे चलणे लम्भिअ दाणिं गव्विदा भविस्सं। रागं विलोक्यात्मगतम्। हन्न सिद्धो मे दप्पो। प्रकाशम्। सहि एक्कस्स अवसिदो रामणिक्खेवो। केवलं मुहमारुदो लम्भदव्वो। अह वा पवादं एव्व एदं ठाणं। (१)

राजा। सखे पश्य पश्य।

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन शोषयतः।
प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे॥ (२)

विदू। कुदो दे अणुसओ?। एदं भवदा चिरक्कमेण अणुभविदव्वं। (३)

बकुला। सहि अरुणं सदपत्तं विअ सोहदि दे चलणं। सव्वहा भट्ठिणो अङ्कपरिवट्टिणी होहि। (४)

---

(१) बकुलावलिका। उपदेशानुरूपे चरणे लब्ध्वा इदानीं गर्विता भविष्यामि। हन्त सिद्धो मे दर्पः। सखि! एकस्य ते चरणस्यावसितो रागनिक्षेपः। केवलं मुखमारुतो लम्भयितव्यः। अथ वा प्रवातमेवैतत्स्थानम्। स०

(२) आर्द्रालक्तकम् आर्द्रयावकरसयुक्तं अस्याः मालविकायाः चरणं मुखमारुतेन फुत्कारेण शोषयतः अनार्द्रं कुर्वतो मे मम सेवावकाशः सेवासमयः प्रथमतरः सम्प्रति प्रतिपन्नः समुचित इत्यर्थः।

(३) विदूषकः। कुतस्तेऽनुशयः?। एतद्भवता चिरक्रमेणानुभवितव्यम्। स०

(४) बकुलावलिका। सखि! अरुणं शतपत्रमिव शोभते ते चरणम्। सर्वथा भर्तुरङ्कपरिवर्तिनी भव। स०

Digitized by Google

इरावती निपुणिकामवेक्षते ।

राजा । ममेयमाशीः ।

माल । हला मा अविणीअं मन्तेहि । (१)

बकुला । मन्तिदव्वं एव्व मए मन्तिदं । (२)

माल । पिआ क्खु अहं तव । (३)

बकुला । ण केवलं मम । (४)

माल । कस्स ? वा अणस्स । (५)

बकुला । गुणेसु अहिणिवेसिणो भट्टिणोवि । (६)

माल । अलिअं मन्तेसि । एदं एव्व मइ णत्थि । (७)

बकुला । सच्चं तुइ णत्थि । भट्टिणो किसेसु सुन्दरपाण्डुरेसु दीसइ अङ्गेसु । (८)

---

(१) मालविका । हला मा अविनीतं मन्त्रयस्व । सं०

(२) बकुलावलिका । मन्त्रयितव्यमेव मया मन्त्रितम् । सं०

(३) मालविका । प्रिया ! खल्वहं तव । सं०

(४) बकुलावलिका । न केवलं मम । सं०

(५) मालविका । कस्य वान्यस्य ? । सं०

(६) बकुलावलिका । गुणेष्वभिनिवेशिनो भर्तुरपि ।

(७) मालविका । अलीकं मन्त्रयसे । एतदेव मयि नास्ति । सं० गुण एव मयि नास्ति कुतस्तत्प्रियतेत्यर्थः ।

(८) बकुलावलिका । सत्यं त्वयि नास्ति । भर्तुः कृशेषु सुन्दरपाण्डुरेषु दृश्यतेऽङ्गेषु । सं० तत्कृशतादर्शनेन त्वय्नुरागोऽनुमीयत इत्यर्थः ।

Digitized by Google

निपु। पढमं गणिदं विअ हदासाए उत्तरं। (१)

बकुला। अणुराओ अणुराएण परिक्खिदव्वोत्ति सुअणवअणं पमाणं करेहि। (२)

माल। किं अत्तणो छन्देण मन्तेसि?। (३)

बकुला। ण हि ण हि। भट्टिणो खु एदाणि पणअमिदुआणि अक्खराणि विम्हेरिदाणि। (४)

माल। हला देवीं चिन्तिअ ण मे हिअअं विस्सवदि। (५)

बकुला। मुद्धे! भमरसंबाधो अत्थि त्ति वसन्तावदारसंभूदो किं? ण णवचूदप्पसवो ओदंसणिज्जो। (६)

---

(१) निपुणिका। प्रथमं गणितमिव हताशाया उत्तरम्। सं० गणितशास्त्रमिव प्रथमं भाविवस्तुज्ञापकम्।

(२) बकुलावलिका। अनुरागोऽनुरागेण परीक्षितव्य इति सुजनवचनं प्रमाणं कुरु।

(३) मालविका। किमात्मनः छन्देन मन्त्रयसे?। सं० छन्देन इच्छया।

(४) बकुलावलिका। न हि न हि। भर्तुः खल्वेतानि प्रणयमृदुकान्यक्षराणि विप्रेरितानि। सं० एतानीतीत्यनेन गौतमद्वारा प्रोक्तानि यानि तानि श्रावितानि कविना तु तानि न निबद्धानि गुह्यतायै तथात्वे एव चमत्कारापादकत्वात्।

(५) मालविका। हला देवीं चिन्तयित्वा न मे हृदयं विश्वसिति।

(६) बकुलावलिका। मुग्धे! भ्रमरसंबाधोऽस्तीति किं न वसन्तावतारसंभूतः नवचूतप्रसवोऽवतंसनीयः?। सं० प्रतिबन्धकसत्त्वेऽपि दृष्टेऽवश्यं प्रवृत्तिरिति भावः।

Digitized by Google

माल । तुमं जाव दुज्जादे गच्छन्तस्स सहाइणी होहि । (१)

बकुला । विमहूसुरही बउलावलिआ कदु अहं । (२)

राजा । साधु बकुलावलिके ! साधु

भावज्ञानानन्तरं प्रस्तुतेन
प्रत्याख्याने दत्तयुक्तोत्तरेण ।
वाक्येनेयं स्थापिता स्वे निदेशे
स्थाने प्राणाः कामिनो दूत्यधीनाः ॥ (३)

---

(१) मालविका । त्वं यावत् दुर्यातं गच्छतः सहायिनी भव । सं० दुर्यातं दुरधिगमे स्थाने दुश्चेष्टिते वा गच्छतः जनस्य सहायिनी सहकारिणी त्वं भव न ममेत्यर्थात् ।

(२) बकुलावलिका । विमर्दसुरभी बकुलावलिका खल्वहम् । सं० विगतो मर्दो मर्दनं पुरुषसम्बन्धः यस्यास्तथाभूता अतएव सुरभिः ख्यातिसम्पन्ना बकुलावलिकेत्यात्मनामकीर्तनेन बकुलावल्या यथा मर्दनाभावेऽपि स्वतःसिद्धसुगन्धित्वं तथा ममापीत्युक्तम् । दुश्चरिते नाहं सहायिनी तच्चरितस्यादुष्टत्वा न तत्र सहायभवने मे दोष इत्याशयः ।

(३) भावज्ञानानन्तरं भावस्य अस्या अनुरागस्य ज्ञानानन्तरं प्रस्तुतेन कृतप्रसङ्गेन प्रत्याख्याने तया निराकरणे कृते सतीति शेषः । दत्तयुक्तोत्तरेण दत्तं युक्तमुचितम् उत्तरं येन ताडशेन वाक्येन स्वे स्वकीये मदर्थार्थनाप्रदर्शनरूपे निदेशे तत्प्रतिपालनरूपे इयं मालविका स्थापिता भवत्येति शेषः । कामिनो जनस्य प्राणाः दूत्यधीना दूतीवशीभूता यत् तत् स्थाने अतीव युक्तमित्यर्थः ।

Digitized by Google

इरा। हञ्जे पेक्ख कारिदं एव्व बउलावलिए एदस्मिं पदं मालविआए। (१)

निपु। भट्टिणि! णिव्विआरस्स अधिआरस्स उद्दोव-देसो। (२)

इरा। ठाणे खु सङ्किदं मे हिअअं। गिहीदत्था अणन्तरं चिन्तइस्सं। (३)

बकुला। एसो [दुदिओ] वि दे संवुत्तपरिकम्मो चलणो जाव णं [उभे] वि सणेउरं करेमि। नाट्येन नूपुरयुगलमाधुन्व्य। हला उट्ठेहि अणुचिट्ठ देवीए असोअस्स विआसत्तिअं णिओअं। (४)

उभे उत्तिष्ठतः।

इरा। सुदो देवीए णिओओत्ति। भोदु दाणिम्। (५)

---

(१) इरावती। सखि! प्रेक्षस्व कारितमेव बकुलावलिकयैतस्मिन् पदं मालविकायाः। एतस्मिन् स्वनियोगप्रतिपालने पदं व्यवसितमुद्यमः कारितमित्यर्थः।

(२) निपुणिका। भर्तृनि! निर्विकारस्याधिकारस्योचितोपदेशः। स०

(३) इरावती। स्थाने खलु शङ्कितं मे हृदयम्। गृहीतार्थोऽनन्तरं चिन्तयिष्यामि। स० यत् शङ्कितं तत् स्थाने उचितमित्यर्थः।

(४) बकुलावलिका। एषोऽपि [द्वितीयः] ते संवृत्तपरिकर्मा चरणः। यावत् एनम् [उभयम्] अपि सनूपुरं करोमि। हला उत्तिष्ठानुतिष्ठ देव्या अशोकस्य विकाशयितृकं नियोगम्। स० विकाशयितृकं प्रकाशनारूपम्।

(५) इरावती। श्रुतो देव्या नियोग इति। भवत्विदानीम्। स०

Digitized by Google

बकुला। एसो उवारूढरागो उवभोगक्खमो पुरदो दे चिट्ठदि। (१)

माल। सहर्षम्। किं भट्टा? (२)

बकुला। सस्मितम्। ण दाव भट्टा। असोअसाहावलम्बी गुच्छओ ओदंसेहि दाव णं। (३)

मालविका विषादं नाटयति।

विदू। किं सुदं भवदा?। (४)

राजा। सखे! पर्य्याप्तमेतावता कामिनाम्।

अनातुरोत्कण्ठितयोः प्रसिध्यता
समागमेनापि रतिर्न मां प्रति।
परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशोऽपि समानुरागयोः॥ (५)

---

(१) बकुलावलिका। एष उपारूढरागः उपभोगक्षमः पुरतस्ते तिष्ठति। स० उपारूढोजाताङ्कुरो रागोऽनुरागो रक्तिमा च यस्य। उपभोगे यथेष्टभोगे क्षमः समर्थः।

(२) मालविका। किं भर्त्ता?। स० स्वाभीष्टस्य अग्निमित्रस्य स्वविषयानुरागवत्त्वेन उपभोगक्षमत्वेन च पुरतः स्थितिमाशङ्क्य तथा प्रश्नः।

(३) बकुलावलिका। न तावद्भर्त्ता। अशोकशाखावलम्बी गुच्छकः अवतंसय तावदेनम्। स० गुच्छकस्यापि तथात्वेन तस्य च पुरतः स्थितिरित्यभिसन्धाय मया तथोक्तं न भर्त्तारमभिसन्धायेत्युत्तराशयः।

(४) विदूषकः। किं श्रुतं भवता?।

(५) एतावता एतादृशश्रवणेनैव कामिनाम् अभीष्टमिति शेषः। पर्य्याप्तं सम्पूर्णम् कथं तत्राह। एकस्य अनातुरस्य अपरस्य च उत्-

Digitized by Google

मालविका । रचितपल्लवावतंसा सखीजनमशोकाय पादं प्रहिष्यति ।

राजा । वयस्य !

आदाय कर्णकिसलयमस्मादियमत्र चरणमर्पयति ।
उभयोः सदृशविनिमयादात्मानं वञ्चितं मन्ये ॥ (१)

माल । वामो क्खु एसो असोओ जो व्वङ्गअं पमाणीकदुअ कुसुमुग्गमं ण दंसेदि अवि णाम अम्हाणं सम्भावना सफला हवे ? । (२)

बकुला । हला णत्थि दे दोसो अअं जेव्व णिग्गुणो असोओ कुसुमुग्गमसमत्थो हवे जो दे चलणसक्कारं लभिदः । (३)

कथितस्य एतयोर्विषमानुरागयोः नायकनायिकयोः प्रसिध्यता कथञ्चित् निष्पद्यमानेनापि समागमेन माद्यति मदये न वरम्, किन्तु समानुरागयो स्तयोः परस्परप्राप्तिनिराशयोः सतोः शरीरनाशोऽपि देहवियोगोऽपि वरम् । तथा च एतस्या मय्यनुरागवत्त्वात् समागमाभावे मम देहत्यागोभ्यभीष्टः मत्वस्या मय्यनुरागे समागम इति भावः ।

(१) अस्मात् अशोकात् कर्णकिसलयं कर्णभूषणार्थनवपल्लवम् आदाय गृहीत्वा अत्र अशोके इयं चरणमर्पयति । आत्मानम् उभयोः कर्णभूषणचरणार्पणयोः सदृशविनिमयात् तुल्यरूपपरिवर्त्तेन वञ्चितमुभयभावशून्यत्वेन प्रतारितं मन्ये ।

(२) मालविका । वामः खलु एष अशोको यो व्यङ्गकं प्रमाणीकृत्य कुसुमोद्गमं न दर्शयति । अपि नामावयोः सम्भावना सफला भवेत् ? । स० सम्भावना उद्योगः ।

(३) बकुलावलिका । हला नास्ति । ते दोषः । अयमेव निर्गुणोऽशोको यदि कुसुमोद्गमसमर्थो भवेत्तव चरणसत्कारं लभितः ।

Digitized by Google

राजा ।

अनेन तनुमध्यया मुखरनूपुराराविणा
नवाम्बुरुहकोमलेन चरणेन सम्भावितः ।
अशोक ! यदि सत्य एव मुकुलैर्न सम्पत्स्यसे
मृधा वहसि दोहदं ललितकामिसाधारणम् ॥ (१)

सखे ! वचनावकाशपूर्वकं प्रवेष्टुमिच्छामि ।

विदू । एहि णं परिहा[त्ता] सदस्सं । (२)

उभौ प्रवेशं कुरुतः ।

निपु । भट्टिणि ! भट्टिणि ! भट्टा एत्थ पविसदि । (३)

इरा । एदं मम पढमं चिन्तिदं हिअएण । (४)

विदू । उमेत्थ । होदि ! जुत्तं णाम अत्तभोदी पिअवअस्से असोओ वामपाएण ताडइदुं ? । (५)

---

(१) ललितकामिसाधारणं चारुकामिजनतुल्यं दोहदं पादनिक्षेपरूपं दोहदं मृधा मिथ्या वहसि ।

(२) विदूषकः । एनां परि[त्वा] हासयिष्यामि ।

(३) निपुणिका । भट्टिनि ! भट्टिनि ! भर्त्तात्र प्रविशति ।

(४) इरावती । एतन्मम प्रथमं चिन्तितं हृदयेन ।

(५) विदूषकः । भवति ! युक्तं नामात्मभवति प्रियवयस्ये अशोको वामपादेन ताडयितुम् ? । स० प्रियवयस्ये स्थिते इति शेषः । तस्य अविनय निवारकत्वात् तमनाढत्यं तथाचरन्त्यं युक्तं नाम ? न युक्तमित्यर्थः अथ च स एव वामपादेन ताडनयोग्यस्तमनाढत्याशोकताडनमयुक्तमिति ध्वनिः ।

Digitized by Google

उभे। ससंभ्रमम्। अय्यो भट्टा। जेदु जेदु भट्टा। (१)

विदू। बउलावलिए! गिहीदत्थाए तुए अत्तभोदी ईरिसं अविणअं करन्ती कीस ण णिवारिदा। (२)

मालविका भयं रूपयति।

निपु। भट्टिणि! पेक्ख किं पउत्तं अज्जगोदमेण। (३)

इरा। कहं क्खु बम्हबन्धू अण्णहा जीविस्सदि। (४)

बकुला। अज्ज एसा देवीए णिओअं अणुचिट्ठदि। एदस्सिं अदिक्कमे परवदी इअं। पसीददु भट्टा। (५)

इति आत्मना सहैनां प्रणिपातयति।

राज। यद्येवमनपराद्धासि। उत्तिष्ठ भद्रे!। इत्येन मुत्थापयति।

विदू। जुज्जदि देवी एत्थ माणइदव्वा। (६)

राजा। विदूषक।

किसलयमृदोर्विलासिनि कठिने निहितस्य पादपस्कन्धे।

---

(१) उभे। अयि भर्त्ता। जयति जयति भर्त्ता।

(२) विदूषकः। बकुलावलिके! गृहीतार्थया त्वयात्मभवतीडृशमविनयं कुर्वती कस्मात् न निवारिता। स०

(३) निपुणिका। भर्त्रि! प्रेक्षस्व किं प्रवृत्तमार्यगौतमेन। स०

(४) इरावती। कथं खलु ब्राह्मणबन्धुरन्यथा जीविष्यति।

(५) बकुलावलिका। आर्ये! एषा देव्या नियोगमनुतिष्ठति। एतस्मिन्नतिक्रमे परवतीयम्। प्रसीदतु भर्त्ता।

(६) विदूषकः। युज्यते देव्यत्र मानयितव्या।

Digitized by Google

चरणस्य न ते बाधा संप्रति वामोरु ! वामस्य ॥ (१)

मालविका लज्जां नाटयति ।

इरा । अहो णवणीदकम्महिअओ अज्जउत्तो । (२)

माल । बउलावलिए ! एहि अणुट्ठिदं अत्तणो णि-
ओअं देवीए णिवेदेम्ह । (३)

बकुला । विण्णवेहि भट्टारं विसज्जेहि त्ति । (४)

राजा । भद्रे ! यास्यसि । मम तावदुत्पन्नावसरमर्थित्वं
श्रूयताम् ।

बकुला । अवहिदा सुणाहि । आणवेदु भट्टा । (५)

राजा ।

धृतपुष्पमयमपि जनो बध्नाति न तादृशं चिरात्स्मृति ।

---

(१) हे वामोरु ! सुन्दरोरुके ! विलासिनि विलासवति कठिने
कठोरे पादपल्लव्ये हस्तस्कन्धे निहितस्य अर्पितस्य वामस्य किसलयमृदोः
नवपल्लवकोमलायास्तव चरणस्य सम्प्रति बाधा पीड़ा भवेदिति शेषः ।

(२) इरावती । अहो नवनीतकल्पहृदय आर्यपुत्रः । स० दयार्द्र-
चित्तत्वात्तथात्वोत्प्रेक्षा सोल्लुण्ठनोक्तिरियम् ।

(३) मालविका । बकुलावलिके ! एह्यनुष्ठितमात्मनो नियोगं देव्यै
निवेदयावः ।

(४) बकुलावलिका । विज्ञापय भर्त्तारं विसृजेति ।

(५) बकुलावलिका । अवहिता शृणु इति मालविकामुक्त्वा राजानं
प्रत्याह । आज्ञापयतु भर्त्ता ।

Digitized by Google

स्वर्णाम्भतेन पूरय दोहदमस्यापनन्यहचेः ॥ (१)

इरा। सहसोपसृत्य। पूरेहि पूरेहि। अशोओ कुसुमं ण दंसेदि। अअं क्खु उण उत्तम्भिदो एव्व [ण पुप्फदु फलदु च्चेव]। (२)

सर्वे इरावतीं दृष्ट्वा संभ्रान्ताः।

राजा। अपवार्य। वयस्य! का प्रतिपत्तिरत्र?

विदू। किं अण्णं? जङ्घाबलं एव्व। [सरणं अं०] (३)

इरा। साहु बउलावलिए! साहु तुए उवक्कन्तं दाणिं करेहि सफलप्पत्थनं अज्जउत्तं। (४)

उभे। पसीददु भट्टिणी। काओ वअं भट्टिणो पणअपरिग्गहस्स। इति निष्क्रान्ते। (५)

---

(१) अयं माद्दशः जनः चिरात्प्रभृति धृतपुष्पमपि ताडयं न बध्नाति अतः अनन्यहचेः अगन्याभिलाषस्यास्य माद्दशस्य जनस्य दोहदं प्रकाशकं अभीष्टं स्वर्णाम्भतेन पूरय।

(२) इरावती। पूरय पूरय। अशोकः कुसुमं न दर्शयति। अयं खलु पुनरुत्तम्भित एव। स० पाठान्तरे न पुष्पतु फलत्वेव। स० न विकाशते किन्तु फलति फलिष्यतीत्यर्थः।

(३) विदूषक। किमन्यत्? जङ्घाबलमेव स०। अधिकपाठे शरणम्।

(४) इरावती। साधु बकुलावलिके! साधूपक्रान्तमिदानीम्। कुरु सफलप्रार्थनमार्यपुत्रम्।

(५) उभे। प्रसीदतु भर्त्री। के आवां भर्तुः प्रणयपरिग्रहस्य।

Digitized by Google

दरा। अविस्ससणीआ पुरीसा। अत्तणो वच्चखरअणं पमाणीकरिअ अहिकिदत्ताए पिअघरिणीए हिअअसल्लं किदम्। एवं अ विण्णादं मए वाहजण-[गीदि] मिहीदचित्ताए अविसङ्किदाए हरिणीए विअ विणासीत्ति। (१)

विदू। अणालिकम्। भो पडिवज्झेहि किंपि उत्तरं। किं ण भणदु "उद्दालन्दमूले विमहिले विमहिदेण कुम्भीलेण सन्धिच्छेदो शिक्खिदव्वोत्ति" वत्तव्वं होदु। (२)

राजा। सुन्दरि! न मे मालविकया कश्चिदर्थः। मया त्वं चिरयसीति यया कथञ्चिदात्मा विनोदितः।

दरा। अविस्ससणीआसि। ण मए विण्णादं हरिणं

---

(१) दरावती। अविस्रसनीयाः पुरुषाः। आत्मनो वज्रखरत्नं प्रमाणीकृत्य अधिकृतायाः प्रियगृहिण्याः हृदयशल्यं कृतम्। एवं न विज्ञातं मया, व्याधजन-[गीति] गृहीतचित्तायाः अविशङ्कितायाः हरिण्याः इव विनाशः इति। छ०

(२) विदूषकः। भो प्रतिपद्यस्व किमप्युत्तरम्। किं न भणति "उद्दालमूले विमथिते विमथितेन कुम्भीलेन सन्धिच्छेदः शिक्षितव्य" इति वक्तव्यं भवति। छ० उद्दालमूले जलसमीपे विमथिते मथितमूले विमथितेन गृहीतेन कुम्भीलकेन चौरेण सन्धिच्छेदः सन्धिच्छेदन व्यापारः शिक्षितव्यः अभ्यसितव्य इत्येव मयात्र सन्धिः कृतः नापहरणेच्छया इति किं भणति अपि तु भणत्येव इत्येवं वक्तव्यं किञ्चित् कथनीयं भवति।

Digitized by Google

विणोदवुत्तन्तं अज्जउत्तेण उवलद्धुं त्ति। अधवा दुक्खव्वावारिणी एव्वं ण करेमि। (१)

विदू। भा दाव अत्तभोदो दक्खिणस्स उवरोहं करे देहि समीवदिट्ठेण देवीए परिचारिइत्थिआअणेण संकहावि अदु वारीअदि एत्थ तुमं एव्व पमाणं। (२)

इरा। णं संकहा णाम होदु किंपि अत्ताणं आआसइस्सं (३) इति इरा प्रस्थिता।

राजा। अनुचरम्। प्रसीदतु भवती।

इरावती रसनासंदानितचरणा (४) प्रजल्पैव।

राजा। सुन्दरि! न शोभते प्रणयिजने निरपेक्षता।

इरा। सठ! अविस्सुसणीओसि। (५)

---

(१) इरावती। अविश्वसनीयोऽसि। न मया विज्ञातमीदृशो विनोदवृत्तान्त आर्यपुत्रेणोपलब्धः इति। अन्यथा दुःखव्यापारिण्येवं न करोमि।

(२) विदूषकः। भा तावत्तत्रभवतो दाक्षिण्यस्योपरोधं कुरु समीपदृष्टेन देव्याः परिचारिस्त्रीजनेन संकथापि यदि वार्यते अत्र त्वमेव प्रमाणम् स०। तत्रभवतः राज्ञः दाक्षिण्यस्य सर्वभार्यायाम् अनुकूलत्वस्य अत्र एतद्वारणनिमित्तदोषे त्वं प्रमाणं दोषास्पदमित्यर्थः।

(३) इरावती। ननु संकथा नाम भवतु किमित्यात्मानमायासयिष्यामि।

(४) रसनासंदानितचरणा काञ्चीबद्धपादा।

(५) इरावती। सठ! अविश्वसनीयोऽसि। स०

Digitized by Google

राजा ।

अठ इति मयि तावदस्तु ते
परिषयवत्यवधीरणा प्रिये ! ।
चरणपतितया न चण्डि ! तां
विसृजसि मेखलयापि याचिता ॥ (१)

दरा । दुअं पि हदासा तुमं एव्व अणुसरदि । (२)

रसनामादाय राजानं ताडयितुमिच्छति ।

राजा । वयस्य ! एषेरावती ।

बाष्पासारा हेमकाञ्चीगुणेन
श्रोणीबिम्बादप्युपेक्षाच्युतेन ।
चण्डी चण्डं हन्तुमभ्युद्यता मां
विद्युद्दाम्ना मेघराजीव विन्ध्यम् ॥ (३)

---

(१) हे प्रिये ! परिषयवति मयि तावत् अठः धूर्तनायक इत्येवं रूपकथनरूपा अवधीरणा तिरस्कारोऽस्तु चरणपतितमेखलया रसनया तु सखीरूपयेति ध्वनिः याचितापि हे चण्डि ! कोपने ! तामवधीरणां न विसृजसि तथाच सखीयाचनेन कोपत्यागस्योचितत्वेन कोपाभावे च अवधीरणात्यागो युक्त एव तत् न करोषीत्यनुचितमिति भावः ।

(२) दुरावती । दुरयमपि दुताया त्वामेवानुसरति । स०

(३) बाष्प आसार इव यस्याः श्रोणीबिम्बात् प्रयत्नस्खलितत्वात् उपेक्षया असावधानेनैव च्युतेन गलितेन विद्युद्दाम्ना विद्युन्मालयेव हेमकाञ्चीगुणेन स्वर्णरसनया चण्डम् उग्रं मेघराजीव मेघमालेव इयं चण्डी कोपना विन्ध्यं पर्वतमिव मां हन्तुमभ्युद्यता उद्युक्ता ।

Digitized by Google

इरा। किं एव्वं भूओवि मं अवधीरिअं करेहि। (१)

राजा। सरभसं हस्तमवलम्बयति।

अपराधिनि मयि दण्डं संहरसि समुद्यतं कुटिलकेशि!।
वर्धयसि विलसितं त्वं दासजनायात्र कुप्यसि च॥ (२)

नूनमिदानीमनुज्ञातम्। इति पादयोः पतति।

इरा। णा क्खु इमे मालविआए चलणा जे दे विसेसेण दोहलं पूरयिस्सन्ति। (३) इति निष्क्रान्ता सचेटी।

विदू। उट्ठेहि अकिदप्पसादोसि। (४)

राजा। उत्थापयितुमपक्षमः। तत् कथं गतैव प्रिया?।

विदू। वअस्स! देव्वेहिं दूमस्स अविणअस्स अपसारइदा। अहं सिग्घं अपक्कमामि जाव अङ्गारकरासिं विअ अणुचक्कं ण करेदि। (५)

---

(१) इरावती। किमेवं मयोऽपि मालवधीरितां करोषि। छ०

(२) हे कुटिलकेशि! अपराधिनि मयि उद्यतं दण्डं दासजनाताड़न-रूपं संहरसि अतएव विलसितं विलासविशेषं त्वं वर्धयसि दासजनाय मह्यं कुप्यसि च।

(३) इरावती। न खलिमौ मालविकायाश्चरणौ तौ ते विशेषेण दोहदं पूरयिष्यतः। छ०

(४) विदूषकः। उत्तिष्ठाकृतप्रसादोऽसि।

(५) विदूषकः। वयस्य! दैवैः अस्य अविनयस्य अपसारिता अहं शीघ्रम् अपक्रमामि यावत् अङ्गारराशिमिव अनुचक्रं न करोति। छ०

Digitized by Google

राजा । अहो मदनस्य वैषम्यम् ।
मन्ये प्रियाहृतमनास्तस्याः प्रणिपातलङ्घनां सेवाम् ।
एवं प्रणयवती सा न हि शक्यमुपेक्षितुं कुपिता ॥ (१)
तदेहि कुपितां देवीं प्रसादयावः ।

इति निष्क्रान्ताः सर्वे ।

इतितृतीयोऽङ्कः ।

---

(१) प्रियावाम् आहितम् अर्पितं मनो येन तादृशोऽहं प्रणिपातं लङ्घयति खलु । तदतिक्रामिणीं प्रसादनविधेयं प्रसादनाधिकामिति यावत् सेवां मन्ये तादृशी सेवैव प्रसादनावाहं नान्येत्यर्थः । सा हि कुपितापि मयि प्रणयवती अतः उपेक्षितुं तस्याः प्रसादनमिति शेषः न शक्यम् ।

Digitized by Google

चतुर्थोऽङ्कः।



ततः प्रविशति पर्युत्सुको राजा प्रतीहारी च।

राजा। आत्मगतम्।

तामाश्रित्य श्रुतिपथगतामाशया बद्धमूलः
संप्राप्तायां नयनविषयं रूढ़रागप्रवालः।
हृत्सस्पर्शैः कुसुमित इव व्यक्तरोमोद्गमत्वात्
कुर्यात् कान्तं मनसिजतरुर्मां रसघ्नं फलस्य॥ (१)

प्रकाशम्। सखे! गौतम!

प्रती। जेदु जेदु भट्टा। असंणिहिदो गोदमो। (२)

---

(१) मनसिजतरुः कामवृक्षः श्रुतिपथगतां श्रवणातिथिं श्रुतामिति यावत् तां मालविकाम् आश्रित्य अवलम्ब्य आशया बद्धमूलः, नयनविषयं नेत्रगोचरत्वं संप्राप्तायां दृष्टायामिति यावत् तस्यां रूढ़रागप्रवालः रूढ़ः जातः रागरूपः प्रवालो यस्य। ताडग्भोऽभवदिति शेषः हृत्सस्पर्शैः कुसुमित इव तत्र हेतुः व्यक्तरोमोद्गमत्वात् स्फुटरोमाञ्चवत्त्वात् तथा च रोमाञ्चस्याङ्कुरायमाणतया पुष्पितत्वसंभावितम् इदानीं स मनसिजतरुः कायवृक्षः मां फलस्य कान्तं रसघ्नं कुर्यात् इत्याशयसायां लिङ्।

(२) प्रतीहारी। जयतु जयतु भर्ता। असंनिहितो गौतमः।

Digitized by Google

राजा। आत्मगतम्। आः! मालविकावृत्तान्तज्ञानाय मया प्रेषितः।

प्रविश्य विदूषकः।

विदू। जेदु जेदु भवम्। (१)

राजा। जयसेने! जानीहि तावत्। कासौ देवी धारिणी सरलचरणत्वाद्विनोदयत इति।

प्रती। जं देवो आणवेदि। (२) इति निष्क्रान्ता।

राजा। गौतम! को वृत्तान्तस्तवभवत्यास्ते सख्याः।

विदू। यो विड़ालगिहीदाए परद्धदिट्ठीए। (३)

राजा। सविषादम्। कथमिव।

विदू। सा क्खु तवस्सिणी ताए पिङ्गलक्खीए सारभण्डगेहमुहे परिक्खित्ता। (४)

राजा। ननु मत्संपर्कमुपलभ्य।

विदू। अध किं। (५)

---

(१) विदूषकः। जयतु जयतु भवान्। स०

(२) प्रतीहारी। यद्देव आज्ञापयति। स०

(३) विदूषकः। यो विडालगृहीतायाः परवृत्तिकायाः। स० स वृत्त्यर्थात् वृत्तान्तोऽनुजघ्यतेः विसर्जनरूपो वृत्तान्तो जात वृत्त्यर्थः।

(४) विदूषकः। सा खलु तपस्विनी तया पिङ्गलाक्ष्या सारभाण्डगेहमुखे परिक्षिप्ता स०। सारभाण्डस्य प्रधानधनादेर्गृहं तत् स्थितियोग्यभवनं पातालस्थितभवनं तस्य मुखे परिक्षिप्ता।

(५) विदूषकः। अथ किम्। स० भवत्सम्पर्कमुपेत्यैव तथाभूतैश्वर्यः।

Digitized by Google

राजा। क एवं विमुखोऽस्माकं येन चण्डीकृता देवी।

विदू। सुणादु भवम्। परिव्वाजिआ मे कहेदि। भो हिअओ किल तत्तभोदी दूरावदी रुजाअन्तचलणां देवीं सुहं पुच्छिदुं आअदा। (१)

राजा। ततस्ततः।

विदू। तदो सा देवीए पुच्छिदा। किं अत्तणोवि अणलं किदो हिअअजणो वल्लहोत्ति। तदो ताए उत्तअन्तीए मन्तिदम्। कुदो वा उवआरो जं परिअणे संकन्तं वल्लहत्तणं जाणिस्सदित्ति। (२)

राजा। अहो निर्वेदाहते मालविकायामयमुपन्यासः मङ्क-यति। (३)

---

(१) विदूषकः। शृणोतु भवान्। परिव्राजिका मे कथयति। भो हृदयः किल तत्रभवतीरावती रुजायमानचरणां देवीं सुखं प्रष्टुमागता। स०

(२) विदूषकः। ततः सा देव्या पृष्टा। किमात्मनोऽप्यनलंकृतो हृदयजनो वल्लभ इति। ततस्तयोक्तात्यन्तया मन्त्रितम्। कुतो मोपचारः यत्परिजने संक्रान्तं वल्लभत्वं ज्ञास्यतीति स० हृदयजनः हृदयप्रियजनः अनलंकृतः आत्मनोऽपि वल्लभो भवति तत्राप कथं नालंकृतामीति प्रश्नार्थः। उक्तात्यन्तया क्लिष्टान्तया। उपचारः भूषादि।

(३) निर्वेदाहते खलीभं विना अखलीभावहेतुकः इति यावत् अव-धिरावत्तुल्य उपन्यासः मालविकायाः "खलीभे खली" मालविकाविषयं मङ्कयति मङ्कात्तुल्यादयति।

Digitized by Google

विदू। तदो ताए अणुबन्धिज्जमाणाए भवदो अविणअं अन्तरेण परि गदत्था किदा (१)

राजा। अहो दीर्घरोषता तत्रभवत्याः। अतः परं कथय।

विदू। किं अवरम्। मालविआ बउलावलिआ अ णिग्गडपद्दीओ। अदिट्ठसुज्जपाआ पाआलवासं णागकण्णआ विअ अणुहवन्ति। (२)

राजा। कष्टं कष्टम्।

मधुरस्वरा परभृता भ्रमरी च विबुद्धचूतसङ्गिन्यौ।
कोटरमकालतृष्णा प्रबलपुरोवातया गमिते॥ (३)

अथ तत्र कस्यचिदुपक्रमस्य गतिः स्यात्।

---

(१) विदूषकः। ततस्तयानुबध्यमानया भवतोऽविनयमन्तरेण परिगतार्था कृता। स० तया दूरावस्था अनुबध्यमानया देव्यैव निर्बन्धातिशयेन पृष्टया तव अविनयं मालविकानुरक्तत्वरूपमसदाचारमन्तरेण विना परिवर्ज्जयित्वा गृहीतार्था विदितवृत्तान्ता देवी कृता तथाच भवदविनयएव अलङ्काराभावे कारणमिति ज्ञापितमित्यर्थः।

(२) विदूषकः। किमपरम्। मालविका बकुलावलिका च निगडपद्मावदष्टसूर्य्यपादे पातालवासं नागकन्यके इवानुभवतः। स०

(३) मधुरस्वरा मधुरनादा परभृता कोकिला भ्रमरी च तत्तुल्ये मालविका बकुलावलिकेत्यर्थात् विबुद्धचूतसङ्गिन्यौ विकसितसहकारसङ्गते सदाश्रिते इति ध्वनिः। प्रबलपुरोवातया दृष्ट्या कोटरं दृष्टकोटरं तत्तुल्यं निबिड़ान्धकारमिति ध्वनिः गमिते।

Digitized by Google

विदू। कधं भविस्सदि। जं सारभाण्डमिहव्वावारिद-मालविआ देवीए संदिट्ठा। मम अङ्गुलीअमुद्दिअं अदेक्खिअ ण मोत्तव्वा तुए दट्ठआ मालविआ बउलावलिआ चेत्ति। (१)

राजा। निःस्वस्य सपरामर्शम्। सखे! किमत्र कर्तव्यम्।

विदू। विचिन्तअ। अत्थि एत्थ उवाओ। (२)

राजा। क इव।

विदू। सदृष्टिक्षेपम्। कोवि अदिट्ठोसुणिस्सदि। कण्णे दे कहेमि। उपसृत्य। एवं विअ। (३) इत्यावेदयति।

राजा। सहर्षम्। अनुष्ठेयं प्रयुज्यतां सिद्धये।

प्रविश्य प्रतिहारी।

प्रति। देव! पवादसअणे देवी! णिसण्णा रत्तचन्दण-वारिणा परिअणहत्थगदेण चन्दणेण भअवदीए विणोदी-अमाणा कहाहिं सिट्ठदि। (४)

---

(१) विदूषकः। कथं भविष्यति। यत्सारभाण्डमिहव्यापारिता मालविका देव्या संदिष्टा। ममाङ्गुलीयमुद्रिकामदृष्ट्वा न मोक्तव्या त्वया दृष्टा मालविका बकुलावलिका चेति। स०

(२) विदूषकः। अस्त्यत्रोपायः। स०

(३) विदूषकः। कोऽप्यदृष्टः शृणोति। कर्णे ते कथयामि। एवमिव। स० सदृष्टिक्षेपव्याजेन विमर्शकमभियुक्तां देवीमुद्रां गृहीत्वा मोचयिष्यामीति कथितं तच्चानुपदं व्यक्तीभविष्यति।

(४) प्रतीहारी। देव! प्रवातशयने देवी निषण्णा रक्तचन्दनवारिणा परिजनहस्तगतेन चन्दनेन भगवत्याविनोद्यमाना कथाभिर्लप्स्यते। स०

Digitized by Google

राजा । तस्मादस्मत्प्रयाणघोषयोऽयमवसरः ।

विदू । भो गच्छदु भवम् । अहंपि देविं पेक्खिदुं अरित्तपाणी [सज्जो] उविस्सम् । (१)

राजा । जयसेनायाश्चावत्संविदितं गच्छ ।

विदू । तह । कर्णे । एव्वं विअ होदि । (२) इति निष्क्रान्तः ।

राजा । जयसेने ! प्रवातशयनमार्गमादेशय ।

प्रति । दूदो दूदो देवो । (३)

ततः प्रविशति शयनस्था देवी प्रतिराजिका
विभवतश्च परिवारः ।

देवी । भअवदि ! रमणीआ कहा । तदो तदो । (४)

परि । सदृष्टिक्षेपम् । अतःपरं पुनः कथयिष्यामि अत्र भवान् विदिशेश्वरः प्राप्तः ।

देवी । अम्मो भट्टा । (५) दूरुत्थाप्पणिच्चिदो ।

राजा । अलमलमुपचारयन्त्रणया ।

---

(१) विदूषकः । भो गच्छतु भवान् । अहमपि देवीं प्रेक्षितुमरिक्तपाणिः [सज्जो] भविष्यामि । स०

(२) विदूषकः । तथा । एवमिव भवति । स० । उद्याने सर्वदंशनं सम्भविष्यतीति तत्र गम्यमिति कर्णे कथितमित्यर्थः ।

(३) प्रतीहारी । दूरत दूरतो देवः । स०

(४) देवी । भगवति ! रमणीया कथा । ततस्ततः । स०

(५) देवी । अहह भर्ता । स०

Digitized by Google

अनुचितनूपुरविरहं नार्हसि तपनीयपीठिकालम्बि।
चरणं रुजापरीतं कलभाषिणि! मां च पीड़यितुम्॥ (१)

धारि। जेदु जेदु अय्यउत्तो। (२)

परि। विजयतां देवः।

राजा। परिव्राजिकां प्रणम्योपविश्य च। देवि! अपि सह्या वेदना।

धारि। अत्थि मे विसेसो। (३)

ततः प्रविशति यज्ञोपवीतसंवीताकुलः संभ्रान्तो विदूषकः।

विदू। परित्ताअदु परित्ताअदु भवम्। सप्पेणह्मि दट्ठो। (४)

सर्वे विषण्णाः।

राजा। कष्टं कष्टम्। क्व भवान् परिभ्रान्तः।

विदू। देवीं देक्खिस्संति आआरपुप्फकारणादो पमदवणं गदोह्मि। (५)

---

(१) अनुचितनूपुरविरहं सततपरिचितनूपुरसङ्गमित्यर्थः। रुजापरीतं रोगव्याप्तं चरणं तद्दर्शनेन रोगाक्रान्तं मामपि पीड़यितुं नार्हसि।

(२) धारिणी। जयति जयत्वार्यपुत्रः। स०

(३) धारिणी। अस्ति मे विशेषः। स०

(४) विदूषकः। परित्रायतां परित्रायतां भवान्। सर्पेणास्मि दष्टः। स०

(५) विदूषकः। देवीं द्रक्ष्यामीत्याचारपुष्पकारणात्प्रमदवनं गतोऽस्मि। स०

Digitized by Google

धारि। हद्धी हद्धी अहं ज्जेव्व जीविदसंसअणिमित्तं जादा बम्हणस्स। (१)

विदू। तहिं असोअत्थपुप्फकारणादो पसारिदो दक्खिणहत्थो। तदो कोडरविणिग्गदेण सप्पछविणा कालेण दंसिदोह्मि। णं एदाणि दुवे दंसणपदाणि। (२) इति दर्शयति।

परिव्राजिका।

छेदो दंशस्य दाहो वा क्षतस्यारक्तमोक्षणम्।
एतानि दष्टमात्राणामायुष्याः प्रतिपत्तयः॥ (३)

संप्रति विषवैद्यानां कर्म।

राजा। जयसेने! ध्रुवसिद्धिः क्षिप्रमाह्वयताम्।

प्रती। जं देवो आणवेदि (४)। इति निष्क्रान्ता।

---

(१) धारिणी। हा धिक् हा धिगहमेव जीवितसंशयनिमित्तं जाता ब्राह्मणस्य। स०

(२) विदूषकः। तस्मिन्नशोकस्थपुष्पकारणात्प्रसारितो दक्षिणहस्तः। ततः कोटरविनिर्गतेन सर्पछद्मिना कालेन दंशितोऽस्मि। नन्वेते द्वे दंशनपदे। स०

(३) दंश्यतेऽत्र दंशो दंशाधाराङ्गम् तस्य छेदः खण्डनं दाहो वा क्षतस्य क्षताधारस्य आरक्तमोक्षणम् सम्यक्शोणितनिस्सारणं वा। एतानि खेददाहरक्तमोक्षणानि दष्टमात्राणामायुष्या आयुषे हिताः प्रतिपत्तय उपायाः।

(४) प्रतीहारी। यद्देव आज्ञापयति। स०

Digitized by Google

विदू। अहो पावेण मिच्चुणा गिहीदोम्हि। (१)

राजा। मा कातरो भूः। अविषोऽपि कदाचिद्दंशो भवेत्।

विदू। कहं ण भाइस्सम्। सिमिसिमाअन्ति मे अङ्गा-इम्। (२) इति। विषवेगं रूपयति।

धारि। हा हा दंसिदं विआरेण अवलम्बध ब्रह्मणम्। (३)

परिव्राजिका ससंभ्रममवलम्बते।

विदू। राजानमवलोक्य। भो बालपिअवअस्सोम्हि तुए। अविआरेण अपुत्ताए जवणीए जोगक्खेमं वहेहि। (४)

राजा। मा भैषीः। अचिरात् त्वां वैद्यश्चिकित्सिष्यति। स्थिरो भव।

प्रविश्य जयसेना।

जय। आणवेदो धुवसिद्धी विण्णवेदि। दूअज्जेव्व गोदमो आणीअदुत्ति। (५)

---

(१) विदूषकः। अहो पापेन म्लेच्छेन गृहीतोऽस्मि। स०

(२) विदूषकः। कथं न भेष्यामि। सेक्ष्यन्ते मेऽङ्गानि। स०

(३) धारिणी। हा! हा! दंशितं विकारेणावलम्बध्वमेनम्। स०

(४) विदूषकः। भो बालप्रियवयस्योऽस्मि ते। अविकारेणापुत्रायै जवन्यै योगक्षेमं वह। स० बाल्यावधिप्रियवयस्यः बालप्रियवयस्यः अविकारेण मम बाल्येऽपि वैधिल्याभावेन मदनुरोधादेवेत्यर्थः।

(५) जयसेना। आज्ञप्तो ध्रुवसिद्धिर्विज्ञापयति। दूतैव गौतम आनीयतामिति। स०

Digitized by Google

राजा । तेन हि वर्षवर(१)प्रतिगृहीतमेव तत्रभवतः सकाशं प्रापय ।

जय । तहा । (२)

विदू । देवीं विलोक्य । भोदि ! जीवेअं ण वा जं मए तत्तभवन्तं सेवमाणेण दे अवरद्धं तं मरिसेहि । (३)

धारि । दीहाउसो होहि । (४)

निष्क्रान्तो विदूषकः प्रतीहारी च ।

राजा । प्रकृतिभीरुस्तपस्वी ध्रुवसिद्धेरपि यथार्थनामः सिद्धिं न मन्यते ।

प्रविश्य जयसेना ।

जेदु जेदु भट्टा । धुवसिद्धी विण्णवेदी । उदकुम्भविधाणेण सप्पमुद्दिआ कप्पिदव्वा । ता अणेसीअदुत्ति । (५)

धारि । एदं सप्पमुद्दअं अङ्गुलीअअम् । पच्छा मह हत्थे देहि णम् । (६)

---

(१) वर्षवरेण कञ्चुकिना प्रतिगृहीतम् अवलम्बितमेनं गौतमं तत्रभवतः ध्रुवसिद्धेः सकाशं समीपं प्रापयेत्यन्वयः ।

(२) जयसेना । तथा । स० अस्तिति शेषः ।

(३) विदूषकः । भवति ! जीवेयं न वा । यन्मया तत्रभवन्तं सेवमानेन ते ऽपराद्धं तन्मर्षयस्व । स०

(४) धारिणी । दीर्घायुर्भव ।

(५) जयसेना । जयति जयति भर्ता । ध्रुवसिद्धिर्विज्ञापयति । उदकुम्भविधानेन सर्पमुद्रिका कल्पितव्या तदन्विष्यतामिति । स०

(६) धारिणी । एतत्सर्पमुद्रिकमंगुलीयकम् । पश्चान्मम हस्ते देहीतत् । स०

Digitized by Google

राजा। जयसेने! कर्मसिद्धावाशु प्रतिपत्तिसानय। (१)

जय। जं देवो आणवेदि (२)। इति निष्क्रान्ता।

परि। यथा हृदयमाचष्टे तथा निर्विषो गौतमः।

राजा। भूयादेवम्।

प्रविश्य जयसेना।

जय। जेदु जेदु भट्टा। णिव्वुत्तविसवेगो गोदमो मुहुत्तेण पकिदित्थो संवुत्तो। (३)

धारि। दिट्ठिआ वच्चणीआदो मुत्तम्हि। (४)

प्रती। एसो उण वाहतओ अमच्चो विण्णवेदि। राअकज्जं बहु मन्तिदव्वम्। दंसणेन अणुग्गहं दुच्छामि त्ति। (५)

धारि। गच्छदु अज्जउत्तो कज्जसिद्धीए। (६)

राजा। देवि! आतपाक्रान्तोऽयमुद्देशः। शीतक्रिया चास्यारुजः प्रशस्ता। तदन्यत्र नीयतां शयनीयम्।

---

(१) प्रतिपत्तिं यथायोग्यस्थानप्रापणं राज्ञीसमीपमेव आशु शीघ्रमानयेत्यर्थः।

(२) जयसेना। यद्देव आज्ञापयति। स०

(३) जयसेना। जयति जयति भर्ता। निहतविषवेगो गौतमो मुहूर्तेन प्रकृतिस्थः संवृत्तः। स०

(४) धारिणी। दिष्ट्या वाच्यान्मुक्तास्मि स०। वाच्यादपवादात्।

(५) प्रतीहारी। एष पुनर्वाहितकोऽमात्यो विज्ञापयति। राजकार्यं बहु मन्त्रितव्यम् दर्शनेनानुग्रहमिच्छामीति। स०

(६) धारिणी। गच्छत्वार्यपुत्रः कार्यसिद्धये। स०

Digitized by Google

धारि । पालिआ अज्जउत्तवअणं अणुचिट्ठध । (१)

परिजनस्तथा प्रक्रान्तः ।

निष्क्रान्ता देवी परिव्राजिका परिजनश्च ।

राजा । जयसेने ! गूढेन पथा प्रमदवनं प्रापय ।

जय । एदु एदु देवो । (२)

राजा । जयसेने ! ननु समाप्तकाम्यो गौतमः ? ।

जय । अध इम् ? । (३)

राजा ।

इष्टाधिगमनिमित्तं प्रयोगमेकान्तसाध्यमपि मत्वा ।
सन्दिग्धमेव सिद्धौ कातरमाशङ्कते चेतः ॥ (४)

प्रविश्य विदूषकः ।

विदू । जेदु जेदु भवम् । सिद्धाणि दे मङ्गलकम्माणि । (५)

राजा । जयसेने ! त्वमपि नियोगमपूर्वं कुरु ।

---

(१) धारिणी । पालिताः ! आर्यपुत्रवचनमनुतिष्ठत । स० पालिताः दास्यः ।

(२) जयसेना । एत्वेतु देवः । स०

(३) जयसेना । अथ किम् ? । स०

(४) इष्टाधिगमे प्राप्तौ निमित्तं कारणम् एकान्तसाध्यम् निश्चन्देहेन सम्भवदुत्पत्तिकसाध्यकमेवंरूपमपि प्रयुज्यते इति प्रयोगः उपायस्तं सिद्धौ साध्यनिष्पादनाय सन्दिग्धमेव कार्यं स्यान्न वेति कृतसन्देहं मत्वा चेतः कातरं यथा तथा आशङ्कते बिभेति ।

(५) विदूषकः । जयति जयति भवान् । सिद्धानि ते मङ्गलकर्माणि । स०

Digitized by Google

जय। जं देवो आणवेदि। (१) इति निष्क्रान्ता।

राजा। गौतम! क्षुद्रा माधविका न खलु किंचिद्विचारितमनया।

विदू। देवीए अङ्गुलीअमुद्दिअं देक्खिअ कहं विआरेदि। (२)

राजा। न खलु मुद्रामधिष्ठाय ब्रवीमि। तयोर्द्वयोः किं निमित्तो मोक्षः किं वा देव्या परिजनमतिक्रम्य भवान् संदिष्ट इत्येव तया प्रष्टव्यम्।

विदू। णं पुच्छिदोह्मि। मन्दस्सवि पुणो मे तह पसुप्पणं उत्तरं आसि। (३)

राजा। कथ्यताम्।

विदू। भणिदं मए। देव्वचिन्तएहिं विग्घाविदो राआ सोवसग्गं वो णक्खत्तम्। ता अवस्सं सव्वबन्धमोक्खो करी अदुत्ति। (४)

राजा। सहर्षम्। ततस्ततः।

---

(१) जयसेना। यद्देव आज्ञापयति। स०

(२) विदूषकः। देव्या अङ्गुलीयमुद्रिकां दृष्ट्वा कथं विचारयति। स०

(३) विदूषकः। ननु पृष्टोऽस्मि। मन्दस्यापि पुनर्मे तथा प्रत्युत्पन्नमुत्तरमासीत्। स०

(४) विदूषकः। भणितं मया। दैवचिन्तकैर्विघ्नितो राजा सोपसर्गं वो नक्षत्रम्। तदवश्यं सर्वबन्धमोक्षः क्रियतामिति। स० उपसर्गेण ज्योतिर्मोक्षक्रूरग्रहवेधक्षुचितदैवोपद्रवेण सहितमित्यर्थः।

Digitized by Google

विदू। तं सुणिअ देवीए इरावदीए चित्तं रक्खन्तीए "राआ किल मोअअदि त्ति" अहं संदिट्ठोत्ति। तदो युज्जदि त्ति ताए सम्वादिदो अत्थो। (१)

राजा। विदूषकं परिष्वज्य। सखे! प्रियोऽहं खलु तव।

न हि बुद्धिगुणेनैव सुहृदामर्थदर्शनम्।
कार्यसिद्धिपथः सूक्ष्मः स्नेहेनाप्युपलभ्यते॥ (२)

विदू। तुवरदु भवम्। समुद्गेहके सहीसहिदं मालविअं ढाविअ भवन्तं पडुग्गदोम्हि। (३)

राजा। अहमेनां संभावयामि। गच्छाग्रतः।

विदू। एदु एदु भवम्। परिक्रम्य। एदं समुद्गेहकम्। (४)

राजा। सागरकम्। वयस्य एषा कुसुमावचयव्यग्रहस्ता सख्यास्ते इरावत्याः परिचारिका चन्द्रिका संनिकृष्टमागच्छति। इतस्तावदावां भित्तिगूढौ भवावः।

---

(१) विदूषकः। तत् श्रुत्वा देव्या इरावत्यास्चित्तं रक्षन्त्या "राजा किल मोषयति" इत्यहं संदिष्ट इति। ततो युज्यत इति तया संवादितोऽर्थः। स०

(२) सुहृदां बुद्धिगुणेनैव अर्थदर्शनं न किन्तु स्नेहेनैव सूक्ष्मः कृशादनुद्भावनीयः कार्यसिद्धिपथः अभीष्टसिद्धेरुपायः उपलभ्यते उद्भाव्यते इत्यर्थः।

(३) विदूषकः। त्वरतां भवान्। समुद्गृष्टके सखीसहितां मालविकां स्थापयित्वा भवन्तं प्रत्युद्गतोऽस्मि। स०

(४) विदूषकः। एत्वेतु भवान्। एतत्समुद्गृष्टकम्। स०

Digitized by Google

विदू। अहो कुम्भीलएहिं कामुएहिं च परिरक्खणीआ चन्दिआ। (१)

उभौ यथासमर्थितं कुरुतः।

राजा। कथं नु ते सखी मां प्रतिपालयति। एतेनां गवाक्षमाश्रित्य यावदवलोकयामि।

विदू। तहा। (२)

उभौ विलोकयन्तौ स्थितौ।

ततःप्रविशति मालविका वकुलावलिका च।

वकुला। सहि पणम भट्टारं। (३)

माल। णमो दे जो पासदो पिट्ठदो पेक्खीअदि। (४)

राजा। अङ्के मे प्रतिकृतिं निर्दिशति।

माल। सहर्षं द्वारमवलोक्य। हला मं विप्पलम्भेसि। (५)

राजा। हर्षविषादाभ्यामत्रभवत्याः प्रीतोऽस्मि।

---

(१) विदूषकः। अहो कुम्भीलकैः कामुकैश्च परिरक्षणीया चन्द्रिका। स०। कुम्भीलकैश्चौरैः।

(२) विदूषकः। तथा। स० अस्तिति शेषः।

(३) वकुलावलिका। सखि! प्रणम भर्तारम्। स०

(४) मालविका। नमो ते यः पार्श्वतः पृष्ठतश्च दृश्यते। स० सर्वदानुचिन्त्यमानत्वात् यत्र दृष्टिर्दीयते तत्रैव भवान् दृश्यते इत्यर्थः।

(५) मालविका। हला मां विप्रलभसे। स० तदागमनजुष्टा हर्षः तददर्शने विलम्बात् विषादः।

Digitized by Google

सूर्योदये भवति या सूर्यास्तसमये च पुण्डरीकस्य।
वदनेन सुवदनायास्ते समवस्थे क्षणादूढे। (१)

बकुला। णं एस चित्तगदो भट्टा चिट्ठदि। (२)

उभे। प्रविपत्य। जेदु जेदु भट्टा। (३)

माल। तहिं संभमे ठिदा भट्टिणो रूवस्स ण तह वितिण्हच्छि जह अज्ज मए भाविदो अविदिण्हदंसणो भट्टा। (४)

विदू। सुदं भवदा। णं किं अत्तभोदी तुए जह दिट्ठा तह णं दिट्ठो भवम्। सुधा दाणिं मञ्जूसाविअ रअणभाण्डं जोवणगव्वं वहेसि। (५)

राजा। सखे! कुतूहलवानपि निसर्गशालीनः स्त्रीजनः। (६)

पश्य—

---

(१) पुण्डरीकस्य पद्मस्य सूर्योदये याऽवस्था विकाशरूपा सूर्यास्तसमये च या सङ्कोचरूपाऽवस्था भवति ते विकाशसङ्कोचात्मिके इे समवस्थे सम्यगवस्थे सुवदनाया मालविकायाः वदनेन क्षणादूढे धृते।

(२) बकुलावलिका। नन्वेष चित्रगतो भर्ता। स०

(३) उभे। जयति जयति भर्ता। स०

(४) मालविका। तस्मिन् संभ्रमे स्थिता भर्तृरूपस्य न तथा विदृष्णाक्षि यथाद्य मया भावितोऽविदृष्टदर्शनो भर्ता। स० भावितः दर्शनानन्तरं चिन्तितः।

(५) विदूषकः। श्रुतं भवता। नन्वु किमत्रभवती त्वया यथा दृष्टा तथा न दृष्टो भवान्। सुधेदानीं मञ्जूषैव रत्नभाण्डं यौवनगर्वं वहसि। स०

(६) निसर्गेण स्वभावेन शालीनः सलज्जः।

Digitized by Google

कात्स्न्र्येन निर्वर्णयितुं च रूप-
मिच्छन्ति तत्पूर्व्वसमागमानाम्।
न तु प्रियेष्वायतलोचनानाम्
समग्रवृत्तीनि विलोचनानि। (१)

माल। हला का एसा पासपरिवत्तिदवअणेण भट्टिणा सिणिद्धाए दिट्ठीए णिज्झाअदि। (२)

बकुला। णं दूअं पासगदा दरावदी। (३)

माल। सहि! अदक्खिणो विअ मे भट्टा पडिभादि जो सव्वं देवीअणं उज्झिअ एक्काए मुहे बद्धलक्खो। (४)

बकुला। आत्मगतम्। चित्तगदं भट्टारं परमत्थदो संक-

---

(१) प्रियेषु अभीष्टेषु तद्दर्शनायेत्यर्थः। आयतलोचनानां व्यापारितनेत्राणां स्त्रीणामिति शेषः। विलोचनानि नेत्राणि तत्पूर्व्वसमागमानां तैः नेत्रैः पूर्व्वं समागमो येषां तानप्रथमदर्शनानां प्रियाणामित्यर्थः। रूपं लावण्यं कात्स्न्र्येन समग्रतया निर्वर्णयितुं द्रष्टुमिच्छन्ति सोत्सुकानि, न तु किन्तु समग्रवृत्तीनि सम्पूर्णव्यापारवन्ति न भवन्तीति शेषः। दृष्टविषयदर्शने औत्सुक्ये सत्यपि समग्रतया स्त्रियो न पश्यन्ति लज्जाशीलत्वादिति भावः।

(२) मालविका। हला कैषा पार्श्वपरिवर्त्तितवदनेन भर्त्रा स्निग्धया दृष्ट्या निध्यायते। स०

(३) बकुलावलिका। नन्विदं पार्श्वगतेरावली। स०

(४) मालविका। सखि! अदक्षिण इव मे भर्त्ता प्रतिभाति यः सर्वं देवीजनमुज्झित्वैकस्या मुखे बद्धलक्षः। स०

Digitized by Google

णिअ अङ्गदस्सुदि। भोदु कीलदस्सं दाव एदाए ॥ प्रकाशम्। हला भट्टिणो वल्लहा एसा। (१)

माल। तदो किं दाणिं अत्ताणं आआसिअ। (२) इति सास्रूयं परावर्त्तते।

राजा। सखे! पश्य पश्य।

भ्रूभङ्गभिन्नतिलकं स्फुरिताधरोष्ठं
सास्रूयमाननमितः परिवर्त्तयन्त्या।
कान्तापराधकुपितेष्वनया विनेतुः
संदर्शितेव ललिताभिनयस्य शिक्षा ॥ (३)

विदू। अणुणअसज्जो दाणिं होहि। (४)

माल। अज्जगोदमो एत्थ एव्व सेवदि णम्। (५) इति पुनः स्थानान्तराभिमुखी भवितुमिच्छति।

---

(१) वकुलावलिका। चिरागतं भर्तारं परमार्थतः संकल्पास्रूयिष्यति। भवतु क्रीडयिष्यामि तावदेतया। हला भर्तुर्वल्लभैषा। स०

(२) मालविका। ततः किमिदानीमात्मानमाचक्षे। स०

(३) विनेतुः शिक्षकस्य गणदासस्य कर्तरि षष्ठी। कान्तापराधकुपितेषु कान्तस्य योऽपराधः अन्यस्त्रीसङ्गमादिकस्तापराधस्तेन कुपितेषु कोपेषु भावे क्त। ललिताभिनयस्य मनोहरस्य कोपव्यञ्जकचेष्टाविशेषस्य कर्म्मणि षष्ठी। शिक्षा उपदेशः अनया मालविकया संदर्शितेव तव हेतुगर्भविशेषणम् पूर्व्वार्द्धम्।

(४) विदूषकः। अनुनयसज्जः इदानीं भव। स०

(५) मालविका। आर्यगौतमः अत्रैव सेवतेनाम्। स०

Digitized by Google

बकुला। मालविकां दृष्ट्वा। ण हि ण हि। कुविदा दाणिं तुमम्। (१)

माल। जदि चिरं कुविदं एव्व मं मन्तेसि एव पच्चाणी अदु कोवो। (२)

राजा। उपेत्य।

कुप्यसि कुवलयनयने! चित्रार्पितचेष्टया कथय किमिदं मे।
ननु तव साक्षादयमहमनन्यसाधारणो दासः॥ (३)

बकुला। जेदु जेदु भट्टा। (४)

माल। आत्मगतम्। कहं चित्तगदो भट्टा मए अक्खुदो। (५)

प्रकाशं सव्रीडवचनमञ्जलिं करोति।

राजा मदनकावर्थं रूपयति।

विदू। किं भवं उदासीणो विअ दिस्सदि। (६)

---

(१) बकुलावलिका। न हि न हि। कुपितेदानीं त्वम्। स०

(२) मालविका। यदि चिरं कुपितामेव मां मन्त्रयसि एष प्रत्यानीयतां कोपः। स०

(३) हे कुवलयनयने! मे मम चित्रार्पितचेष्टया किं कथं कुप्यसि मन्युमिति शेषः। ननु भो अहं साक्षात् स्वरूपतः न तु प्रतिमूर्त्या अनन्यसाधारणः अन्यस्वत्वहीनः एकभक्तिक इत्यर्थः तव दासः। स०

(४) बकुलावलिका। जयति जयति भर्ता। स०

(५) मालविका। कथं चित्रगतो भर्ता मयाक्षुभितः। स०

(६) विदूषकः। किं भवानुदासीन इव दृश्यते। स०

Digitized by Google

राजा । अविश्वसनीयत्वात्सख्याः ।

विदू । अत्तभोदीए कहं तव अविस्सासो । (१)

राजा । श्रूयताम् ।

पथि नयनयोः स्थित्वास्थित्वा तिरोभवति क्षणा
त्सरति सहसा वाङ्मोर्मध्यं गतापि सखी तव ।
मनसिजरुजाक्लिष्टस्यैवं समागममायया
कथमपि सखे ! विस्रब्धं स्यादिमां प्रति मे मनः ॥ (२)

बकुला । सहि ! बड्ढसो किल भट्टा विप्पलद्धो । ता अत्ता वीस्ससणीओ करीअदु । (३)

मालवि । मम उण मन्दभागाए सविणअसमागमोवि भट्टिणो दुल्लहो आसि । (४)

बकुला । एदु भट्टा देहि से उत्तरम् । (५)

---

(१) विदूषकः । आत्मभवत्याः कथं तवाविश्वासः । स० तवेति कर्तरि षष्ठी । आत्मभवत्या इत्यत्र तु कर्मणि षष्ठीति भेदः ।

(२) उक्तरूपेण बकुलयः प्रतारणेन अविश्वासकारणाचरणात् इमां मालविकां प्रति मे मनः कथं विस्रब्धं विश्वस्तं स्यात् अपि तु कथमपि न प्रतारिकायाः प्रतारणावश्यम्भावेन तत्राविश्वासस्यैव युक्तत्वादिति भावः ।

(३) बकुलावलिका । सखि ! बड्ढसः किल भर्ता विप्रलब्धः । तदात्मा विश्वसनीयः क्रियताम् । स०

(४) मालविका । मम पुनर्मन्दभागायाः स्वप्नसमागमोऽपि भर्तुर्दुर्लभ आसीत् । स०

(५) बकुलावलिका । एतु भर्ता देह्यस्या उत्तरम् । स०

Digitized by Google

राजा। उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम्।
तव सख्यै मया दत्तो न सेव्यः सेविता रहः॥ (१)

बकुला। अणुगिहीदह्मि। (२)

विदू। परिक्रम्य सभ्रमम्। बउलावलिए असोअपल्लवादुं अहिलङ्घदुं दुच्छदि हरिणो। एहि णिवारेम णम्। (३)

बकुला। तह। (४) इति प्रस्थिता।

राजा। एवमेवास्मिन् रक्षणीयेऽविलम्बितेन भवितव्यम्।

विदू। एव्वंपि गोदमो णिद्दिसदि। (५)

बकुला। अज्ज! गोदम! अहं असोअआसे चिट्ठामि। तुमं दुवाररक्खओ होहि। (६)

---

(१) उत्तरेण किम् उत्तरसाध्यं नास्ति यद्बाणएवाग्निसाक्षकत्वात् साक्षी यत्र तद्यथा तथा अनेनाग्निसाक्षिकत्वेन दुर्भेद्यता दर्शिता। मया इदानीं आत्मा तव सख्यै मालविकायै दत्तः रहसि निर्जने अस्याः सेविता सेवक एव भविष्यामि न तु सेव्य इत्यर्थः।

(२) बकुलावलिका। अनुगृहीतास्मि। स०

(३) विदूषकः। बकुलावलिके! अशोकपल्लवान्यभिलङ्घयितुमिच्छति हरिणः एहि निवारयाव एनम्। स०

(४) बकुलावलिका। तथा। स०

(५) विदूषकः। एवमपि गौतमो निर्दिशति। स० अपिः हेतौ अवश्यरक्षणीयस्य यतो रक्षणमुचितमत इत्यर्थः।

(६) बकुलावलिका। आर्य! गौतम! अहमशोकाशे तिष्ठामि। त्वं द्वाररक्षको भव। स०

Digitized by Google

विदू । जुज्जदि । (१)

निष्क्रान्ता बकुलावलिका ।

विदू । इमं दाव फटिअत्थम्भं संसिदो भोमि । तधा कत्वा । अहो सुहप्फरिसदा सिलाविसेसस्स । इति निद्रायते । (२)

मालविका ससाध्वसं तिष्ठति ।

राजा । विसृज सुन्दरि ! संगमसाध्वसं
तव चिरात्प्रभृति प्रणयोन्मुखे ।
परिगृहाण गते सहकारतां
त्वमतिमुक्तलताचरितं मयि ॥ (३)

माल । देवीभआदो अत्तणोवि पिअं कादुं ण पारेमि । (४)

राजा । न भेतव्यम् भेतव्यम् ।

माल । सोपालम्भम् । जो ण भाअदि सो मए भट्टिणीदंसणे दिट्ठसमत्थो भट्टा । (५)

---

(१) विदूषकः । युज्यते । स०

(२) विदूषकः । इमं तावत् स्फटिकस्तम्भं संश्रितो भवामि । अहो सुखस्पर्शता शिलाविशेषस्य । स०

(३) चिरात्प्रभृति बकुलावधि तव प्रणयोन्मुखे प्रणयसमुत्सुके सहकारितां सहचरतामाम्रवृक्षत्वञ्च गते मयि त्वम् अतिमुक्तलताचरितं माधवीलतासाध्वसं बन्धनाश्लेषेणेति शेषः परिगृहाण ।

(४) मालविका । देवीभयादात्मनोऽपि प्रियं कर्तुं न पारयामि । स०

(५) मालविका । यो न बिभेति स मया भट्टिनीदर्शने दृष्टसामर्थ्यो भर्ता । स०

Digitized by Google

राजा। उत्तरेण किमात्मैव पञ्चबाणाग्निसाक्षिकम्।
तव सख्यै मया दत्तो न सेव्यः सेविता रहः॥ (१)

बकुला। अणुगिहीदम्हि। (२)

विदू। परिक्रम्य सभ्रमम्। बउलावलिए असोअपल्लवादुं अहिलङ्घिदुं इच्छदि हरिणो। एहि णिवारेम णम्। (३)

बकुला। तह। (४) इति ग्रस्थिता।

राजा। एवमेवास्मिन् रक्षणीयेऽविलम्बितेन भवितव्यम्।

विदू। एव्वंपि गोदमो णिद्दिसदि। (५)

बकुला। अज्ज! गोदम! अहं अप्पआसे चिट्ठामि। तुमं दुवाररक्खओ होहि। (६)

---

(१) उत्तरेण किम् उत्तरसाध्यं नास्ति यद्बाणएवाग्निस्साक्षकत्वात् साक्षी यत्र तद्यथा तथा अनेनाग्निसाक्षिकत्वेन दुर्भेद्यता दर्शिता। मया इदानीं आत्मा तव सख्यै मालविकायै दत्तः रहसि निर्जने अस्याः सेविता सेवक एव भविष्यामि न तु सेव्य इत्यर्थः।

(२) बकुलावलिका। अनुगृहीताऽस्मि। स०

(३) विदूषकः। बकुलावलिके! अशोकपल्लवान्यभिलङ्घयितुमिच्छति हरिणः एहि निवारयाव एनम्। स०

(४) बकुलावलिका। तथा। स०

(५) विदूषकः। एवमपि गौतमो निर्दिशति। स० अपिः हेतौ अवश्यरक्षणीयस्य यतो रक्षणमुचितमत इत्यर्थः।

(६) बकुलावलिका। आर्य! गौतम! अहमप्रकाशे तिष्ठामि। त्वं द्वाररक्षको भव। स०

Digitized by Google

विदू । जुज्जदि । (१)

निष्क्रान्ता बकुलावलिका ।

विदू । इमं दाव फटिअत्थम्भं संसिदो भोमि । तधा कत्वा । अहो सुहप्फरिसदा सिलाविसेसस्स । इति निद्रायते । (२)

मालविका ससाध्वसं तिष्ठति ।

राजा । विसृज सुन्दरि ! संगमसाध्वसं
तव चिरात्प्रभृति प्रणयोन्मुखे ।
परिगृह्णाण गते सहकारतां
त्वमतिमुक्तलताचरितं मयि ॥ (३)

माल । देवीभआदो अत्तणोवि पिअं कादुं ण पारेमि । (४)

राजा । न भेतव्यम् भेतव्यम् ।

माल । सोपालम्भम् । जो ण भाअदि सो मए भट्टिणीदंसणे दिट्ठसमत्थो भट्टा । (५)

---

(१) विदूषकः । युज्यते । स०

(२) विदूषकः । इमं तावत् स्फटिकस्तम्भं संश्रितो भवामि । अहो सुखस्पर्शता शिलाविशेषस्य । स०

(३) चिरात्प्रभृति बकुलावधि तव प्रणयोन्मुखे प्रणयसमुत्सुके सहकारितां सहचरतामाम्रवृक्षत्वञ्च गते मयि त्वम् अतिमुक्तालताचरितं माधवीलतासाहश्यं बन्धनाश्लेषेणेति शेषः परिगृह्णाण ।

(४) मालविका । देवीभयादात्मनोऽपि प्रियं कर्तुं न पारयामि । स०

(५) मालविका । यो न बिभेति स मया भट्टिनीदर्शने दृष्टसामर्थ्यो भर्ता । स०

Digitized by Google

राजा ।

दाक्षिण्यं नाम बिम्बोष्ठि ! नायकानां कुलव्रतम् ।
तन्मे दीर्घाक्षि ! ये प्राणास्ते त्वदायत्तनिबन्धनाः ॥ (१)

तदनुगृह्यतां चिरानुरक्तोऽयं जनः । इति संभ्रमेणोपजगन्धति ।

मालविका नाट्येन परिहरति ।

राजा । रमणीयः खलु नवाङ्गनानां मदनविषयावतारः । एषा हि ।

हस्तं कम्पयते रुणद्धि रसनाव्यापारलोलाङ्गुलीः
स्वौ हस्तौ नयति स्तनावरणतामालिङ्ग्यमाना बलात् ।
पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याननं
व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ॥ (२)

---

(१) हे बिम्बोष्ठि ! नाम सम्भावनायां प्रकाशे वा । दाक्षिण्यं सर्वदयितासु आनुकूल्यं नायकानां कुलव्रतम् अवश्यपालनीयनियमः । यद्यपीति शेषः । तत् तथापि ये मम प्राणास्ते त्वदायत्तनिबन्धना तवाज्ञापरवशा इत्यर्थः ।

(२) रसनाव्यापारलोलाङ्गुलीः रसनायां व्यापारे तद्ग्रन्थिमोचनरूपचेष्टायां लोलाङ्गुलीः समुत्सुकत्वेन व्याकुलीः रुणद्धि रोद्धुं यत्नाति । बलात् हठेन आलिङ्ग्यमाना स्वौ हस्तौ स्तनावरणतां स्तनावरकत्वं नयति पक्ष्मलनेत्रमाननं पातुं चुम्बयितुमुन्नमयतः उन्नीलयतो मम साचीकरोति वक्रं स्थापयति अतो व्याजेन छलेन मम अभिलाषपूरणसुखम् अभिलाषस्य कामनायाः पूरणेन यत् सुखं तत् निर्वर्तयति निष्पादयत्येव ।

Digitized by Google

ततः प्रविशतीरावती निपुणिका च।

इरा। हञ्जे णिउणिए! सच्चं तुमं परिगतत्था चन्दि-आए। समुट्ठगेहकालिन्दसद्दो अज्जगोदमो दिट्ठोत्ति। (१)

निपु। अण्णहा कहं भट्टिणीए विण्णवीअदि। (२)

इरा। तेन हि तहिं एव्व गच्छ्ह्म संसआदो मुत्तं पि-अवअस्सं पुच्छिदुं च। (३)

निपु। सावसेसं विअ भट्टिणीए वअणम्। (४)

इरा। अण्णं च। चित्तगदं अज्जउत्तं पसादइदुम्। (५)

निपु। अह दाणिं कहं णु भट्टा एव्वं अणुणी-अदि [जइ दाणिं भट्टा पच्चक्खदो अणुणीअदि ता को दोसो।] (६)

इरा। मुञ्चे जारिसो चित्तगदो तारिसो एव्व अण्णसंकन्त-

---

(१) इरावती। चेटि! निपुणिके! सत्यं त्वं परिगतार्था चन्द्रिकया। समुद्गृष्टकालिन्दयवित आर्यगोतमो दृष्ट इति। स०

(२) निपुणिका। अन्यथा कथं भट्टिन्या विज्ञाप्यते। स०

(३) इरावती। तेन हि तत्रैव गच्छाव संशयान्मुक्तं प्रियवयस्यं प्रष्टुं च। स०

(४) निपुणिका। सावशेषमिव भट्टिन्या वचनम्। स० प्रष्टुञ्चेति चकारप्रयोगात् अन्यदपि प्रयोजनमस्तीति वचनस्यावशेषोऽस्तीति गम्यते।

(५) इरावती। अन्यच्च। चित्रगतमार्यपुत्रं प्रसादयितुम्। स०

(६) निपुणिका। अद्येदानीं कथं नु भर्तैवमनुनीयते। पाठान्तरे यदि भर्ता प्रत्यक्षतोऽनुनीयते तत् को दोषः। स०

Digitized by Google

हिअओ अज्जउत्तो। केवलं उवआरादिक्कमं पमज्जिदुं अअं आरब्भो। (१)

निपु। इदो इदो भट्टिणी। (२)

उभे परिक्रामतः।

प्रविश्य चेटी।

जेदु जेदु भट्टिणी। भट्टिणि! देवी भणादि। ण एसो मह मत्सरस्स कालो तव बड्ढमाणं वड्ढिदुं। इअं वअस्सिआए सह णिअलबन्धणे किदा मालविआ। जइ अणुमण्णेसि अज्जउत्तं पि तव किदे विण्णावइस्सम्। (३)

इरा। णाअरिए! विण्णवेहि देवीम्। काओ वअं भट्टिणीं णिओजेदुं [भट्टिणीणीदिं जेदुं] परिअणणिग्गहेण मइ

---

(१) इरावती। सुग्धे! यादृशचित्तगतस्तादृश एवान्यसंक्रान्तहृदय आर्यपुत्रः। केवलमुपचारातिक्रमं प्रमार्जितुमयमारब्धः। स० उपचारस्य मत्सेवनात्मकपादपतनस्य अतिक्रमणमुल्लङ्घनमित्यर्थः। अन्यसंक्रान्तहृदयस्य साक्षादनुनयकरणायोग्यत्वादेवं क्रियते इति भावः।

(२) निपुणिका। इत इतो भट्टिनी।

(३) चेटी। जयति जयति भट्टिनी। भट्टिनि! देवी भणति। नैष मे मत्सरस्य कालस्तव वर्धमानं वर्धयितुम्। इयं वयस्यिकया सह निगड़बन्धने नीता मालविका। यद्यनुमन्यसे आर्यपुत्रमपि तव कृते विज्ञापयिष्यामि। स०

Digitized by Google

दंसिदो अणुग्गहो। कस्स वा पसाएण अअं जणो वड्ढदित्ति। (१)

चेटी। तह। (२) इति निष्क्रान्ता।

निपु। परिक्रम्यावलोक्य च। एस दुवारे समुट्ठगेहकस्स विपणिगदो विअ वुसहो गोदमो आसीणो एव्वणिद्दाअदि। (३)

इरा। किं णु क्खु अच्चाहिदम्। सावसेसो विअ विसविआरो भवे। (४)

निपु। पसण्णमुहवण्णो दीसदि। अवि अ धुवसिद्धिणा चिदिच्छिदो। ता से असङ्कणिज्जं पावं। (५)

विदू। उल्लपायते। भोदि! मालविए!। (६)

निपु। सुदं भट्टिणीए। कस्स वा एसो अत्तणीणो [एस

---

(१) इरावती। नागरिके! विज्ञापय देवीम्। का वयं भट्टिनीं वियोजयितुं पाठान्तरे भट्टिनीनीतिं जेतुम्। परिजननिष्पक्षेण मयि दर्शितोऽनुग्रहः कस्य वा प्रसादेनायं जनो वर्धत इति। स०

(२) चेटी। तथा। स०

(३) निपुणिका। एष द्वारे समुद्भ्रष्टहकस्य विपणिगत इव वृषभः गोतम आसीन एव निद्रायते। स०

(४) इरावती। किं नु खल्वत्याहितम्। सावशेष इव विषविकारो भवेत्। स०

(५) निपुणिका। प्रसन्नमुखवर्णो दृश्यते। अपि च ध्रुवसिद्धिना चिकित्सितः। तदस्य अशङ्कनीयं पापम्। स०

(६) विदूषकः। भवति! मालविके!। स०

Digitized by Google

कितवो] अभवहारिअसम्बन्धापेक्खी किदग्घो। इदो सव्वं कालं सोत्थिवअणमोदएहिं कुक्खिं पुरिअ संपदं मालविअं सिविणावेदि। (१)

विदू। इरावदीं अदिक्कमन्ती होहि। (२)

निपु। एदं अच्चाहिदम्। भुअंगभीअं बम्हबन्धुं इमिणा भुअङ्गकुडिलेण अत्तणो दण्डकट्ठेण अन्तरिदा भीसेमि [ताड-इस्सम्]। (३)

इरा। अरिहदि किदग्घो सप्पदंसणम्। (४)

निपुणिका विदूषकस्योपरि दण्डकाष्ठं पातयति।

विदू। सहसा प्रबुध्य। अविहा अविहा। दव्वीकरो मे उवरि परिपडिदो। (५)

राजा। सहसोपसृत्य। न भेतव्यं न भेतव्यम्।

---

(१) निपुणिका। श्रुतं भट्टिन्या। कस्य वैष आत्मनोनः। [एष कितवः] अभ्यवहार्यसम्बन्धापेक्षी कृतघ्नः। इतः सर्वं कालं स्वस्तिवचन-मोदकैः कुक्षिं पूरयित्वा साम्प्रतं मालविकां स्वप्नायति। स० इतः आत्मात्।

(२) विदूषकः। इरावतीमतिक्रामन्ती भव। स०

(३) निपुणिका। एतदत्याहितम्। भुजङ्गभीतं ब्रह्मबन्धुमनेन भुजङ्गकुटिलेनात्मनो दण्डकाष्ठेनान्तरिता भाययामि पाठान्तरं ताड़यि-ष्यामि। स०

(४) इरावती। अर्हति कृतघ्नः सर्पदंशनम्। स०

(५) विदूषकः। अपिहा अपिहा। दर्वीकरो मे उपरि पति-तितः। स०

Digitized by Google

माल । अनुहृत्य । मा दाव सहसा णिक्कमिस्सदि [णिक्कमदु भट्टा] सप्पोत्ति भणादि । (१)

इरा । हद्धी हद्धी । भट्ठा दाव इदो एव्व धावदि । (२)

विदू । सप्रहासम् । कहं दण्डकाट्ठं एदम् । अहं पुण आणे । जं मए केदअकण्डएहिं दंसं करिअ [सप्पस्स अयसो किदं] [सप्पदंसो किदो] तं मे फलिदं त्ति । (३)

ततः प्रविशति पटान्तेनैव बकुलावलिका ।

बकुला । मा क्खु भट्टा पविसदु । इह कुडिलगदी सप्पो विअ दीसदि । (४)

इरा । राजानं सहसोपसृत्य । अवि णिव्विग्घमणोरहो दिवासंकेदो मिहुणस्स । (५)

सर्वे इरावतीं दृष्ट्वा संभ्रान्ताः ।

---

(१) मालविका । मा तावत्सहसा निष्क्रमिष्यसि [निष्क्रामतु भर्ता] । सर्प इति भणति । स०

(२) इरावती । हा धिक् हा धिक् । भर्ता तावदित एव धावति । स०

(३) विदूषकः । कथं दण्डकाष्ठमेतत् । अहं पुनर्जाने । यन्मया केतककण्टकैर्दंशं कृत्वा सर्पस्यायशः कृतं पाठान्तरे [सर्पदंशः कृतः] तन्मे फलितमिति । स०

(४) बकुलावलिका । मा खलु भर्ता प्रविशतु । इह कुटिलगतिः सर्प इव दृश्यते । स० इरावत्याः कुटिलगतित्वात् सर्पत्वाद्दश्यम् ।

(५) इरावती । अपि निर्विघ्नमनोरथो दिवासङ्केतो मिथुनस्य । स०

Digitized by Google

राजा। प्रिये! अपूर्वोऽयमुपचारः। (१)

इरा। बउलावलिए! भट्टाहिसारविसआ संपुण्णा दे पदिण्णा। (२)

बकुला। पसीददु भट्टिणी। किं मए किदंत्ति देवो पुच्छिदव्वो। दद्दुरा वाहरन्ति त्ति किं देवो पुहविं वरिसिदुं सुमरेदि?। (३)

विदू। मा दाव भोदीए दंसणमेत्तेण अत्तभवं पणिवादलक्खणं विसुमरिदो भोदि। तुमं पुण पसादं ण गेच्छासि। (४)

इरा। कुविदाविअहं किं करिस्सम्। (५)

---

(१) अयमुपचारः दिवासङ्केताभिसारकल्पनित्यापवादः अपूर्वः पूर्वमननुभूतः।

(२) इरावती। बकुलावलिके! भर्तृभिसारविषया संपूर्णा ते प्रतिज्ञा। स०

(३) बकुलावलिका। प्रसीदतु भट्टिनी। किं मया कृतमिति देवः प्रष्टव्यः। दर्दुरा व्याहरन्तीति किं देवः पृथिवीं वर्षितुं स्मरति?। स० भेकशब्दश्रवणेनैव किमिन्द्रः वर्षणाय प्रवर्तते अपि तु नैव यदा तस्येच्छा तदैव वर्षति तदिच्छानुसारित्वात् वर्षाया अतः देवेच्छैवात्र कारणं किं मम प्रतिज्ञयेति भावः।

(४) विदूषकः। मा तावद्भवत्या दर्शनमात्रेणात्रभवान् प्रणिपातलक्षणं विस्मृतो भवति। त्वं पुनः प्रसादं न गच्छसि। स०। प्रणिपातलक्षणं तज्जन्यापराधः भवत्या दर्शनमात्रेण न विस्मर्यते। अपि तु तन्निवारणोपायो भवत्या करणीयस्तदा विस्मृतो भवेदित्याशयः।

(५) इरावती। कुपिताप्यहं किं करिष्यामि। स०

Digitized by Google

राजा । एवमेतत् । अस्थाने कोप इत्यनुपपन्नं त्वयि ।

कदा मुखं वरतनु ! कारणादृते
तवागतं क्षणमपि कोपपात्रताम् ? ।
अपर्वणि ग्रहकलुषेन्दुमण्डला
विभावरी कथय कथं भविष्यति ॥ (१)

दरा । अत्थाणे त्ति सुट्ठु अवधारिदं अज्जउत्तेण । अण्णसंकन्तेसु अक्खाणं भाअधेएसु जदि उण कुप्पेअं णं अहं दरा भवे । (२)

राजा । त्वमन्यथा कल्पयसि । अहं पुनः सत्यमेव कोपस्थानं न पश्यामि । कुतः ।

नार्हति कृतापराधोऽप्युत्सवदिवसेषु परिजनो बन्धुम् ।
इति मोचिते मयैते प्रणिपतितुं मामुपगते च ॥ (३)

---

(१) हे वरतनु ! तव मुखं कारणादृते अपराधादिरूपं हेतुं विना कोपपात्रताम् कोपभागितां क्षणमपि कदा गतम् ? अपि तु अपराधं दृष्ट्वैव कुप्यसि नेतरथा कदापीत्यर्थः । कारणाभावे कोपस्थानुचितत्वं दृष्टान्तेन दृढयति । अपर्वणि पूर्णिमाप्रतिपत्सन्धिकालभिन्ने विभावरी रात्रिर्यथा ग्रहकलुषेन्दुमण्डला कदा भवति अपि तु नैव तथाच कोपकारणं विना मुखं कथं भविष्यति तत्कथयेत्यर्थः ।

(२) दरावती । अस्थाने इति सुष्ठु अवधारितमार्यपुत्रेण । अन्यसंक्रान्तेष्वक्षाणां भागधेयेषु यदि पुनः कुप्येयं नन्वहं दरा भवेयम् । स०

(३) कृतापराधोऽपि परिजनः उत्सवदिवसेषु बन्धुं संयन्तुं नार्हति न योग्यो भवति इति हेतोः मया एते धात्रिकावकुलावलिके बन्धात्

इरा। णिउणिए! गच्छ अ देविं विण्णवेहि। दिट्ठं [भवदीए एक] बक्खवादित्तणम्। अवहिदं मे हिअअं अज्जेत्ति। (१)

णिपु। तह। (२) इति निष्क्रान्ता।

विदू। आत्मगतम्। अहो अणत्थो संपडिदो बम्भणब्भट्ठो गेहकबोदओ विडालिआए आलोए पडिदो। (३)

प्रविश्य निपुणिका।

णिउ। देवि! जदिच्छादिट्ठाए माहविआए आचक्खिदम्। एवं णिमित्तम्। (४) इति कर्णे कथयति।

इरा। आत्मगतम्। उवसमणं सव्वं ज्जेव। बम्हबन्धुणा उविअ

मोचिते ते च प्रक्षिपतितुं नमस्कर्तुं मामुपगते नान्यकारणादिति वाक्यशेषः।

(१) इरावती। निपुणिके! गत्वा देवीं विज्ञापय। दृष्टं [भवत्या एक] पक्षवादित्वम्। अवधृतं मे हृदयमद्येति। स०

(२) निपुणिका। तथा। स०

(३) विदूषकः। अनर्थः संपतितो ब्रह्मबन्धुर्गृहकपोतको विडालिकाया आलोके पतितः। स०

(४) निपुणिका। देवि! यदृच्छादृष्टया माधविकयाख्यातम्। एवं निमित्तम्। स० पूर्वदृष्टस्य शोपसर्गनक्षत्रदोषोपशान्तये सर्वबन्धमोक्षकारणोद्भावकरूपम् विदूषकवाक्यमेव कारणमिति कर्णे आवितम्।

Digitized by Google

ओ पओओ। विदूषकं विलोक्य प्रकाशम्। दूअं अस्स कामतन्तसचिवस्स बह्मबन्धुणो णीदी। (१)

विदू। भोदि! जदि णीदीए एक्कंपि अक्खरं पढेअं ण अत्त भवं संसिदो भवे। (२)

राजा। अपवार्य। आः कथं नु खल्वस्मात्संकटान्मोच्यावहे।

प्रविश्य सावेगा जयसेना।

जय। देव! कुमारी वसुलच्छी कन्दुअं अणुधावन्ती पिङ्गलवाणरेण बलिअं वित्तासिदा। अङ्गणिसण्णा अ देवीए पवादकिसलअं विअ वेवमाणा ण किंपि पडिवज्जदि। (३)

राजा। कष्टं कष्टम्। कातरो बालभावः।

इरा। सावेगम्। तुवरदु तुवरदु अज्जउत्तो णं समासासदुं मा से संदावजणिदो विआरो वड्ढदु। (४)

राजा। अहमेनां संज्ञापयामि। इति सत्वरं निष्क्रामति।

---

(१) इरावती। उपपन्नं सर्वमेव। ब्रह्मबन्धुनोल्लिङ्गितः प्रयोगः। इयमस्य कामतन्त्रसचिवस्य ब्रह्मबन्धोर्नीतिः। स०

(२) विदूषकः। भवति! यदि नीत्या एकमप्यक्षरं पठेयं न अत्रभवन्तं संश्रितो भवेयम्। स०

(३) जयसेना। देव! कुमारी वसुलक्ष्मीः कन्दुकमनुधावन्ती पिङ्गलवानरेण बलीयो वित्रासिता। अङ्गनिषण्णा च देव्याः प्रवातकिसलयमिव वेपमाना न किमपि प्रतिपद्यते। स०

(४) इरावती। त्वरतां त्वरतामार्यपुत्रः एनां समाश्वासयितुं मास्याः सन्तापजनितो विकारो वर्द्धताम्। स०

Digitized by Google

विदू। साधु रे पिङ्गलवानर! साधु। परिच्चादो तुए सवक्खो। (१)

निष्क्रान्तौ राजा विदूषकश्चेरावती निपुणिका प्रतीहारी च।

माल। देवीं चिन्तिअ वेवदू मे हिअअम्। ण आणे संपदि किं अदो अणुभविदव्वं भविस्सदित्ति। (२)

नेपथ्ये। अच्चरिअं अच्चरिअं। अपुणे पच्चरत्ते दोहलस्स मउलेहिं संणद्धो तवणीआसोओ। जाव देवीए णिवेदेमि। (३)

उभौ श्रुत्वा प्रहृष्टौ।

बकुला। आसासदु सही सच्चपदिण्णा देवी। (४)

माल। तेन अहं पमदवणपालिआए पिट्ठदो भोमि। (५)

इति निष्क्रान्ताः सर्वे।

इति चतुर्थोऽङ्कः।

---

(१) विदूषकः। साधु रे पिङ्गलवानर! साधु! परित्रातस्त्वया स्वपक्षः। स० तुल्यबुद्धित्वादात्मनस्तत्पक्षत्वमिति तस्याशयः।

(२) मालविका। देवीं चिन्तयित्वा वेपते मे हृदयम्। न जाने संप्रति किमतोऽनुभवितव्यं भविष्यतीति। स०

(३) नेपथ्ये। आश्चर्यमाश्चर्यम्। अपूर्णे पञ्चरात्रे दोहदस्य, बकुलैः सनंद्धस्तपनीयाशोकः। यावद्देव्यै निवेदयामि। स०

(४) बकुलावलिका। आश्वसितु सखी। सत्यप्रतिज्ञा देवी। स०

(५) मालविका। तेनाहं प्रमादवनपालिकायाः पृष्ठतो भवामि। स०

Digitized by Google

पञ्चमोऽङ्कः।

ततः प्रविशत्युद्यानपालिका।

उद्यान। उवक्खित्तो मए सक्कारविहिणा तवणीआसो अस्स भित्तिवेदिआबन्धो। जाव अणुट्ठिदणिओअं अत्ताणं देवीए णिवेदेमि। परिक्रम्य। अदो देव्वस्स अणुकम्पणीआ मालविआ तस्सिं तह चण्डिआ देवी इमिणा असोअहरिसदोहलवुत्तन्तेण पसादुमुही भविस्सदि। कहिं णु खु भवे देवी?। विलोक्य। अम्मो एसो देवीए परिअणन्तरो किंपि जदुमुद्दालञ्छिदं मञ्जूसं गेण्हिअ चउस्सालादो कुज्जो णिक्कामदि। पुच्छिस्सं दाव णम्। (१)

ततः प्रविशति यथानिर्दिष्टहस्तः कुब्जः।

उद्यान। सारस! कहिं पत्थिदोसि?। (२)

---

(१) उद्यानपालिका। उपक्षिप्तो मया सत्कारविधिना तपनीयाशोकस्य भित्तिवेदिकाबन्धः। यावदनुष्ठितनियोगमात्मानं देव्यै निवेदयामि। अतो देवस्यानुकम्पनीया मालविका। तस्यां तथा चण्डिका देवी अनेनाशोकहर्षदोहदवृत्तान्तेन प्रसादोन्मुखी भविष्यति। कुत्र नु खलु भवेत् देवी?। अहह एष देव्याः परिजनान्तरं किमपि जतुमुद्रालाञ्छितां मञ्जूषां गृहीत्वा चतुःशालात् कुब्जो निष्क्रामति। प्रच्छामि तावदेनम्। स०

(२) उद्यानपालिका। सारस! कुत्र प्रस्थितोऽसि?। स०

Digitized by Google

सार। मउअरिए! [illegible]विज्जाचरिआणं बम्हणाणं इमं णिच्चदक्खिणा मासिदं अज्जपुरोहिदस्स हत्थं पावइस्सम्। (१)

मधु। अह किं णिमित्तं?। (२)

सार। जदा पहदि सुदं सेणावदिणा। जण्णतुरंगरक्खणे णिउत्तो भट्टिदारओत्ति। तस्स आउधत्थं अट्ठसदसुवण्णपरिमाणं दक्खिणा एहिं पडिणा होदि। (३)

मधु। अह कहिं देवी किं वा अणुचिट्ठदि?। (४)

सार। मङ्गलगेहके आसणत्था विदब्भविसआदो भादुणा वीरसेणेण पेसिदं लेहं लिपिअरेहिं वाचीअमाणं सुणादि। (५)

मधु। को उण विदब्भराअवुत्तन्तो सुणीअदि?। (६)

सार। वसीकिदो किल वीरसेणप्पमुहेहिं दण्डचक्केहिं भट्टिणो विदब्भणाहो। मोइदो किल से दाआदो माह-

---

(१) सारसः। मधुकरिके! विद्याचरितानां ब्राह्मणानामिमां नित्यदक्षिणां मासिकीमार्यपुरोहितस्य हस्तं प्रापयिष्यामि। स०

(२) मधुकरिका। अथ किं निमित्तम्?। स०

(३) सारसः। यदा प्रभृति श्रुतं सेनापतिना। यज्ञतुरङ्गरक्षणे नियुक्तो भर्तृदारक इति तस्यायुष्यार्थमष्टशतसुवर्णपरिमाणं दक्षिणैषा प्रतिज्ञा भवति। स०

(४) मधुकरिका। अथ कुत्र देवी किं वानुतिष्ठति?। स०

(५) सारसः! मङ्गलगृहके आसनस्था विदर्भविषयात् भ्रात्रा वीरसेनेन प्रेषितं लेखं लिपिकरैर्वाच्यमानं शृणोति। स०

(६) मधुकरिका। कः पुनर्विदर्भराजवृत्तान्तः श्रूयते?। स०

Digitized by Google

वसेणो। दूदो अ महासारणि रअणवाहणाणि सि[ग्गिदा]-[ग्गिका]रिआभूदट्ठपरिअणं च उवाअणीकरिअ भट्टिणो सआसं पेसिदो। सो किल भट्टारअं पेक्खिस्सदि। (१)

मधु। गच्छ अणुचिट्ठ अत्तणो णिओअम्। अहंपि देवीं पेक्खिस्सम्। (२)

इति निष्क्रान्तौ।

प्रवेशकः। (३)

ततः प्रविशति प्रतीहारी।

प्रती। आणत्तम्हि देवीए असोअसक्कारव्वाविदाए, विण्ण वेहि अज्जउत्तम्। इच्छामि अज्जउत्तेण सह असोअरुक्खस्स पसूणलच्छिं पचक्खीकादुं त्ति। ता जाव धम्मासणगदं देवं पडिवालेमि। इति परिक्रामति। (४)

---

(१) सारसः। वशीकृतः किल वीरसेनप्रमुखैर्दक्षचक्रैर्भर्तुर्विदर्भनाथः। मोचितश्च किलास्य दायादो माधवसेनः। दूतश्च महासारणि रत्नवाहनानि सिल्लिदा[ल्लिका]रिकाभूविष्टं परिजनं चोपायनीकृत्य भर्तुः सकाशं प्रेषितः। स किल भट्टारकं प्रेक्षिष्यते। स०

(२) मधुकरिका। गच्छानुतिष्ठात्मनो नियोगम्। अहमपि देवीं प्रेक्षिष्ये। स०

(३) दूतवर्त्तिष्यमाणानामिलाद्युल्लक्षणः। अत्र च दूतस्य अशोकविकाशस्य वर्त्तिष्यमाणस्य सिल्लिदारिकादिदृष्टान्तस्य निदर्शनम्।

(४) प्रतीहारी। आज्ञप्तास्मि देव्याऽशोकसत्कारव्याकुलतया, विज्ञा-

Digitized by Google

नेपथ्ये ।

वैता । दिष्ट्या दण्डेनेवारिशिरःसु वर्तते देवः ।

प्रथमः ।

परभृतकलव्याहारेषु त्वमात्तरतिर्मधुं
नयसि विदिशातीरोद्यानेष्वनङ्गदवाङ्गवान् ।
विजयकरिणामालानाङ्गैरुधोढबलस्य ते
वरद ! वरदारोधोदृत्तैः सहावनतो रिपुः ॥ (१)

द्वितीयः ।

विरचितपदं वीरप्रीत्या सुरोपमसूरिभि
स्चरितमुभयोर्मध्येकृत्य स्थितं क्रथकैशिकान् ।
तव हृतवतो दण्डानीकैर्विदर्भपतेः श्रियं
परिघगुरुभिर्दोर्भिर्विष्णोः प्रसह्य च रुक्मिणीम् ॥ (२)

प्रयार्यपुत्रम् । दृष्ट्याम्यार्यपुत्रेण सहाशोकवृक्षस्य प्रसूनलक्ष्मीं प्रत्यक्षीकर्तुमिति । तद्यावद्वर्मांबुवगतं देवं प्रतिपालयामि । स०

(१) आत्तरतिः गृहीतरतिनामपत्नीकः गृहीतसन्तोषश्च विदिशातीरोद्यानेषु विदिशाख्यनदीकूलस्थारामेषु अनङ्गदव कामदव अङ्गवान् प्रशस्ताङ्गवान् परभृतकलव्याहारेषु परभृतानां कोकिलानां परपुष्टानां वन्दिनाञ्च कलव्याहारेषु कलोक्तिषु मधुं वसन्तं माधुर्यञ्च नयसि । हे वरद ! अभीष्टद ! उधोढबलस्य समर्थसैन्यस्य अर्जितामर्थस्य च ते तव रिपुः शत्रुः विजयकरिणाम् विजयहस्तिनाम् आलानानाङ्गैः बन्धनसाधनैः वरदारोधवृत्तैः वरदाख्यनदीतीरस्थवृत्तैः सह अवनतः नम्रतामनुकूलतान्च गतः ।

(२) परिघगुरुभिः परिघाख्यवृद्धैः दोर्भिर्बाहुभिश्चलभिरित्यर्थात्

Digitized by Google

प्रती । एसो जअसद्दसूइदप्पत्थाणो भट्टा इदो एव्व आअच्छदि । अहंपि दाव दूमस्स मुहादो अवसरिअ एदं मुहालिन्दतोरणं समस्सिदा होमि । (१) इत्येकान्ते स्थिता ।

प्रविश्य सवयस्को राजा ।

कान्तां विचिन्त्य सुलभेतरसंप्रयोगां
श्रुत्वा विदर्भपतिमानमितं बलैश्च ।
धाराभिरातप इवाभिहतं सरोजं
दुःखायते च हृदयं सुखमश्नुते च ॥ (२)

विदू । दुह पेक्खामि [अहमहं पेक्खामि तह] एकन्त-सुहिदो भवं भविस्सदि त्ति । (३)

रुक्मिणीं हृतवतो विष्णोः, विदर्भपतेः श्रियं दण्डानीकैः दण्डप्रधानसैन्यैः हृतवतस्तव च एतयोरुभयोश्चरितं सुरोपमसूरिभिः देवतुल्यपण्डितैः वीरप्रीत्या शूरभक्त्या च विरचितपदं कीर्त्तितमाहात्म्यम् क्रथकैशिकान् तदाख्यविषयान् मध्येजत्व अधिष्ठाय स्थितम् अनेन तव विदर्भश्रीहरणं विष्णोः रुक्मिणीहरणमिव तवातीव यशस्करमिति भावः ।

(१) प्रतीहारी । एष जयशब्दसूचितप्रस्थानो भर्तैत एवागच्छति । अहमपि तावदस्य मुखात् समवस्कन्दैतन्मुखालिन्दतोरणं समाश्रिता भवामि । स०

(२) कान्तां मालविकां सुलभेतरसंप्रयोगां दुर्लभप्राप्त्युपायां विचिन्त्य, अनेन दुःखहेतुत्वं दर्शितम् । विदर्भाधिपतिं बलैः सैन्यैः आनमितं वशीकृतञ्च श्रुत्वा अनेन सुखहेतुत्वं दर्शितम् । आनमे विद्यमानमिति शेषः । सरोजं धाराभिः आहितमिव हृदयं दुःखायते सुखमश्नुते प्राप्नोति च ।

(३) विदूषकः । दुह पेक्षे (यथा अहं पेक्षे तथा) एकान्तसुखितो भवान् भविष्यतीति । स०

Digitized by Google

राजा। कथमिव ?।

विदू। अज्ज किल देवीए धारिणीए पण्डिदकोसिआ भणिदा। भअवदि! तुमं जदि सच्चं पसाहणगव्वं वहेसि दंसेहि दाव मालविआए सरीरे विवाहणेवत्थं त्ति। तदो सविसेसकोदुहलं अलंकिदा मालविआ तत्तभोदीए। कदावि पूरए भवदो मणोरहं। (१)

राजा। सखे! मदपेक्षामनुवृत्त्य अनया धारिण्या पूर्वचरितैः सम्भाव्यत एवैतत्।

प्रती। उपगम्य। जेदु जेदु देवो। देवी विण्णवेदि। तवणीआसोअस्स कुसुमोग्गमसिरिं अज्जउत्तेण सह पच्चक्खीकादुं इच्छामि त्ति। (२)

राजा। ननु तत्रैव देवी ?।

प्रती। अधदं। जहा तुह सम्माणसुहं। अन्तेउरं विसज्जिअ मालविआपुरोएण अत्तणो परिअणेण [पण्डिअकोसिआए अ] समं देवं पडिवालेदि। (३)

---

(१) विदूषकः। अद्य किल देव्या धारिण्या पण्डितकौशिकी भणिता। भगवति! त्वं यदि सत्यं प्रसाधनगर्वं वहसि दर्शय तावत् मालविकायाः शरीरे विवाहनेपथ्यमिति। ततः सविशेषकौतूहलमलङ्कृता मालविका तत्रभवत्या। कदापि पूरयेद् भवतो मनोरथम्। स०

(२) प्रतीहारी। जयति जयति देवः। देवी विज्ञापयति। तपनीयाशोकस्य कुसुमोद्गमश्रियमार्यपुत्रेण सह प्रत्यक्षीकर्तुमिच्छामीति। स०

(३) प्रतीहारी। अथ किम्। यथा तव सम्मानसुखम्। अन्तःपुरं

Digitized by Google

राजा। सहर्षं विदूषकं विलोक्य। जयसेने! गच्छाग्रतः।

प्रती। एदु एदु देवो। (१) इति परिक्रामति।

विदू। विलोक्य। भो वअस्स! किंचि परिवुत्तजोव्वणो विअ वसन्तो पमदवणे लक्खीअदि। (२)

राजा। यदाह भवान्।

अग्रे विकीर्णकुरुवकफलजालकभिद्यमानसहकारम्।
परिणममुखमिदमृतोरुत्सुकयति यौवनं चेतः॥ (३)

विदू। भो अअं सो दिक्खणेबत्थो विअ कुसुमत्थवणहिं तवणीआसोओ। आलोएदु भवं। (४)

राजा। स्थाने खलु प्रसवमन्थरोऽभूद्वयमिदानीमनन्यसाधारणीं शोभां पुष्यति [उद्वहति]। पश्य—

विसृज्य मालविकापुरोगेण आत्मनः परिजनेन [परिवृत कौशिक्या च स०] सभं देवं प्रतिपालयति। स० यथा सम्मानः सुखञ्च भवेत्तथा कृतमित्यर्थः।

(१) प्रतीहारी। एतेतु देवः। स०

(२) विदूषकः। भो वयस्य! किञ्चित्परिवृत्तयौवन इव वसन्तः प्रमदवने लक्ष्यते। स०

(३) अग्रे पुरतः विकीर्णानां व्याप्तानां कुरुवकाणां फलजालकैः फलसमूहैर्भिद्यमानोऽवलक्ष्यमाणः सहकारो यत्र तादृशम् ऋतोर्वसन्तस्य इदं परिणामसुखं परिपक्वं परिपाकस्य आरब्धात्मकं यौवनं चेतः सम्मुत्सुकयति उत्कण्ठितं करोति। यौवनदर्शनविषये व्यग्रं भवतीत्यर्थः।

(४) विदूषकः। भो अयं स दक्षिणेपथ्य इव कुसुमस्तवकैरपनीयाशोकः। अवलोकयतु भवान्। स०

Digitized by Google

सर्वाशोकलतानां प्रथमं सूचितवसन्तविभवानाम्।
निर्वृत्तदोहदेऽस्मिन् संक्रान्तानीव मुकुलानि ॥ (१)

विदू। तह वीसद्धो होहि। अम्हासु तह उवगदेसु वि धारिणी पासपरिवत्तिअं मालविअं अणुमण्णेदि। (२)

राजा। सहर्षम्। पश्य पश्य सखे!

मामियमभ्युत्तिष्ठति देवी विनयादनूत्थिता प्रियया।
विस्तृतहस्तकमलया नरेन्द्रलक्ष्म्या वसुमतीव ॥ (३)

ततः प्रविशति धारिणी मालविका परिव्राजिका विभवतश्च परिवारः।

माल। आत्मगतम्। जाणामि णिमित्तं मह कोदुअलंका-

---

(१) प्रथमं सूचितवसन्तविभवानाम् प्रापितवसन्तसम्पत्तीनां सर्वाशोकलतानां मध्ये निर्वृत्तदोहदे निष्पन्नौषधे प्राप्तमालविकाप्रसङ्गे इति यावत् अस्मिन् तपनीयाशोके मुकुलानि सर्वासामित्यनुषङ्गः संक्रान्तानीव। अन्येषां दोहदाभावात् सर्वेषां मुकुलानामेकत्र समावेशादिव पुष्पप्राचुर्यमित्याशयः।

(२) विदूषकः। तथा विस्रब्धो भव। अस्मासु तथा उपगतेष्वपि धारिणी पार्श्वपरिवर्त्तिकां मालविकामनुमन्यते। स० अनुमन्यते न दृष्टिपथादपसारयतीत्यर्थः।

(३) विस्तृतहस्तकमलया प्रियया मालविकया तस्या एवेदानीमभीष्टतमत्वात् प्रियात्वम् अनूत्थिता पश्चात् उत्थिता अनुगतेति यावत् देवी धारिणी नरेन्द्रलक्ष्म्या नृपश्रिया अनुगता वसुमतीव मामभ्युत्तिष्ठति। अनूत्थितेत्यत्र अनुपूर्वकस्थाधातोः कर्मणि क्तः, अन्वासितमदृश्यतेति वद्दृश्य सकर्मकत्वमुपेयम्।

Digitized by Google

रस्स। तहवि मे हिअअं विसिणीपत्तगदं विअ सलिलं वेवदि। दक्खिणेदरं णअणं अ बज्झसो फुरदु। (१)

विदू। भो वअस्स! विवाहणेवत्थेण सविसेसं खु सोहदि अत्तभोदी मालविआ। (२)

राजा। पश्याम्येनाम्। एषा—

अनतिलम्बिदुकूलनिवासिनी
लघुभिराभरणैः प्रतिभाति मे।
उडुगणैरुदयोन्मुखचन्द्रिका
हतहिमैरिव चैत्रविभावरी॥ (३)

---

(१) मालविका। जानामि निमित्तं मम कौतुकालङ्कारस्य। तथापि मे हृदयं विसिनीपत्रगतमिव सलिलं वेपते। दक्षिणेतरं नयनं च बाष्पशः स्फुरति। स० निमित्तं स्वर्णाशोकस्य दोहददानेन पञ्चरात्राभ्यन्तरे तस्य पुष्पोद्गमे देवीप्रसादकृतं कारणं जानामि। दक्षिणेतरम् वामं नयनं स्फुरति तथाच इष्टलाभो भविष्यति इत्यनुमीयते नारीणां वामाक्षिस्पन्दने "भ्रूभागमध्ये प्रियसङ्गमः स्यात् नासाक्षिमध्ये च सहायलाभः। दृगन्तमध्यस्फुरणेऽर्थलाभोत्कण्ठे क्रमाद्विस्फुरिते दृगादौ" इति पुंसां सदा दक्षिणदेहभागे स्त्रीणाञ्च वामावयवे प्रजातः इति च वसन्तराजशाकुने शुभफलत्वसङ्गमम्।

(२) विदूषकः। भो वयस्य विवाहनेपथ्येन सविशेषं खलु शोभतेऽत्रभवती मालविका। स०

(३) अनतिलम्बिदुकूलनिवासिनी परिहितानतिदीर्घवसना इयं मालविका लघुभिरल्पैराभरणैः उदयोन्मुखी चन्द्रिका यत्र, तादृशी अनेन शुक्लपक्षो सूचितः। चैत्रविभावरी चैत्रशुक्लपक्षरात्रिरित्यर्थः। हतहिमैः अपसारितदीप्तिप्रतिबोधकतुषारैः उडुगणैरिव मे प्रतिभाति। आभर-

Digitized by Google

धारि। उपेत्य। जेदु जेदु अज्जउत्तो। (१)

विदू। वड्ढदु भोदी। (२)

परि। विजयतां देवः।

राजा। भगवति! अभिवादये।

परि। अभिप्रेतसिद्धिरस्तु।

देवी। सस्मितम्। अज्जउत्त! एस दे अम्हेहिं तरुणीजण-सहाअस्स असोओ संकेदगेहको संकप्पिदो। (३)

विदू। भो आराहिओसि। (४)

राजा। सव्रीड़मशोकमभितः परिक्रामन्।

नायं देव्या भाजनत्वं न नेयः
सत्कारणामीदृशानामशोकः।
यः सावज्ञो माधवश्रीनियोगे
पुष्पैः शंसत्यादरं त्वत्प्रयत्ने॥ (५)

णानासुडुगणेन साडम्बरपूर्व्वा मालविकायाः विभावरीरूपेणोल्लेखेति भावः।

(१) धारिणी। जयति जयति आर्य्यपुत्रः। स०

(२) विदूषकः। वर्धतां भवती। स०

(३) देवी। आर्य्यपुत्र! एष तेऽस्माभिस्तरुणीजनसहायस्याशोकः संकेतगृहकः संकल्पितः। स० सङ्केतगृहमिव स्वार्थे कन् अभीष्टसमागम-हेतुत्वात् तत्समत्वम्। स०

(४) विदूषकः। भो आराधितोऽसि। स० देव्येति शेषः। इति राजानं प्रत्युक्तिः।

(५) अयमशोकः देव्या ईदृशानां सत्काराणां सम्मानानां भाजनत्वं

Digitized by Google

विदू । भो वीसद्धो भविअ जोव्वणवदिं पेक्ख । (१)

धारि । कां ? । [किंविअ ?] (२)

विदू । तवणीआसोअस्स कुसुमसोहं । (३)

सर्व उपविशन्ति ।

राजा । मालविकां विलोक्यात्मगतम् । कष्टः खलु सन्निधिवियोगः ।

अहं रथाङ्गनामेव प्रिया सहचरीव मे ।
अननुज्ञातसम्पर्का धारिणी रजनीव नौ ॥ (४)

प्रविश्य कञ्चुकी ।

कञ्चु । जयति जयति देवः । अमात्यो विज्ञापयति । तस्मिन्

न नेयः ? न प्रापणीय इति न अपि तु नेय एव तत्र हेतुत्वेन द्वितीयार्थम् । योऽशोकः माधवश्रीनियोगे वसन्तसम्मदो नियोगे सपुष्पत्वभवनरूपे आदेशे सावज्ञः अतादरः सन् त्वत्प्रयत्ने तव प्रयासे पुष्पैः विकाशैः करणैः आदरं गच्छति सूचयति । वसन्तश्रीसमादेशमनादृत्य पुष्पोद्गमो न जातः इदानीं तव प्रयासे समादरपरो भूत्वा पुष्पाख्यमूतेत्यर्थः ।

(१) विदूषकः । भो विअन्धो भूत्वा यौवनवतीं प्रेक्षस्व । स०

(२) धारिणी । काम् ? । [कामिव] । स०

(३) विदूषकः । तपनीयाशोकस्य कुसुमशोभाम् । स० विदूषकेण मालविकासद्दृश्येवेदं कथित देवीसकाशे तु तदप्रकृतमिति बोध्यम् ।

(४) समीपविच्छेदे सदृशानां दुःखाकरत्वं दर्शयन्नाह अहमित्यादि । अहं रथाङ्गनामा चक्रवाक इव मे मम प्रिया मालविका सहचरीव चक्रवाकस्त्रीत्यादि निकटस्थैवेति च ध्वनिः, धारिणी नौ आवयोः अननुज्ञातसम्पर्का अनभ्युपगतसंयोगा रजनीव प्रतिबन्धिकेति शेषः । नानुज्ञातः प्रतिषिद्धः सम्पर्को यस्याः पक्षे मुनिशापात् प्रतिषिद्धः सम्पर्को यस्यामिति विग्रहभेदः ।

Digitized by Google

काले विदर्भराजोपायने दे शि[ल्पिदारिके] ल्पकारिके मार्ग-परिश्रमादलघुशरीरे इति ज्ञात्वा न प्रवेशिते। सम्प्रति देवोपस्थानयोग्ये। तदाज्ञां देवो दातुमर्हति।

राजा। प्रवेशय ते।

कञ्चु। यदाज्ञापयति देवः। इति निष्क्रम्य ताभ्यां सह प्रविश्य। इत इतो भवत्यौ।

प्रथ। जनान्तिकम्। हला रमणीए! अपुव्वं विअ इमं राअउलं पविसन्तीए मे पसीददि हिअअब्भन्तरसङ्गदो अप्पा।(१)

द्वितीया। जोण्हिणिए! महवि एव्वं। अत्थि क्खु लोअप्पवादो "आगामि सुहं दुक्खं वा हिअअसमवत्था कधेदि" त्ति। (२)

प्रथ। सच्चो दाणिं होदु। (३)

कञ्चु। एष देव्या सह देवस्तिष्ठति। उपसर्पतां भवत्यौ।

उभे। उपसर्पतः मालविकां परिव्राजिकां च दृष्ट्वा परस्परमवलोकयतः।

उभे। प्रणिपत्य। जेदु जेदु भट्टा। जेदु जेदु भट्टिणी। (४)

---

(१) प्रथमा। हला रमणीये! अपूर्वमिवेदं राजकुलं प्रविशन्त्या मे प्रसीदति हृदयाभ्यन्तरसङ्गत आत्मा। स०

(२) द्वितीया। ज्योत्स्निके! मम्याप्येवम्। अस्ति खलु लोकप्रवादः "आगामि सुखं दुःखं वा हृदयसमवस्था कथयति" इति। स०

(३) प्रथमा। सत्य इदानीं भवतु। स०

(४) उभे। जयति जयति भर्ता। जयति जयति भट्टिनी। स०

Digitized by Google

राजा। निषीदतम्।

उभे। राजाज्ञया उपविष्टे।

राजा। कस्यां कलायामभिविनीते भवत्यौ।

उभे। भट्टा! सङ्गीदएअब्भन्तरम्हे। (१)

राजा। देवि! गृह्यतामनयोरन्यतरा।

धारि। मालविए! इदो दक्खदरा सङ्गीदसहाइणी दे का रुच्चदि। (२)

उभे। मालविकां दृष्ट्वा। अम्मो भट्टिदारिआ। जेदु जेदु भट्टिदारिआ। (३) इति प्रणिपत्य तया सह बाष्पं विसृजतः।

सर्वे विलोकयन्ति।

राजा। के भवत्यौ?. का वेयम्?।

प्रथ। अच्छाणं भट्टिदारिआ। (४)

राजा। कथमिव?।

उभे। सुणादु भट्टा। जो सो भट्टिणा विजअदण्डेहिं

---

(१) उभे। भर्तः! सङ्गीतकाभ्यन्तरे स्वः। स० विनीते इति शेषः।

(२) धारिणी। मालविके! इतः दक्षतरा संगीतसहायिनी ते का रोच्यते। स०

(३) उभे। अहह भर्तृदारिका। जयति जयति भर्तृदारिका। स०

(४) प्रथमा। आवयोर्भर्तृदारिका। स०

Digitized by Google

विदब्भणाहं वसीकरिअ बन्धणादो मोदवो कुमारो माहवसेणो णाम। तस्सु दुअं कणीअसी बहिणिआ मालविआ णाम।(१)

धारि। कहं राअदारिआ दुअम्?। चन्दणं क्खु मए पादुआवदेसेण दूसिदम्। (२)

राजा। अथात्मभवती कथमित्संभृता?।

माल। निःखस्वात्मगतम्। विहिणिओएण। (३)

दिती। सुणादु भट्टा दाआदवसं गदे भट्टिदारए माहवसेणे तस्सु अमच्चेण अज्जसुमदिणा अन्तारिसं परिअणं उज्झिअ गूढं आणीदा एसा। (४)

राजा। श्रुतपूर्वं मयैतत्। ततस्ततः।

दिती। भट्टा! अदो अवरं ण आणामि। (५)

धरि। अतः परमहं मन्दभागिनी कथयिष्यामि।

---

(१) उभे। श्रुत्वोत्तं भर्ता। यो स भर्त्रा विजयदक्षैर्विदर्भनाथं वशीकृत्य बन्धनान्मोचितः कुमारो माधवसेनो नाम। तस्येयं कनीयसी भगिनी मालविका नाम। स०

(२) धारिणी। कथं राजदारिकेयम्?! चन्दनं खलु मया पादुकामदेशेन दूषितम्। स०

(३) मालविका। विधिनियोगेन। स०

(४) द्वितीया। श्रुत्वोत्तं। भर्त्रा दायादवशंगते भर्तृदारके माधवसेने तस्यामात्येन सुमतिनाऽन्तःपुरं परिजनमुज्झित्वा गूढमानीतैषा। स०

(५) द्वितीया। भर्तः! अतोऽपरं न जानामि। स०

Digitized by Google

उभे। भट्टिदारिए! अज्जकोसिईए विअ सरसंजोगो। णं सा एव्व। (१)

माल। अहदुम्। (२)

उभे। जदिवेसधारिणी अज्जकोसिई दुक्खेण विभावीअदि। भअवदि! णमो दे। (३)

परि। स्वस्ति भवतीभ्याम्।

राजा। कथमात्मवर्गोऽयं भगवत्याः।

परि। एवमेतत्।

विदू। तेण कहेदु दाणिं भअवदी अत्तभोदीवुत्तन्तं दाव असेसम्। (४)

परि। सविलक्षम्। तावत् श्रूयताम्। माधवसेनसचिवं ममाग्रजं सुमतिमवगच्छ।

राजा। उपलक्षितः। ततस्ततः।

---

(१) उभे। भर्तृदारिके! आर्यकौशिकया इव सरसंयोगः?। ननु सैव। स०

(२) मालविका। अथ किम्?। स०

(३) उभे। यतिवेषधारिण्यार्यकौशिकी दुःखेन विभाव्यते। भगवति! नमस्ते। स० दुःखेन विभाव्यते इत्यन्तं मालविकां प्रत्युक्त्वा कौशिकीं प्रत्याह भगवतीत्यादि।

(४) विदूषकः। तेन कथयत्विदानीं भगवत्यात्मभवतीवृत्तान्तं तावदशेषम्। स०

Digitized by Google

परि। स दृमां तथागतभ्रातृकां मया सार्धमपवाह्य भवत्सं बन्धापेक्षया पथिकसार्थं विदिशागामिनमनुप्रविष्टः।

राजा। ततस्ततः।

परि। स च अटव्यन्तरे निविष्टो गताध्वा वणिग्गण इव विश्रमितुमारब्धः।

राजा। ततस्ततः।

परि। ततः। किं चान्यत्।

तूणीरपट्टपरिणद्धभुजान्तराल
मापार्ष्णिलम्बिशिखिबर्हकलापधारि।
कोदण्डपाणि निनदत्प्रतिरोधकाना
मापातदुःप्रसहमाविरभूदनीकम्॥ (१)

मालविका भयं रूपयति।

विदू। भोदि! मा भाआहि। अदिक्कन्तं क्खु अत्तभोदी कहेदि। (२)

---

(१) तूणीरपट्टेन परिणद्धं भुजान्तरालं यस्य। आपार्ष्णि पार्ष्णि-पर्यन्तं लम्बिनं दोलायमानं बर्हिणो मयूरस्य कलापं पिच्छं धारयति यिनि-धारि कोदण्डपाणि धनुष्पाणि प्रतिरोधकानां दस्युविशेषाणामनीकं सैन्यम् आपातदुःप्रसहम् प्रबलसंयोगमात्रेणात्यन्तदुःसहं यथा तथा निनदत् शब्दायमानम् सत् आविरभूत्।

(२) विदूषकः। भवति! मा बिभेहि। अतिक्रान्तं खल्वत्रभवती कथयति। स०

Digitized by Google

राजा । ततस्ततः ।

परि । ततो मुहूर्तं [बद्धायुधा] [मुग्धयोद्धार]स्ते पराङ्मुखीभूताः सार्थवाहयोद्धारस्तस्करैः ।

राजा । भगवति ! हन्त अतः कष्टतरमिदानीं श्रोतव्यम् ।

परि । ततः स मत्तोदर्यः ।

दृमां परीप्सुर्दुर्जातेः पराभिभवकातराम् ।
भर्तृप्रियः प्रियैर्भर्तुरानृण्यमसुभिर्गतः ॥ (१)

प्रथ । आं हा हदो सुमदी णम् । (२)

द्विती । तदो क्खु भट्टिदारिआए दुअं समवत्था संवुत्ता । (३)

परिव्राजिका वाष्पं सृजति ।

राजा । भगवति ! तनुत्यजामीदृशी लोकयात्रा । न शोच्यस्त्वभवान् सफलीकृतभर्तृपिण्डस्त्वपत्नी ।

परि । ततोऽहं मोहमुपागता यावत् संज्ञां प्रतिलभे तावदियं दुर्लभदर्शना संवृत्ता ।

---

(१) दुर्जातेः दुष्कुलात् पराभिभवकातरां परिभवक्लिष्टामिमां मालविकां परीप्सुः उद्धिर्षुः भर्तृप्रियः वसुमतिः प्रियैरपि अत्यन्तदुस्त्यजैरपीत्यर्थः असुभिः अक्षन् दत्त्वेत्यर्थः आन्तर्यं भर्तृपिण्डसेवनोपकारं गतः कृत इत्यर्थः ।

(२) प्रथमा । आः हा हतः सुमतिर्नन्तु । स० ।

(३) द्वितीया । ततः खलु भर्तृदारिकाया इयं समवस्था संवृत्ता । स०

राजा। महत्खलु छद्मकृतमनुभूतं तत्रभवत्या।

परि। ततो भ्रातुः शरीरमग्निसात्कृत्वा पुनर्नवीकृतदुःखया त्वदीयं देशमवतीर्य काषाये गृहीते।

राजा। युक्तः सज्जनस्यैष पन्थाः।

परि। सेयमाटविकेभ्यो वीरसेनं वीरसेनाद्देवीं गता। देवीगृहे लब्धप्रवेशया मया चानन्तरं दृष्टेत्येवमवसानं कथायाः।

माल। आत्मगतम्। किं णु क्खु भट्टा साम्पदं भणादि। (१)

राजा। अहो परिभवोपहारिणो विनिपातः। (२) कुतः

प्रेष्यभावेन नामेयं देवीशब्दक्षमा सती।
स्नानीयवस्त्रक्रियया पत्त्रोर्णं वोपयुज्यते॥ (३)

धारि। भअवदि! तुए अहिजणवदिं मालविअं अणाअक्खन्तीए असंपदं किदम्। (४)

परि। शान्तं पापम्। कारणेन खलु मया नैर्घृण्यमव लम्बितम्।

---

(१) मालविका। किं नु खलु भर्ता साम्प्रतं भणति। स०

(२) परिभवोपहारिणः परिभवस्य दुःखस्य उपहारिणः उपकारकस्य दैवस्येति शेषः। अहो विनिपातः आगन्तुकोपस्थितिः।

(३) देवीशब्दक्षमा देवीशब्दार्हा इयं मालविका प्रेष्यभावेन दासभावेन उपलक्षितेति शेषः। सती विद्यमाना स्नानीयक्रियया गात्रप्रोञ्छनक्रियया पत्त्रोर्णं व धौतकौशेयमिव उपयुज्यते संबध्यते।

(४) धारिणी। भगवति! त्वयाभिज्ञवतीं मालविकामनाचक्षाणया असांप्रतं कृतम्। स० अभिज्ञवतीं प्रभवत्वंगजामित्यर्थः।

Digitized by Google

धारि । किं विस्मृतं कारणम् ? । (१)

परि । दुयं पितरि जीवति केनापि देवयात्रागतेन शिवादेशकेन साधुना मत्समक्षं व्यादिष्टा । वत्सरमात्रमियं प्रेष्यभावमनुभूय ततः सहस्रभर्तृगामिनी भविष्यति । विदर्भगतमनुष्ठेय-[मुपस्थितमभूत् अ०] मवधारितमस्माभिः । देवस्य तावदभिप्रायं श्रोतुमिच्छामीति । (२)

राजा । भद्रमुख ! तत्रभवतोर्भ्रातृव्योर्यज्ञसेनमाधवसेनयोर्द्वैराज्य(३)मिदानीमवस्थापयितुकामोऽस्मि !

तौ पृथग्वरदाकूले शिष्टामुत्तरदक्षिणे ।
नक्तं दिनं विभज्योभौ शीतोष्णकिरणाविव ॥ (४)

कञ्चु । देव ! एवममात्यपरिषदे विज्ञापयामि ।

---

(१) धारिणी । किमिव तत्कारणम् । स०

(२) देवयात्रायामागतेन शिवादेशकेन चिह्नादिद्वारा कुशलोपदेशकेन साधुना उदासीनेन संन्यासिना । भविष्यतीत्यन्तं धारिणीं प्रत्युक्ता राजानमुद्दिश्याह विदर्भगतमित्यादि ।

(३) द्वैराज्यं द्वौ राजानौ यत्र तस्य भावः विभक्तराज्यमित्यर्थः ।

(४) तौ यज्ञसेनमाधवसेनौ उभौ नक्तं दिनञ्च विभज्य शीतोष्णकिरणौ चन्द्रसूर्याविव उत्तरदक्षिणे वरदाकूले पृथक् वरदानद्याः उत्तरं कूलं यज्ञसेनः, दक्षिणं वरदानदीकूलञ्च माधवसेनः शिष्टाम् पालयताम् तथा च वरदानदीं सीमाभूतां कृत्वा उत्तरदक्षिणे तयोः राज्यं विभक्तमित्यर्थः ।

Digitized by Google

राजा । अङ्गुल्यानुमन्यते ।

निष्क्रान्तः कञ्चुकी ।

प्रथ । अनान्तिकम् । भट्टिदारिए ! दिट्ठिआ भट्टिदारओ अद्धरज्जे पडिट्ठं गमिस्सदि । (१)

माल । एदं दाव बहुमणिदव्वं जं जीविदसंसआदो विमुत्तो । (२)

पुनः प्रविश्य कञ्चुकी ।

विजयतां देवः । आमात्यो देवस्य विज्ञापयति कल्याणी देवस्य बुद्धिः । मन्त्रिपरिषदोऽयेतदेव दर्शनम् । (३)

द्विधा विभक्तां श्रियमुद्वहन्तौ
धुरं रथाश्वाविव संगृहीतुः ।
तौ स्थास्यतस्ते नृपते ! निदेशे
परस्परावग्रहनिर्विकारौ ॥ (४)

---

(१) प्रथमा । भर्तृदारिके ! दिष्ट्या भर्तृदारिकोऽर्धराज्ये प्रतिष्ठां गमिष्यति । स०

(२) मालविका । एतावद् बहु मन्तव्यं यत् जीवितसंशयाद्विमुक्तः । स०

(३) दर्शनं निश्चयः ।

(४) हे नृपते ! उक्तप्रकारेण द्विधा विभक्तां संगृहीतुः संयन्तुः धुरं रथाश्वाविव श्रियं वहन्तौ धारयन्तौ तौ यज्ञसेनमाधवसेनौ परस्परावग्रहे युद्धादिना आत्मनाशे निर्विकारौ विद्वेषरहितौ सन्तौ ते तव निदेशे आज्ञायां स्थास्यतः ।

Digitized by Google

राजा। तेन हि मन्त्रिपरिषदं ब्रूहि सेनान्ये वीरसेनाय लेखयतामेवंक्रियतामिति।

कञ्चु। यदाज्ञापयति देवः। इति निष्क्रम्य सप्राभृतकं लेखं गृहीत्वा पुनः प्रविश्य। अनुष्ठिता प्रभोराज्ञा। अयं देवस्य सेनापतेः पुष्यमित्रस्य सकाशात्सोत्तरीयप्राभृतको (१) लेखः प्राप्तः। प्रत्यवीकरोत्वेनं देवः।

राजा। उत्थाय प्राभृतकं सोपचारं गृहीत्वा लेखं परिजनायार्पयति। परिजनो लेखं नाट्येनोद्घाटयति।

धारि। अय्यहे तदो मुहं एव्व णो हिअअम्। सुणिस्सं दाव गुरुअणकुसलाणन्तरं वसुमित्तस्स वुत्तन्तम्। अदिभारे क्खु पुत्तओ सेणावदी णिउत्तो। (२)

राजा। उपविश्य वाचयति। स्वस्ति यज्ञशरणात्सेनापतिः पुष्यमित्रो वैदिशस्थं पुत्रमायुष्मन्तमग्निमित्रं स्नेहात्परिष्वज्यानुदर्शयति। विदितमस्तु। योऽसौ राजसूयदीक्षितेन मया राजपुत्रशतपरिवृतं वसुमित्रं गोप्तारमादिश्य वत्सराय निवर्त्तनीयो निरर्गलस्तुरङ्गमो विसर्ज्जितः। स सिन्धोर्दक्षिणे रोधसि चरन्न-

---

(१) उत्तरीयरूपं प्राभृतकं प्रावरणविशेषः सञ्जः तेन तथाभूतः लेखः लेखपत्रं प्राप्तः आगत इत्यर्थः।

(२) धारिणी। अयमेव तत्सुखमेव नो हृदयम्। शृण्वामि तावद्गुरुजनकुशलानन्तरं वसुमित्रस्य वृत्तान्तम्। अतिभारे खलु पुत्रकः सेनापतिर्नियुक्तः। स०

Digitized by Google

श्वानीकेन यवनेन प्रार्थितः। (१) ततउभयोः सेनयोर्महानासीत् संमर्दः।

धारिणी विषादं नाटयति।

राजा। कथमीदृशं संवृत्तम्। पुनर्वीक्षयति।

ततः परान् पराजित्य वसुमित्रेण धन्विना।
प्रसह्य ह्रियमाणो मे वाजिराजो निवर्तितः॥ (२)

धारि। दूमिणा आस्सुसिदं मे हिअअम्। (३)

राजा। लेखमेवं वाचयति। सोऽहमिदानीमंशुमतेव सगरः पौत्रेण प्रत्याहृताश्वो यज्ञे। तदिदानीमकालहीनं विगतरोषचेतसा भवता वधूजनेन सह यज्ञसेवनायागन्तव्यमिति।

राजा। अनुगृहीतोऽस्मि।

परि। दिष्ट्या पुत्रविजयेन दम्पती वर्धेते।

भर्त्तासि वीरपत्नीनां श्लाघ्यानां स्थापिता धुरि।
वीरसूरिति शब्दोऽयं तनयात्त्वामुपस्थितः॥ (४)

---

(१) अश्वानीकेन अश्वारोह एव अनीकं यस्य अश्वारोहिणेत्यर्थः। प्रार्थितः गृहीतः।

(२) ह्रियमाणः परैरिति शेषः। मे मम वाजिराजः अश्वश्रेष्ठः अश्वमेधीयलक्षणाक्रान्तत्वात् श्रेष्ठत्वम् प्रसह्य बलेन निवर्त्तितः प्रत्याहृत इत्यर्थः।

(३) धारिणी। अनेनाश्वसितं मे हृदयम्। सं० अनेन एतद्वाक्यश्रवणेन।

(४) भर्त्तासीति भर्त्ता स्वामिना अग्निमित्रेण वीरपत्नीनां वीरः

Digitized by Google

धारि। भोदि! परितुट्ठ्हि जं पिदरं अणुजादओ वच्छओ। (१)

राजा। सौम्य! ननु कलभेन यूथपतेरनुकृतम्। (२)

कञ्चु।

नैतावता वीरविजृम्भितेन
चित्तस्य नो विस्मयमादधाति।
यस्याप्रधृष्यः प्रभवस्त्वमुर्वै-
रग्नेरपां दग्धुरिवोरुजन्मा॥ (३)

पतिवर्त्मसां तासां स्नाघ्यानां स्त्रीणां धुरि अग्रे स्थापिताऽसि। तनयाहेतोः वीरसूरिति वीरमातेत्यर्थं शब्दः त्वामुपस्थितः प्राप्तः एतच्च धारिणीं प्रत्याह स्म।

(१) धारिणी। भवति! परितुष्टास्मि यत्पितरमनुजातको वत्सकः। स० पितरमनुजातकः वीर्येण पितृसदृशः जातो वत्सकः पुत्रकः वस्तुभिवः।

(२) कलभेन करिशावकेन अल्पवयस्केनेत्यर्थात् यूथपतेः प्रधानगजस्य चरितमिति शेषः। अनुकृतम् सदृशीकृतम्।

(३) एतावता शत्रुपराजयपूर्व्वकाश्वाहरणरूपेण वीरविजृम्भितेन शूरचेष्टितेन नोऽस्माकं चित्तस्य विस्मयं न आदधाति अविस्मयाधायकत्वे हेतुमाह। अप्रधृष्यः अन्यैः धर्षयितुमशक्यः यस्य वीरस्य, अपां दग्धुरग्नेः वाड़वानलस्येव अरुजन्मा अरुतो जन्म यस्य स और्व्व ऋषिः अथ च उरु श्रेष्ठं जन्म यस्य तथाभूतः त्वञ्च प्रभवः उत्पत्तिकारणम् उत्पत्तिस्थानम् एतादृशोत्पत्तिकस्य वीरचेष्टितमुचितमेवेति न विस्मयाधायकत्वमिति भावः।

Digitized by Google

राजा। सौद्गल्य! यज्ञसेनमशालमुरीकृत्य (१) मुच्यन्तां सर्वे बन्धनस्थाः।

कञ्चु। यदाज्ञापयति देवः। इति निष्क्रान्तः।

धारि। जयसेणे! गच्छ मेलकप्पमुहीणम् अन्तेउराणं पुत्तअस्स वुत्तन्तं णिवेदेहि। (२)

प्रतीहारी प्रस्थिता।

धारि। एहि दाव। (३)

प्रती। प्रतिनिष्क्रम्य। इअम्हि। (४)

धारि। जनान्तिकम्। जं मए असोअदोहलणिओए मालविआए पडिणादं तं, से अभिअणं च णिवेदिअ मम वअणेण दुरावदिं अणुणेहि। तुए कुदु अअं संवादो ण भंसिदव्वो त्ति। (५)

प्रती। जं देवी आणवेदि। इति निष्क्रम्य पुनः प्रविश्य च।

---

(१) यज्ञसेनमशालमुरीकृत्य गृहीत्वा तेन सहेत्यर्थः। तस्याभिनवबन्धनत्वात् पृथगुक्तिः।

(२) धारिणी। जयसेने! गच्छ मेलकप्रमुखीनामन्तःपुराणां पुत्रकस्य वृत्तान्तं निवेदय। स०

(३) धारिणी। एहि तावत्। स०

(४) प्रतीहारी। इयमस्मि। स०

(५) धारिणी। यन्मयाशोकदोहदनियोगे मालविकायाः प्रतिज्ञातं तत्, तस्या अभिजनं च निवेद्य मम वचनेनैनामनुनय। त्वया खलु संवादो न भंक्तव्य इति। स० संवादः प्रस्तावः विषय इति यावत्।

Digitized by Google

भट्टिणि पुत्तविजयणिमित्तेण परितोसेण अन्तेउराणं आभरणाणं मञ्जूसिअच्छि संवुत्ता। (१)

धारि। अलम्। किं अच्चरिअम्। साधारणो णं अब्भुदओ। (२)

प्रती। जनान्तिकम्। भट्टिणि! दूरावदी विण्णवेदि। सरिसं क्खु पढवीए पढवन्तीए तव वअणम्। संकप्पिदे ण जुज्जदि अण्णहा कादुं त्ति। (३)

धारि। भअवदि! तुए अणुमदं इच्छामि अज्जसुमदिणा पढमं किदम् अज्जउत्तस्स मालविअम् उवणादेदुम्। (४)

परि। इदानीमपि त्वमस्याः प्रभवसि।

धारि। मालविकां हस्ते गृहीत्वा। इमं अज्जउत्तो पिअणिवेदणाणुरूवं पारितोसिअं पडीच्छदु। (५)

---

(१) प्रतीहारी। यवनीयान्नापयति। भट्टिनि! पुत्रविजयनिमित्तेन परितोषेणान्तःपुराणाम् आभरणानां मञ्जूषिकाक्षि संवृत्ता। स०

(२) धारिणी। अलम्। किमाश्चर्यम्। साधारणो नन्वभ्युदयः। स०

(३) प्रतीहारी। भट्टिनि! दूरावती विज्ञापयति। सदृशं खलु पृथिव्याः प्रभवन्त्यास्तव वचनम्। सङ्कल्पिते न युज्यतेऽन्यथा कर्तुमिति। स० पृथिव्या इव गुर्व्या इति शेषः।

(४) धारिणी। भगवति! त्वयानुमतमिच्छाम्यार्यसुमतिना प्रथमं ज्ञतामार्यपुत्रस्य मालविकानुपपादयितुम्। स० ज्ञताम् आर्यपुत्रस्य स्वाधीभूतां ज्ञतां दत्तामित्यर्थः। उपपादयितुं दातुम्।

(५) धारिणी। इमामार्यपुत्रः प्रियनिवेदनानुरूपं पारितोषिकं प्रतीच्छतु।

Digitized by Google

राजा व्रीडां नाटयति ।

धारि । सञ्जितम् । किं अवधारेदि अज्जउत्तो । (१)

विदू । भोदि ! अत्थि क्खु लोअप्पवादो सव्वो जणो णव्ववरो लज्जादुरो [लुओ] होदित्ति । (२)

राजा विदूषकमवेक्षते ।

विदू । अह देवीए एव किदप्पणिव्विसेसं दिण्णदेवीसंज्ञं मालविअम् अत्तभवं पडिगहिदुम् इच्छदि । (३)

धारि । एदाए अ राअदारिआए अहिजणेण दिण्णो एव्व देवीसद्दो । किं पुणरुत्तेण । (४)

परि । मामैवम्

अस्माकमुत्सवमणिर्मणिजातिपुरस्कृतः ।
जातरूपेण कल्याणि ! तर्हि संयोगमर्हति ॥ (५)

---

(१) धारिणी । किमवधारयत्यार्यपुत्रः । स०

(२) विदूषकः । भवति ! अस्ति खलु लोकप्रवादः सर्वो जनो नव्यो वरो लज्जातुर[लुको]रो भवतीति । स०

(३) विदूषकः । अथ देव्या एव कृतात्मनिर्विशेषां दत्तदेवीसंज्ञां मालविकामात्मभवान् प्रतिपत्तुमिच्छति । स०

(४) धारिणी । एतस्यास्य राजदारिकाया अभिजनेन एव दत्तः देवीशब्दः । किं पुनरुक्तेन । स०

(५) हे कल्याणि ! यद्यपीति शेषः । इयं मालविका अस्माकमुत्सवमणिः उत्सववर्द्धकमणिरिव मणिरूपेण जात्या पुरस्कृतः आभिजात्येन शोभितः तर्हि तथापि जातरूपेण स्वर्णेन संयोगमर्हति तथा च मणेरपि

Digitized by Google

धारि। मरिसेदु भअवदी, अब्भुदअकहाए पढमं अवगुण्ठिदं वसणं णालक्खिदम्। जअसेणे! गच्छ दाव कोसेअं पत्तोणं उवणेहि। (१)

प्रती। जं भट्टिणी आणवेदि। इति निष्क्रम्य पत्त्रोर्णं गृहीत्वा प्रविश्य। देवि! एदम्। (२)

धारि। मालविकामवगुण्ठनवतीं कृत्वा। अज्जउत्त! दुअं पडिच्छीअदु। (३)

राजा। लक्ष्यासनं प्रत्यनुरक्ता वयम्। अपवार्य। हन्त प्रतिगृहीतम्। (४)

विदू। अह्मे हे देवीए अणुजलदा धारिणीए। (५) इति परिजनमवलोकयति।

परिजनः। मालविकासमेत। जेदु जेदु भट्टिणी। (६)

सर्वसंयोगादेव शोभा नान्यथा तथा एतस्या आभिजात्येऽपि अस्मिन्नुपसर्वसंयोगादेव शोभा नान्यथेत्यर्थः।

(१) धारिणी। सखि यत्तु भगवती, अभ्युदयकथया प्रथमम् अवगुण्ठनं वसनं नालक्षितम्। जयसेने! गच्छ तावत्कौशेयं पत्त्रोर्णमुपनय। ख०

(२) प्रतीहारी। यद्भर्त्रिन्याज्ञापयति। देवि! एतत् ख०।

(३) धारिणी। आर्यपुत्र! दूयम् प्रतीच्छताम्। ख० प्रतिगृह्यताम्।

(४) हन्त प्रतिगृहीतं त्वदानात् प्रागेव स्वीकृतमित्यर्थः।

(५) विदूषकः। अहह देव्या अनुकूलता धारिण्याः। ख०

(६) परिजनः। जयति जयति भर्त्रिनी। ख०

Digitized by Google

धारिणी परिव्राजिकां निर्वर्णयति ।

परि । देवि ! नैतच्चित्रं त्वयि ।

प्रतिपत्त्येणापि पतिं सेवन्ते भर्तृ [वत्सलास्तन्व्यः] सेवमानार्य्यः ।
अन्यसरितामपि जलं [रसं] समुद्रगाः प्रापयन्त्युदधिम् ॥ (१)

प्रविश्य निपुणिका ।

निपु । जेदु जेदु भट्टा । इरावदी विण्णवेदि । जं हि उवआरादिक्कमेण तदा अहं भट्टिणो अवराद्धा । णं सो अत्तणो भट्टा । अणुपदं भट्टिणो अणुरूवं एव्व मए आचरिअं । सम्पदं पुण्णमणोरहो भट्टा जाओ । अहं संपसादमेत्तेण संभावइदव्वेत्ति । (२)

---

(१) भर्तृसेवनाः स्वाभ्याराधनतत्पराः नार्य्यः पाठान्तरे भर्तृवत्सलाः स्वाभ्यनुरक्ताः तन्व्यः प्रतिपत्त्येणापि सङ्घार्थं कृतीया । प्रतिपत्त्यपेक्षया सङ्घापि पतिं सेवन्ते तत्र दृष्टान्तः समुद्रगाः नद्यः अन्यसरितां अपरनदीनां रसं जलं क्वचित् जलमित्येव पाठः उदधिं समुद्रं प्रापयन्ति ।

(२) निपुणिका । जयति जयति भर्ता । इरावती विज्ञापयति । यदि उपचारातिक्रमेण तदाहं भर्तुरपराद्धा । ननु स आत्मनो भर्ता । अनुपदं भर्तुरनुरूपमेव मया आचरितम् । साम्प्रतं पूर्णमनोरथो भर्ता जातः । अहं प्रसादमात्रेण सम्भावयितव्येति । स० । ननु भो स भर्ता आत्मन इति कृत्वैवापराद्धेत्यर्थः ।

Digitized by Google

धारि । णिउणिए ! अवस्सं दे सेविअं अज्जउत्तो आणिस्सदि । (१)

निपु । अणुगिह्णीदम्हि । (२) इति निष्क्रान्ता ।

परि । देव ! अमुक्तत्वत्सम्बन्धेन चरितार्थं माधवसेनं त्वदाज्ञया दृष्ट्वा नयनसाफल्यं कर्तुमिच्छामि ।

धारि । ण जुत्तं भअवदि ! अम्हाणं परिच्चत्तम् । (३)

राजा । भगवति ! मदीयेष्वेव लेखेषु तत्रभवतस्त्वामुद्दिश्य सभाजनानि यातयिष्यामः ।

परि । युवयोः स्नेहात्परवानयं जनः ।

धारि । आणवेदु अज्जउत्तो भूओवि दे किं पिअम् उवअरिस्सम् । (४)

राजा । मम तावदेतावदेव प्रियम् ।

त्वं मे प्रसादसुमुखी भव चण्डि ! [देवि !] नित्य-
मेतावदेव मृगये प्रतिपत्तिहेतोः ।

---

(१) धारिणी । निपुणिके ! अवश्यं ते सेवितमार्यपुत्रो ज्ञास्यतीति । स० ते तव सेवितं सेवनमार्यपुत्रो ज्ञास्यति यथा त्वया सेवितं तदनुरूपं फलमार्यपुत्रो दास्यतीत्यर्थः । इति इरावत्यै कथयित्वोक्तम् ।

(२) निपुणिका । अनुगृहीतास्मि । स०

(३) धारिणी । न युक्तं भगवति ! अस्मान् परित्यक्तुम् । स०

(४) धारिणी । आज्ञापयत्वार्यपुत्रः । भूयोऽपि ते किं प्रियमुपकरिष्यामि ।

Digitized by Google

आशास्यमीतिविगमप्रभृति प्रजानां
सम्पत्स्यते न खलु गोप्तरि नाग्निमित्रे ॥ (१)

इति निष्क्रान्ता सर्वे।

इति पञ्चमोऽङ्कः।

इति श्रीमहाकवि-कालिदासप्रणीतमग्निमित्रं नाम नाटकं समाप्तम्।

---

(१) हे चण्डि! हे कोपने! देवि! इति पाठस्तु समीचीनः ज्ञताभिषेकायाः क्रोधराहित्यौचित्यात् प्रसादसुखी भव प्रसन्ना भव यदा यदा किञ्चित् कारणमुद्दिश्य कुप्यसि तदा तदा मम प्रसादनात् प्रसन्ना भव न तु दूरावतीव अत्यन्तकोपना भवेत्यर्थात्। अग्निमित्रे मयि गोप्तरि सति प्रजानाम् आशास्यम् वाञ्छनीयम् ईतिविगमप्रभृति अतिवृष्ट्यादिरादित्यादि न खलु सम्पत्स्यते इति न अपि तु सम्पत्स्यते एव। अतस्तस्य स्वतः सिद्धत्वान्नाशंसामपेक्षेतेति भावः।

क्व कालिदासवचनं भावगम्भीरमद्भुतम्।
क्व मे मन्दा मतिस्तस्य व्याख्याने सा क्षमा कुतः॥
गुरुं चित्ते निधायैव किञ्चिदुक्तं मयात्र यत्।
सदोषमपि तद्गृह्यं विद्वद्भिः सत्स्वभावतः॥ ओं तत्सत्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यकृता मालविकाग्निमित्रविवृतिः समाप्ता।

शाके नेत्राङ्कवाहेन्दुप्रमिते वत्सरे श्रिया।
तारानाथद्विजेनेदं संस्कृत्य सुदृशाङ्कितम्॥
१७९२।

Digitized by Google

Digitized by Google

Digitized by Google

Digitized by Google


Digitized by Google

Digitized by Google

Digitized by Google

3 2044 036 501 856

THE BORROWER WILL BE CHARGED AN OVERDUE FEE IF THIS BOOK IS NOT RETURNED TO THE LIBRARY ON OR BEFORE THE LAST DATE STAMPED BELOW. NON-RECEIPT OF OVERDUE NOTICES DOES NOT EXEMPT THE BORROWER FROM OVERDUE FEES.



Bound
at the
SION PRESS,
SURAT.



Digitized by Google